standing of the system—and I have not allowed a single sentence to be finally written out or printed without carefully going through it and understanding its full meaning and bearing—from Pandit Hara Bhatta Shastrin, who has made a deeper study of the Kashmir Shaiva system and has a wider acquaintance with its literature than the other Pandits of the Department, excepting perhaps M. M. Pandit Sahaja Bhatta who is acquainted more or less equally with most branches of the Sanskrit literature of Kashmir.

Several moot points, specially in connection with the history of the system, have been cleared up for me by the brilliant young Pandit, Maheshvara Rajanaka, representing as he does an ancinet family of Scholars.

Finally, Pandit Govardhana, another young Scribe, has also rendered help in carefully and correctly copying out MSS, scrupulously following the directions given him by me.

While thus they all have done their share of the work well, the only point which has resulted in a failure is that, during my absence in Europe, when I could read only one proof of each form and the final reading was done in my office in Kashmir, a confusion has been made as to the use of the signs of punctuation. The old Sanskrit Mss never used such signs and the old type Pandits are generally unacquainted with their meanings It will thus be seen that in certain parts of the text a comma has been used where there should have been a semi colon, while the latter has been substituted by a comma. Otherwise I am grateful to the Pandits for the way they have done their part.

I am also very grateful to the M. M. Pandit Rujarāma Shastrin and to Babu Govinda Dasa of Benares for having so kindly lent me the Mss. mentioned above.

Srinagar, Kashmir. JAGADĪSHA CHANDRA CHATTERJI.

# INTRODUCTION.

An account of the history of the Shiva Sutras and its Commentary, the Vimarshini, together with that of the general Shaiva Literature of Kashmir, has been given elsewhere, namely, in *"The Kashmir Shaivaism'* forming the second published volume of this Series.*

From what has been said there, it will be seen that there are at least two versions as to how Vasu Gupta obtained the original Sutras and how they were handed down to Kallata. Likewise there may have been several interpretations of the Sutras themselves—all no doubt agreeing in regard to the philosophical view-point of understanding the whole but differing as to the meaning and interpretations of particular ones. Indeed, Kshemaraja gives this very fact as the reason of his undertaking to write a new Commentary. Most of these different interpretations are now lost, owing no doubt to the influence of the great Abhinava Gupta whose explanation of the Sutras is given in Kshemaraja's work as the latter himself admits. The only exception to this is the interpretation of the Sutras given by Bhaskara in his *Shiva Sutra Varttika* which we still possess Bhaskara claims to have received it in a direct

---

* This volume, of which the full title is "The Kashmir Shaivaism, being a brief Introduction to the History, Literature and Doctrines of the Advaita Shaiva Philosophy of Kashmir, specifically called the Trika System", was originally intended to be published in one volume with the Shiva Sutra Vimarshini, as a general Introduction to the system But the idea had to be given up for two reasons (a) the two together would have made the volume rather too bulky and (b) it was thought desirable to publish the Sanskrit text separately to suit the needs of the old type of Pandits, who mostly do not know English and would like to get the Sanskrit text only without being obliged to pay for an Introduction in English for which they have no use

line of spiritual and intellectual inheritance from Vasu Gupta *through* Kallata It is therefore probable that in it we have the sense in which Kallata understood the *Sutras* and which may have also been the meaning given to them by Vasu Gupta himself, specially when we remember that Kallata was one of the chief, if not *the* chief, disciples of Vasu Gupta It would be interesting to compare here the interpretation recorded in the *Varttika* with that given in the *Vimarshini* of Kshemarâja, which is now published for the first time But I shall reserve this task till the *Varttika*, which is now in the press, is also published, specially as such a comparison would not perhaps be so well understood without both the texts (of the *Vimarshini* and of the *Varttika*) before the reader All I need say here is that the *Vimarshinî* gives to a number of Sutras a totally different meaning to that we find in the *Varttika*.

With only this warning for the present, let us state at once what the real purpose of the promulgation of the Sutras is regarded to be, and what, according to *Kshemaraja*, and therefore according to the latter's Guru, Abhinava Gupta, and the line he represented—as distinguished from the line of Kallata and his direct pupils—the Sutras mean

The main, indeed the only, purpose with which the Sutras were promulgated was *not* merely to enunciate the philosophic principles of the Advaita Shaivism, that is to say, to serve merely a *theoretical* or intellectual object, but, on the contrary, to show men a *practical* way of realising *by experience* the fact that man is essentially—i e in his real and innermost self—no other than the Deity himself, and of enabling him, in virtue of this realisation, to attain not only to absolute freedom from all that limits him and subjects him as a helpless creature to the sorrows and sufferings of limited existence,—

to repeated births and deaths and to their attendant consequences—but also to gain omniscience like the Deity himself, indeed, as *one with him*, and to wield all that power of creation and destruction which He himself wields. This being considered the real object of the *Shiva Sūtras*, the work is regarded as a practical one—as a work which is devoted to the exposition of the *means* to an end, rather than to a philosophical and purely argumentative, or even descriptive, exposition of that end itself.

Indeed so much is this the case that the three divisions of the Sutras are called by the Commentator the three Upayas or *Means*, namely, to the end of attaining the supreme Divine State, Power and Glory.

This being the real object of the *Sūtras*, we do not find in the work any elaborate account of the philosophic principles of Shaivaism. It introduces, only as much of the principles as is required for an exposition of the 'Means' treated of in it. But it is very difficult, if not quite impossible to understand the *Sutras* and the Commentary without a clear comprehension of practically all the fundamental principles of the system. What these principles are has been shown in the volume mentioned above *i e* "*The Kashmir Shaivaism*". They need not therefore be repeated here.

As explained in '*The Kasmir Shaivaism*', there are, for attaining the Divine State, several Means or Upayas of which the *Shiva Sutras* propound, according to Kshemaraja, three, *viz*, the Shāmbhava, the Shakta and the Ānava—the first section of the Sutras explaining the Shambhava, the second the Shakta and the third the Ānava.

How the Sūtras accomplish this, will be easily understood from the Sanskrit summary of the topics (शिवसूत्र विमर्शिन्यनुसारेण सूत्रेषु प्रतिपादितविषया, to be found prefixed to the text), when read along with "*The Kasmir Shaivaism*". It need not therefore be detailed here again.

## शिवसूत्रविमर्शिन्यनुसारेण सूत्रेषु प्रतिपादितविषयाः।

तत्रादौ

## शांभवोपायाख्ये प्रथमोन्मेषे।

१ आत्मनो लक्षणम्।

२ द्विविधस्याणवमलस्य लक्षणपूर्वं बन्धत्वकथनम्।

३ मायीयकार्माभिधानयोर्मलयोर्लक्षणपूर्वं बन्धत्वनिरूपणम्।

४ मलानां बन्धकत्वोक्तौ हेतुकथनम्।

५ बन्धात्ममलत्रयोपशमहेतोः शांभवसमावेशस्यादेशनम्।

६ समावेशप्रकर्षाद्व्युत्थानेऽपि भेदस्योपशान्तिनिरूपणम्।

७ समाधिव्युत्थानयोरभेदनिरूपणम्।

८ जाग्रदवस्थाया लक्षणम्।

९ स्वप्नावस्थाया लक्षणम्।

१० सुषुप्तावस्थाया लक्षणं, तत्प्रसक्त्या मायायाश्च, जागरादिषु त्रैरूप्यकथनं लोकाभिप्रायेण योग्यभिप्रायेण च।

११ स्वसंवित्पदं समाविशतो योगिनस्त्रिपदचमत्कर्तृत्वेन वीरेशसंज्ञाया आम्नानम्, अनेवं-विधस्य पशुसंज्ञायाः सूचनं च।

१२ महायोगिनः परतत्त्वाधिरूढ्यावेदिकानां भूमिकानां कथनम्।

१३ आरूढस्येच्छायाः परशक्तिरूपताप्रदर्शनम्।

१४ स्वातन्त्र्यवतोऽस्य विश्वस्मिन् अहन्तावभासनकथनम्।

१५ चिदावेशाद्वेद्यस्य चिन्मयतावभासननिरूपणम्।

१६ उपायान्तरोक्त्या प्रतिभावप्रदर्शनम्।
१७ योगिन आत्मज्ञानलक्षणम्।
१८ समाधिसुखलक्षण, समाधिसुखस्य लोकाह्लादनहेतुनिरूपणं वा।
१९ विभूतियोगस्य निरूपणम्।
२० सधानत सिद्ध्यन्तराणा कथनम्।
२१ माहेश्वर्यसिद्धिकथनम्।
२२ मन्त्रवीर्यप्रकाशनवर्णनम्।

## शाक्तोपायाख्ये द्वितीयोन्मेषे।

१ मन्त्रस्वरूपस्य निरूपणम्, आराधकचित्तस्य मन्त्रातिदेश-निरूपण वा।
२ मन्त्रसमावेशे साधकस्य निरूपणम्।
३ मन्त्रवीर्यस्य लक्षणम्।
४ अशुद्धविद्याया लक्षणपूर्वं भ्रान्तित्वकथनम्।
५ खेचरीमुद्रालक्षणपूर्वं मन्त्रमुद्रावीर्ययोरादेशनम्।
६ वल्प्राप्तावुपायकथनम्।
७ गुरुप्रसादनफलादेशनम्।
८ लब्धवीर्यस्य हविर्लक्षणम्।
९ अन्नस्य लक्षणम्।
१० अनवधाने भेदमयेदन्ताप्रथाया निरूपणम्।

# आणवोपायाख्ये तृतीयोन्मेषे।

१ अणोर्लक्षणम्।
२ अणोर्बन्धस्य लक्षणम्।
३ मायाया लक्षणम्।
४ मायाप्रशमायाणवोपायप्रदर्शनम्।
५ आणवोपायैकयोगक्षेमरूपाङ्गानां प्रदर्शनम्।
६ तत्त्वभोगसिद्धौ हेतुनिरूपणम्।
७ अविमूढस्य सहजविद्यालाभनिरूपणम्।
८ शुद्धाध्वाधिरूढस्य स्वकिरणकल्पतया विश्वस्फुरणनि०।
९ आत्मनो नर्तकत्वनिरूपणम्।
१० रङ्गस्य लक्षणम्।
११ प्रेक्षकाणां लक्षणम्।
१२ सत्त्वसिद्धेर्हेतुनिरूपणम्।
१३ सत्त्वसिद्धेः फलकथनम्।
१४ स्वातन्त्र्यस्यान्यत्रातिदेशनम्।
१५ स्वातन्त्र्यलाभेऽपि तन्निभालनस्यादेशनम्।
१६ शाक्तबललाभात् शाम्भवपदविश्रान्तेर्निरूपणम्।
१७ स्वतन्त्रपदाधिरूढस्य विश्वनिर्माणनिर्मातृत्वकथनम्।
१८ स्वातन्त्र्यव्यक्तौ पुनर्जन्माभावनिरूपणम्।
१९ लब्धसंवित्तत्त्वस्यापि प्रमादवशान्मोहननिरूपणम्।
२० शुद्धतत्त्वस्य सदोदिततायामवधानादेशनम्।
२१ त्रिपदेषु तुर्यरसासेचनोपायनिरूपणम्।
२२ वस्तुन्यभावादुत्थितोऽभिन्नसंवेदननिरूपणम्।
२३ समावेशमपरिशील्यतो व्युत्थानात्मसर्गोत्पादनि०।

२४ मध्यपदसेचने स्वभावस्य पुनरुन्मज्जनकथनम् ।
२५ शिवसारूप्यनिरूपणम् ।
२६ गृहीतशिवाहंभावस्य व्रतलक्षणम् ।
२७ जपस्य लक्षणम् ।
२८ चर्यानिरूपणम् ।
२९ चर्यावतो देशिकत्वनिरूपणम् ।
३० विश्वस्य निजविकासतानिरूपणम् ।
३१ कृत्यविशेषस्यापि निजशक्तिविकासनकथनम् ।
३२ स्वरूपस्थितेरव्यभिचरितत्वकथनम् ।
३३ पुर्यष्टकप्रमातृतोत्तीर्णतायां सुखाद्यसंस्पृष्टत्वनि० ।
३४ सुखादिविमुक्तेः फलकथनम् ।
३५ तदविमुक्तेः कर्मात्मत्वनिरूपणम् ।
३६ कर्मात्मनः स्वभावाभिव्यक्तौ यथेष्टनिर्मातृत्वनिरूपणम् ।
३७ यथेष्टनिर्मातृत्वे हेतुकथनम् ।
३८ कर्तृस्वरूपोत्तेजनाय तुर्यानुप्राणननिरूपणम् ।
३९ बाह्याभासेऽपि तुर्यानुप्राणननिरूपणम् ।
४० तुर्यपदविमर्शाभावे संसृतिनिरूपणम् ।
४१ स्वभावविश्रान्तत्वेनाबहिर्गतेरात्मारामतावर्णनम् ।
४२ मिताहन्ताध्वंसनात्कैवल्यभागितानिरूपणम् ।
४३ देहपाताभावे हेतुकथनम् ।
४४ प्राणसंबन्धेऽपि अलौकिकतानिरूपणम् ।
४५ योगफलस्य प्रदर्शनम् ।

इति शिवसूत्राणां विषयाः ॥

# अथ शिवसूत्रविमर्शिनीसूत्राणि ।

१ चैतन्यमात्मा ।
२ ज्ञानं बन्धः ।
३ योनिवर्गः कलाशरीरम् ।
४ ज्ञानाधिष्ठानं मातृका ।
५ उद्यमो भैरवः ।
६ शक्तिचक्रसंधाने विश्वसंहारः ।
७ जाग्रत्स्वप्नसुषुप्तभेदे तुर्याभोगसंभवः ।
८ ज्ञानं जाग्रत् ।
९ स्वप्नो विकल्पाः ।
१० अविवेको मायासौषुप्तम् ।
११ त्रितयभोक्ता वीरेशः ।
१२ विस्मयो योगभूमिकाः ।
१३ इच्छा शक्तिरुमा कुमारी ।
१४ दृश्यं शरीरम् ।
१५ हृदये चित्तसंघट्टाद्दृश्यस्वापदर्शनम् ।
१६ शुद्धतत्त्वसंधानाद्वाऽपशुशक्तिः ।
१७ वितर्क आत्मज्ञानम् ।
१८ लोकानन्दः समाधिसुखम् ।
१९ शक्तिसंधाने शरीरोत्पत्तिः ।
२० भूतसंधान-भूतपृथक्त्व-विश्वसंघट्टाः ।
२१ शुद्धविद्योदयाच्चक्रेशत्वसिद्धिः ।
२२ महाह्रदानुसंधानान्मन्त्रवीर्यानुभवः ।

इति प्रथमोन्मेषसूत्राणि ॥

१ चित्त मन्त्र ।
२ प्रयत्न साधक ।
३ विद्याशरीरसत्ता मन्त्ररहस्यम् ।
४ गर्भे चित्तविकासोऽविशिष्टविद्यास्वप्न ।
५ विद्यासमुत्थाने स्वाभाविके खेचरी शिवावस्था ।
६ गुरुरुपाय ।
७ मातृकाचक्रसंबोध ।
८ शरीर हवि ।
९ ज्ञानमन्नम् ।
१० विद्यासंहारे तदुत्थस्वप्नदर्शनम् ।

इति द्वितीयोन्मेषसूत्राणि ॥

---

१ आत्मा चित्तम् ।
२ ज्ञान बन्ध ।
३ कलादीना तत्त्वानामविवेको माया ।
४ शरीरे संहार कलानाम् ।
५ नाडीसंहार भूतजय भूतकैवल्य भूतपृथक्त्वानि ।
६ मोहावरणात् सिद्धि ।
७ मोहजयादनन्ताभोगात् सहजविद्याजय ।
८ जाग्रद्द्वितीयकर ।
९ नर्तक आत्मा ।
१० रङ्गोऽन्तरात्मा ।
११ प्रेक्षकाणीन्द्रियाणि ।
१२ धीवशात् सत्त्वसिद्धि ।
१३ सिद्ध स्वतन्त्रभाव ।

१४ यथा तत्र तथान्यत्र ।

१५ बीजावधानम् ।

१६ आसनस्थः सुखं ह्रदे निमज्जति ।

१७ स्वमात्रानिर्माणमापादयति ।

१८ विद्याऽविनाशे जन्मविनाशः ।

१९ कवर्गादिषु माहेश्वर्याद्याः पशुमातरः ।

२० त्रिषु चतुर्थं तैलवदासेच्यम् ।

२१ मग्नः स्वचित्तेन प्रविशेत् ।

२२ प्राणसमाचारे समदर्शनम् ।

२३ मध्येऽवरप्रसवः ।

२४ मात्रास्वप्रत्ययसंधाने नष्टस्य पुनरुत्थानम् ।

२५ शिवतुल्यो जायते ।

२६ शरीरवृत्तिर्व्रतम् ।

२७ कथा जपः ।

२८ दानमात्मज्ञानम् ।

२९ योऽविपस्थो ज्ञाहेतुश्च ।

३० स्वशक्तिप्रचयोऽस्य विश्वम् ।

३१ स्थितिलयौ ।

३२ तत्प्रवृत्तावप्यनिरासः संवेत्तृभावात् ।

३३ सुखदुःखयोर्बहिर्मननम् ।

३४ तद्विमुक्तस्तु केवली ।

३५ मोहप्रतिसंहतस्तु कर्मात्मा ।

३६ भेदतिरस्कारे सर्गान्तरकर्मत्वम् ।

३७ करणशक्तिः स्वतोऽनुभवात् ।

३८ त्रिपदाद्यनुप्राणनम्।

३९ चित्तस्थितिवच्छरीरकरणबाह्येषु।

४० अभिलाषाद्बहिर्गतिः संवाह्यस्य।

४१ तदारूढप्रमितेस्तत्क्षयाज्जीवसंक्षयः।

४२ भूतकञ्चुकी तदा विमुक्तो भूयः पतिसमः परः।

४३ नैसर्गिकः प्राणसंबन्धः।

४४ नासिकान्तर्मध्यसंयमात् किमत्र सव्यापसव्यसौषुम्नेषु।

४५ भूयः स्यात् प्रतिमीलनम्।

इति तृतीयोन्मेषसूत्राणि॥

संपूर्णोऽयं शिवसूत्रविमर्शिनी सूत्रपाठः॥

श्रीमहादेवगिर्युपत्यकास्था "महती शिला"
यत्तले उट्टङ्कितानि शिवसूत्राणि
श्रीवसुगुप्ताचार्यः समुपलेभे इत्येवं
समाम्नातवृत्तान्ता । सेयं शिला अद्यापि
"शंकर पल्" (शंकरोपलः ?) इति
नाम्ना प्रसिद्धास्ति ।

ओं नमः सच्चिदानन्दात्मने।

# अथ शिवसूत्रविमर्शिनी।

## प्रथम उन्मेषः।

रुद्रक्षेत्रज्ञवर्गः समुदयति यतो यत्र विश्रान्तिमृच्छेद्
यत्तत्त्वं यस्य विश्वं स्फुरितमयमियद्यन्मयं विश्वमेतत्।
स्वाच्छन्द्यानन्दवृन्दोच्छलदमृतमयानुत्तरस्पन्दतत्त्वं
चैतन्यं शाङ्करं तज्जयति यदखिलं द्वैतभासाद्वयात्म॥

**आसमञ्जस्यमालोच्य वृत्तीनामिह तत्त्वतः।**
**शिवसूत्रं व्याकरोमि गुर्वाम्नायविगानतः[6]॥**

---

१ रुद्रेति, प्रमातृप्रमेयमयस्य जगतः सृष्टिस्थितिसंहारकारिणो रुद्राः, पतिरूपाः। क्षेत्रज्ञाः, पशवो ब्रह्मादयः।

२ स्वाच्छन्द्येन स्वातन्त्र्येण यत् आनन्दवृन्द, सर्वशक्तिकारणभूता अकारादि-क्षकारान्ता रश्मिकलाः शक्तिमातृसमूहः, उच्छलत् अतिशयेन निर्गच्छत् यस्मात् इति बहुव्रीहिणा विमर्शरूप विशेषणम् उक्त्वा, प्रकाशरूपविशेषणम् आह अमृतेति। एतादृशानन्दस्वभावश्च असौ अनुत्तरः अनिर्वचनीयश्च असौ स्पन्दः कारणकारणम् आद्यः किञ्चिच्चल-नात्मा तत्त्व स्वरूप यस्य तत् चैतन्य जयति।

३ स्पन्दकारिकार्थम् अवलम्ब्य एतत् निरूपितम् इति व्यज्यते।

४ यद्युत इति शेषः।

५ शिवसूत्रवृत्तिरिति ग्रन्थान्तरमस्ति।

६ गुरोर्वचनस्य विशेषेण गान विगान तस्मात्। अथवा विरुद्धत्वेन

इह कश्चित्[७] शक्तिपातवशोन्मिषन्माहेश्वर-भक्त्यतिशयात् अनङ्गीकृताधरदर्शनस्थ-नाग[८]-बोध्यादि-सिद्धादेशनः शिवाराधनपरः पारमेश्वर-नानायोगिनी-सिद्धसत्संप्रदाय[९]-पवित्रितहृदयः श्रीमहादेवगिरौ महा[१०]माहेश्वरः श्रीमान् वसुगुप्तनामा गुरुरभवत् ।

कदाचिच्च असौ 'द्वैतदर्शनाधिवासितप्राये जीवलोके रहस्यसंप्रदायो[११] मा विच्छेदि' इत्याशयतः अनुजिघृक्षापरेण परमशिवेन स्वप्ने अनुगृह्य उन्मिषितप्रतिभः[१२] कृतः यथा "अत्र महीभृति महति शिलातले रहस्यम् अस्ति तत् अधिगम्य अनुग्रहयोग्येषु प्रकाशय" इति ।

---

गान ज्ञान विगान । निन्दा वा, 'विगान वचनीयत्वम्' इति कोशात् । तस्मादेव आसमञ्जस्यम् इति सम्बन्ध. । अत एव अहम् एतत् व्याकरोमि । 'वचन' इति वक्तव्ये आम्नायग्रहण प्रामाण्यार्थम् ।

७ कश्चिदिति महेश्वरानुग्रहविशेषप्राप्तमहद्दशाकः अत एव अपूर्वः ।

८ नागबोधी बौद्धाचार्यः ।

९ योगिनीभिरुक्तो यः सिद्धसत्सम्प्रदाय. तेन ।

१० ईशस्य ऐक्येन विमर्शनात् महान् ।

११ सम्प्रदायो हि परम्परोपदेशः, सोऽपि कर्णात्कर्णन्यायेन; अत एव मा विच्छेदि ।

१२ स्वप्ने उन्मिषितप्रतिभः कृत इत्यस्य अग्रिमेण इति शब्देन अन्वयः ।

प्रबुद्धश्च असौ अन्विष्यन् तां महतीं शिलां करस्पर्शनमात्रपरिवर्तनतः संवादीकृतस्वप्नां[१३] प्रत्यक्षीकृत्य, इमानि शिवोपनिषत्[१४]संग्रहरूपाणि शिवसूत्राणि ततः समाससाद[१५] । एतानि च सम्यक् अधिगम्य भट्टश्रीकल्लटाद्येषु सच्छिष्येषु प्रकाशितवान् स्पन्दकारिकाभिश्च संगृहीतवान् । तत्पारम्पर्य[१६]-प्राप्तानि स्पन्दसूत्राणि अस्माभिः स्पन्दनिर्णये सम्यक् निर्णीतानि । शिवसूत्राणि तु निर्णीयन्ते ॥

तत्र प्रथमं नरेश्वरभेदवादि[१७]-प्रातिपक्ष्येण चैतन्यपरमार्थतः शिव एव विश्वस्य आत्मा इति आदिशति—

---

१३ प्रमाणीकृतस्वप्नाम् ।

१४ शिवरहस्यागमशास्त्रसंग्रहरूपाणि ।

१५ तथा च वार्तिकम्

'श्रीमन्महादेवगिरौ वसुगुप्तगुरोः पुरा ।
सिद्धादेशात्प्रादुरासन् शिवसूत्राणि तस्य हि ॥'

इति ।

१६ तस्मात् वसुगुप्तात् गुरुपरम्परया यथायथं प्राप्तानि ।

१७ 'नरा आत्मानः पृथक् ईश्वरश्च पृथक्' इत्यादिना प्रातिपक्ष्येण वैपरीत्येन ।

## चैतन्यमात्मा[18] ॥ १ ॥

इह अचेतितस्य[19] कस्यापि सत्त्वाभावात्, चितिक्रिया सर्वसामान्यरूपा[20] इति, चेतयते इति चेतनः सर्वज्ञानक्रियास्वतन्त्रः, तस्य भावः चैतन्यं[21] सर्वज्ञानक्रियासंबन्धमयं[22] परिपूर्णं स्वातन्त्र्यम् उच्यते । तच्च परमशिवस्यैव भगवतः अस्ति; अनाश्रितान्तानां[23] तत्परतन्त्रवृत्तित्वात् । स च यद्यपि नित्यत्व-व्यापकत्वामूर्तत्वाद्यनन्तधर्मात्मा, तथापि नित्यत्वादीनाम् अन्यत्रापि[24]

---

१८ अत्र वार्तिकम्

'चैतन्यमात्मनो रूपं सिद्धं ज्ञानक्रियात्मकम् ।
तस्यानावृतरूपत्वाच्छिवत्वं केन वार्यते ॥'

इति ।

१९ अचेतितस्य अप्रकाशितस्य । प्रकाशात् बाह्यं यत् तत् अवस्तु ।

२० सर्वत्र अस्ति इत्यर्थः ।

२१ चैतन्यं चितिः, चेतन आत्मा इति राहोः शिर इतिवत् काल्पनिकम्, वस्तुत एकमेव सर्वम् । चितिक्रिया प्रकाशाभिमर्शः, तस्य भावः चैतन्यं स्वातन्त्र्यम् ।

२२ चितिक्रियासंबन्धमयम् । संबन्धस्य संबन्धिविश्रान्तस्य प्रतीतेः चितिक्रियासंबन्धमयं चैतन्यमिति ध्वजा निष्कृष्टम् ।

२३ सकलादीनां शिवतत्त्वान्तानां नास्ति तत् । शिवतत्त्वमपि वस्तुतः ततो न्यून सृज्यमानम् अनाश्रितसंज्ञम् अच्छेद्याक्लेद्याशोष्यादिधर्मकम् ।

२४ आकाशपरमाण्वादौ ।

संभाव्यत्वात्, अन्यासंभविनः स्वातन्त्र्यस्यैव उद्धुरीकारप्रदर्शनमिदम् । इत्थं धर्मान्तरप्रतिक्षेपतश्च, चैतन्यमिति भावप्रत्ययेन दर्शितम्[25] । तदेतत्[26] आत्मा; न पुनरन्यः कोऽपि भेदवाद्य-

---

२५ इत्यमिति, स्वातन्त्र्यस्य उद्धुरीकारप्रदर्शनतः । तथा च आचार्याभिनवगुप्तपादाः

'चैतन्यमिति भावान्तः शब्दः स्वातन्त्र्यमात्रकम् ।
अनाक्षिप्तविशेषं सद् आह सूत्रे पुरातने ॥'

इति ।

मात्रशब्दस्य अर्थमाह अनाक्षिप्तेति । भावप्रत्ययान्तो हि शब्दः सहचारिधर्मान्तरनिवृत्तिमेव ब्रूते । यदाहुः

'धर्मान्तरप्रतिक्षेपाप्रतिक्षेपौ तयोर्द्वयोः ॥
सङ्केतभेदस्य पदं ज्ञातृवाञ्छानुरोधतः ।
भेदोऽयमेव सर्वत्र द्रव्यभावाभिधायिनोः ॥'

इति ।

'चितिः प्रत्यवमर्शात्मा............ ।'

इति श्रीप्रत्यभिज्ञायाम् । चेतयते इत्यत्र या चितिः चितिक्रिया तस्याः प्रत्यवमर्शः स्वात्मचमत्कारलक्षणः आत्मा स्वभावः । तथा हि घटेन स्वात्मनि न चमत्क्रियते, स्वात्मा न परामृश्यते; न स्वात्मनि तेन प्रकाश्यते, न अपरिच्छिन्नतया भास्यते; ततो न चेत्यते इत्युच्यते । चैत्रेण तु स्वात्मनि अहमिति संरम्भोद्योगोल्लास-विभूतियोगात् चमत्क्रियते स्वात्मा परामृश्यते स्वात्मन्येव प्रकाश्यते, इदम् इति यः परिच्छेदः एतावद्रूपतया तद्विलक्षणीभावेन नील पीत सुख-दुःख-तच्छून्यताद्यसंख्यावभासयोगेन आभास्यते; ततश्चैत्रेण चेत्यते इत्युच्यते ।

२६ एतत् चैतन्य स्वातन्त्र्यमेव आत्मा ।

भ्युपगतो भिन्नभिन्नस्वभावः । तस्य[27] अचैतन्ये जडतया अनात्मत्वात् । चिदात्मत्वे भेदानुपपत्तेः; चितो देशकालाकारैः चिद्व्यतिरेकात् अचेत्यमानत्वेन[28] असद्भिः, चेत्यमानत्वेन तु चिदात्मभिः[29], भेदस्य[30] आधातुम् अशक्यत्वात्; चिन्मात्रत्वे तु आत्मनां स्वभावभेदस्य अघटनात्; वक्ष्यमाण[31]नीत्या अव्यतिरिक्तमलसंबन्धयोगेनापि भेदस्य अनुपपत्तेः; प्राक्[32] मलस्य सत्त्वेऽपि मुक्तिदशायां तदुपशमनात् 'नानात्मवादस्य वक्तुम् अशक्यत्वात्, मलसंस्कारसंभवे[33] वा, अनादिशिवात् कथंचित् अपकर्षे[34] वा, मुक्तशिवाः संसारिण एव स्युरिति । यथोक्तम्

'चैतन्यमेक एवात्मा ......... ..... ...'

---

२७ तस्य भिन्नभिन्नस्वभावस्य ।

२८ अप्रकाश्यमानत्वेन ।

२९ चिद्व्यतिरेकात्तु न भिन्नभिन्नस्वभावैः ।

३० कर्मणि षष्ठी । भेदस्य आधातुम् इत्यत्र भेदं कर्तुम् इत्यर्थः ।

३१ मलस्य विवेद्यत्वात् भेदशङ्कायां प्राप्तायां तस्य अव्यतिरिक्तत्वेन वक्ष्यमाणत्वात् न भेदावस्थितिः इत्यर्थः ।

३२ मुक्तेः प्राक् ।

३३ मलस्थान्तायनि ।

३४ न्यूनतायां वा । मुक्तिदशायां मलसंस्कारसंभवो वा ईदृशी न्यूनता वा भवितुं नार्हति । तदङ्गीकारे मुक्तिरेव न स्यात् किन्तु संसार एव इत्यर्थः ।

इति नानात्मवादस्य अनुपपत्तिः सूचिता[३५]।

अथ च 'आत्मा[३६] क' इति जिज्ञासून् उपदेश्यान् प्रति बोधयितुं, न शरीर-प्राण-बुद्धि-शून्यानि लौकिक-चार्वाक-वैदिक-योगाचार-माध्यमिकाद्यभ्युपगतानि आत्मा; अपि तु यथोक्तं चैतन्यम्[३७]एव । तस्यैव शरीरादि[३८]-कल्पितप्रमातृपदेऽपि अकल्पिताहंविमर्शमय-सत्यप्रमातृत्वेन स्फुरणात् । तदुक्तं श्रीमृत्युजिद्भट्टारके

'परमात्मस्वरूपं तु सर्वोपाधिविवर्जितम् ।
चैतन्यम्[३९]आत्मनो रूपं सर्वशास्त्रेषु पठ्यते ।'

इति । श्रीविज्ञानभैरवेऽपि

---

३५ आत्मनां भेदो नास्ति इति कथितम् ।

३६ लौकिकाः शरीर चार्वाकाश्च, वैदिकाः प्राणम्, योगाचारा बौद्धाश्च बुद्धिम्, माध्यमिकाः शून्यम् आत्मानम् अभ्युपगच्छन्ति । तेषां मतनिराकरणाय अथेति प्रश्नपूर्वकम् उपदिशति ।

३७ आत्मा इति शेषः ।

३८ शरीरादयश्च प्रकाशमानत्वेनैव गृहीताः ।

३९ देहादिमतः । योगवासिष्ठेऽपि

'यत्रशेषमिदं तत्त्वं नेति सम्यग्य युक्तिभिः ।
प्राप्यावशिष्टं चिन्मात्रं सोऽसि सोऽस्मीति भावय ॥'

अष्टावक्रोक्तौ च

'प्रकाशो मे निजं रूपं नातिरिक्तोऽस्म्यहं ततः ।
यदा प्रकाशते विश्वं तदाहं भास एव हि ॥'

'चिद्धर्मा[४०] सर्वदेहेषु विशेषो नास्ति कुत्रचित् ।
अतश्च तन्मयं सर्वं भावयन् भवजिज्जनः ॥'

इति । एतदेव

'यतः करणवर्गोऽयं ........................ ।'

इति कारिकाद्वयेन संगृह्य उपदेश्यान् प्रति साभिज्ञानं[४१] गुरुणा उपदिष्टं श्रीस्पन्दे ।

किंच यदेतत् चैतन्यम् उक्तं स एव आत्मा, स्वभावः, विशेषाचोदनात्[४२] भावाभावरूपस्य विश्वस्य जगतः । नहि अचेत्यमानः[४३] कोऽपि कस्यापि कदाचिदपि स्वभावो भवति । चेत्यमानस्तु स्वप्रकाशचिदेकीभूतत्वात् चैतन्यात्मैव[४४] । तदुक्तं श्रीमदुच्छुष्मभैरवे

'यावन्न वेदका एते तावद्वेद्याः कथं प्रिये ।
वेदकं वेद्यमेकं तु तत्त्वं नास्त्यशुचिस्ततः[४५] ॥'

इति । एतदेव

---

४० चिद्धर्मा आत्मा । विशेषः भेदः ।

४१ इयमेव चित् सर्वदेहेषु स्फुरतीति साभिज्ञानम् ।

४२ अस्यैव आत्मा इति विशेषो न चोदितः (अस्यैव आत्मा इति विशेषाचोदनात् विश्वस्य इति कथ्यते ) ।

४३ अचेत्यमान इति स्वभाव इत्यनेन संबध्यते । अचेत्यमानः अप्रकाश्यमानः । अविमृष्टं हि यत् तत् अवस्तु इति ।

४४ चैतन्यस्वभाव एव स्वभावः ।

४५ ततः तस्मादेव हेतोः ।

'यस्मात्सर्वमयो जीवः ............... ।'

इति कारिकाद्वयेन संगृहीतम्।

यतः चैतन्यं विश्वस्य स्वभावः तत एव तत्साधनाय प्रमाणादि वराकम् अनुपयुक्तम्[46]; तस्यापि[47] स्वप्रकाशचैतन्याधीनसिद्धिकत्वात्, चैतन्यस्य च प्रोक्तयुक्त्या केनापि आवरीतुम् अशक्यत्वात् सदा प्रकाशमानत्वात्। यदुक्तं श्रीत्रिकहृदये

'स्वपदा स्वशिरश्छायां यद्वल्लङ्घितुमीहते।
पादोद्देशे शिरो न स्यात्तथेयं वैन्दवी कला॥'

इति। यो लङ्घितुम् ईहते तस्य यथा पादोद्देशे शिरो न स्यात् तथा इयमिति अत्र संबन्धः। अनेनैव आशयेन स्पन्दे

---

४६ अनुपयुक्तमिति

'प्रकाशो नाम यश्चायं सर्वत्रैव प्रकाशते।
अनपह्नवनीयत्वात्किं तस्मिन्मानकल्पनैः॥'

इत्यभिनवगुप्तपादैस्तन्त्रालोके प्रमाणानुपपत्तेराम्नातत्वात्।

४७ प्रमाणवराकस्यापि

'प्रमाणान्यपि वस्तूनां जीवितं यानि तन्वते।
तेषामपि परो जीवः स एव परमेश्वरः॥'

इत्यभिनवगुप्तपादैश्चैतन्याधीनैव सिद्धिर्निर्दिष्टास्ति।

'यत्र स्थितम्………………………।'

इत्यादि उपक्रम्य

'……………तदस्ति परमार्थतः॥'

इत्यन्तेन महता ग्रन्थेन शङ्करात्मक-स्पन्द-तत्त्वरूपं चैतन्यं सर्वदा स्वप्रकाशं परमार्थ-सत् अस्ति इति प्रमाणीकृतम्॥ १॥

यदि जीवजडात्मनो विश्वस्य परमशिवरूपं चैतन्यमेव स्वभावः तत् कथम् अयं बन्ध इत्या-शङ्काशान्तये संहितया इतरथा च अकारप्रश्ले-षाप्रश्लेषपाठतः सूत्रम् आह—

---

४८ 'परः संनिकर्षः संहिता' इति श्लिष्टसंधिकारेण 'चैतन्यमात्मा-ज्ञानं बन्धः' इत्यकारप्रश्लेषपाठेन एकं सूत्रम्। इतरथेति पृथक् सूत्रद्वयेन अकाराप्रश्लेषात् संहिताया अभावात् इत्यारोहावरोहक्रमेण, अत्र ज्ञानम् आत्मनि अनात्माभिमानलक्षणम् अनात्मनि आत्माभिमानलक्षणं च मलम् वियुक्तसंयुक्तपाठतया दर्शितम्। तथा च आचार्याभिनवगुप्तपादाः

'चैतन्यमात्मा ज्ञानं च बन्ध इत्यत्र सूत्रयोः।
संश्लेषेतरयोगाभ्यामयमर्थः प्रदर्शितः॥
चैतन्यमिति भावान्तः शब्दः स्वातन्त्र्यमात्रकम्।
अनाक्षिप्तविशेषं सद् आह सूत्रे पुरातने॥
द्वितीयेन तु सूत्रेण क्रिया वा करणं च वा।
युक्ता तस्य चिन्मात्ररूपस्य द्वैतमुच्यते॥
द्वैतप्रथा तदज्ञानं तुच्छत्वाद्बन्ध उच्यते।
तत एव समुच्छेद्यमित्यावृत्त्या निरूपितम्॥'

इति।

## ज्ञानं बन्धः ॥ २ ॥

इह उक्तयुक्त्या चित्प्रकाशव्यतिरिक्तं न किञ्चिद् उपपद्यत इति मलस्यापि का सत्ता कीदृग् वा तन्निरोधकत्वं स्यादिति भेदवादोक्तप्रक्रियापरिहारेण

'मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम् ॥'

इति ।

'अज्ञानाद्बध्यते लोकस्ततः सृष्टिश्च संहृतिः ॥'

इति श्रीमालिनीविजय-श्रीसर्वाचारोक्तस्थित्या

---

४९ इयमुक्तिः सिद्धान्तिवादानुसारेण भेदवादिनः ।

५० मलधारकत्वं; मलाच्छादकत्वं चित्स्वरूपस्य ।

५१ भेदवादेनोक्तसिद्धान्तानुसारमेव या उक्ता चोद्यप्रक्रिया तत्परिहारेण सिद्धान्ती वक्ति ।

५२ मलमिति अज्ञानं तिमिरं पारमेश्वरस्वातन्त्र्यमात्रसमुल्लसितस्वरूपगोपनासतत्त्वम्, आत्मानात्मनोरन्यथाभिमानस्वभावमपूर्णं ज्ञानं तदाणवं मलम्, संसारेति संसारस्य 'भिन्नवेद्यप्रथात्रैव मायाख्यं....' इत्याद्युक्तस्वरूपस्य मायीयस्य मलस्य 'संसारकारणं कर्म संसाराङ्कुर उच्यते' इति नीत्या अङ्कुरः कारणं; कार्ममलं तस्य कारणम्। मायीयस्य कार्ममलं तस्य चाणवं कारणमिति भावः। अज्ञानस्य पौरुषबौद्धात्मकत्वेन द्वैविध्येऽपि इह पौरुषमेव विवक्षितं नान्यदिति संसाराङ्कुरकारणमिति विशेषणेन सूचितम्। यथा चाचार्याभिनवगुप्तपादाः

'विशेषणेन बुद्धिस्थे संसारोत्तरकालिके ।
संभावनां निरस्यैतदभावे मोक्षमब्रवीत् ॥'

इति ।

यः परमेश्वरेण स्वस्वातन्त्र्यशक्त्याभासितस्वरूपगोपनारूपया महामाया[५३]शक्त्या स्वात्मन्याकाश[५४]कल्पेऽनाश्रित[५५]प्रभृति मायाप्रमात्रन्तं संकोचोऽवभासितः स एव शिवाभेदाख्या[५६]त्यात्मकाज्ञानस्वभावोऽपूर्णम्मन्यतात्मकाणवमलसतत्त्वसंकुचितज्ञानात्मा बन्धः । यथा च व्यतिरिक्तस्य मलस्यानुपपन्नत्वं तथा अस्माभिः श्रीस्वच्छन्दोद्द्योते पञ्चमपटलान्ते दीक्षाविचारे वितत्य दर्शितम् । एष च सूत्रार्थः

'निजाशुद्ध्यासमर्थस्य............... ।'

इति कारिकाभागेन संगृहीतः । एव[५७]मात्मनि अनात्मताभिमानरूपा[५८]ख्यातिलक्षणाज्ञानात्मकं

---

५३ महामायाशक्त्येति 'मायोपरि महामाया' इत्याम्नायनीत्या माया शिवतत्त्वमेकं परित्यज्य सर्वत्र व्याप्तिः, अन्यथा मायोपरि वर्तमानत्वात्कथमनयाभेदः स्यादिति भट्टोत्पलमतम् ।

५४ स्वात्मन आकाशसाम्य स्वच्छत्वात्; मायामेघावृत्यसंकोचात् ।

५५ शिवतत्त्वात् ।

५६ शिवाभेदस्य अख्यातिरप्रथनं स्वातन्त्र्यहानिरूपम् ।

५७ एवमिति उक्तप्रकारेण, आत्मनि परमात्मनि ।

५८ 'स्वातन्त्र्यहानिर्बोधस्य...' इत्यनेन स्वरूपगोपना विज्ञानाकलेषु मलभिन्नयामुक्ता ।

ज्ञानं न केवलं बन्धो; यावद् अनात्मनि शरीरादौ आत्मताभिमानात्मकम् अज्ञानमूलं[५९] ज्ञानमपि बन्ध एव । एतच्च

'परामृतरसापाय················ ।'

इति कारिकया संगृहीतम् ।

एवं चैतन्यशब्देनोक्तं यत्किञ्चित् स्वातन्त्र्यात्मकं रूपं; तत्र चिदात्मन्यपि स्वातन्त्र्याप्रथात्मविज्ञानाकलवद् अपूर्णम्मन्यतामात्रात्मना रूपेण; स्वातन्त्र्येऽपि देहादौ[६०] अबोधरूपेण अनात्मन्यात्मताभिमानात्मना रूपेण; द्विप्रकारमाणवमलम् अनेन सूत्रेण सूत्रितम् । तदुक्तं श्रीप्रत्यभिज्ञायाम् ।

'स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता ।
द्विधाणवं मलमिदं स्वस्वरूपापहानितः ॥'

इति ॥ २ ॥

किम् ईदृगाणवमलात्मैव बन्धः? न इत्याह—

**योनिर्वर्गः[६१] कलाशरीरम् ॥ ३ ॥**

---

५९ स्वातन्त्र्याभिमाने च 'स्वातन्त्र्यस्याप्यबोधता' इत्येव रूपम् ।

६० देहादौ मत्स्वातन्त्र्य वत्र ।

६१ योनिवर्गः मायामलम्, कला कार्ममलम् ।

वन्ध इत्यनुवर्तते, योऽयं योनेर्विश्वकारणस्य मायायाः संवन्धी वर्गः साक्षात् पारम्पर्येण च; तद्धेतुको देहभुवनाद्यारम्भी किञ्चित्कर्तृताद्यात्मककलादिक्षित्यन्तस्तत्त्वसमूहः; [६२] तद्रूपं मायीयम्, तथा [६३] कलयति स्वस्वरूपावेशेन तत्तद् वस्तु परिच्छिनत्तीति [६४] कला व्यापारः; शरीरं स्वरूपं यस्य तत् कलाशरीरं कार्मं मलमपि वन्ध इत्यर्थः । एतदपि

'निजाशुद्ध्यासमर्थस्य कर्तव्येष्वभिलाषिणः ।'

इत्यनेनैव संगृहीतम् । यथा चैतत् तथा अस्मदीयात् स्पन्दनिर्णयादवबोद्धव्यम् । एषां च [६५] कलादीनां किञ्चित्कर्तृत्वादिलक्षणं स्वरूप[६६] माणवमलभित्तिलग्नं पुंसामावरकतया [६७] मलत्वेन सिद्धमेव । यदुक्तं श्रीमत्स्वच्छन्दे

६२ स एव मायामल इति मलबन्धः ।

६३ कलयति स्वरूपमावेशयति ।

६४ वस्तूनि; या तत्र तत्र प्रमातरि स्वकलनमेव कला ।

६५ तत्त्वानाम्, आदिना विद्याकालरागनियत्यादीनि गृह्यन्ते ।

६६ वस्तुतः आणवमेवेतरयोर्मलयोर्मूलभूतमित्यर्थः ।

६७ कलादीनि तत्त्वानि च मलान्येवेत्याशयः ।

'मलैर्[68]ध्वस्तचैतन्यं कलाविद्यासमाश्रितम् ।
रागेण रञ्जितात्मानं कालेन [69]कलितं तथा ॥
नियत्या यमितं भूयः पुंभावेनोपबृंहितम् ।
प्रधानाशयसंपन्नं गुणत्रयसमन्वितम् ॥
बुद्धितत्त्वसमासीनमहङ्कारसमावृतम् ।
मनसा बुद्धिकर्माक्षैस्तन्मात्रैः स्थूलभूतकैः ॥'

**इति । [70]कार्ममलस्याप्यावरक[71]त्वं श्रीमालिनीविजये प्रदर्शितम्**

'धर्माधर्मात्मकं कर्म सुखदुःखादिलक्षणम् ।'

**इति । तदेतत् मायीयं कार्मं च मलम्**

---

६८ 'स्वातन्त्र्यहानिर्बोधस्य' इत्याद्युक्तलक्षणेनाणवमलेनैव प्रथमं चैतन्यसंकोचः संजायते ।

६९ कलित परिच्छिन्नम् । यमित नियमितम् । पुंभावेन पुरुषतत्त्वेन । गुणेति गुणत्रयविभागेन । बुद्धिकर्मेति, बुद्धीन्द्रियैः कर्मेन्द्रियैश्च । तन्मात्रैः, शब्दादिभि. । स्थूलभूतकैः, क्षित्यन्तैः ।

७० इयत्पर्यन्तमाणवमायीयमलद्वयमेव प्रोक्तं भवतीत्याशयेनाह 'कार्मेति' यतः 'गोपितस्वमहिम्नोऽस्य संमोहाद्विस्मृतात्मनः ।
य. सकोचः स एवास्य आणवो मल उच्यते ॥
ततः पट्कञ्चुकव्याप्तिविलोपितनिजस्थितेः ।
भूतदेहे स्थितिर्यासौ मायीयो मल उच्यते ॥
यदन्त.करणाधीनारब्धिकर्मेन्द्रियादिभिः ।
यद्दिव्यं क्रियते कार्मं मलमेतस्य तन्मतम् ॥'
इत्यप्यागमनये ।

७१ ज्योतिष्टोमयाज्यहं स्वर्गगन्ता, अब्रह्मकारी नरकगन्ता, इति द्विरूपं कार्ममावरकमेव ।

'भिन्नवेद्यमथात्रैव[२] मायाख्यं जन्मभोगदम् ।
कर्तर्यबोधे कार्मं च.................॥'

इति श्रीप्रत्यभिज्ञायाम् आणवमलभित्तिकं संकुचित[७३]विशिष्टज्ञानतयैवोक्तम् ॥ ३ ॥

अथ कथमस्याज्ञानात्मकज्ञान-योनिवर्ग-कलाशरीररूपस्य त्रिविधस्य मलस्य बन्धकत्वमित्याह—

## ज्ञानाधिष्ठानं मातृका ॥ ४ ॥

यदेतत् त्रिविधमलस्वरूपम् अपूर्णम्मन्यता-भिन्नवेद्यप्रथा-शुभाशुभवासनात्मकं त्रिविधं ज्ञानरूपमुक्तम्; तस्य आदिक्षान्त[७४]रूपा अज्ञाता माता मातृका[७५] विश्वजननी तत्तत्संकुचितवेद्याभासात्मनो ज्ञानस्य 'अपूर्णो[७६]ऽस्मि, क्षामः स्थूलो वास्मि, अग्निष्टोमयाज्यस्मि, इत्यादितत्तदविकल्पकसविकल्पकावभासपरामर्शमय[७७]स्य तत्त-

७२ अत्र आणवे ।

७३ सर्वे मला हि संकुचितविशिष्टज्ञानरूपा एव ।

७४ अकारादिक्षकारान्तरूपा ।

७५ अज्ञाता माता मातृका, अज्ञाते कः प्रत्ययः । इयमेव बन्धयित्री, ज्ञाता चेत् सिद्धिप्रदायिका ।

७६ 'अपूर्णोऽस्मि' इत्यादिना आणवमायीयकार्ममलान्युदाह्रियन्ते ।

७७ स्थूलसूक्ष्मशब्दपरामर्शमयस्य ज्ञानस्य ।

वाचकशब्दानुवेध[७८]द्वारेण शोक-स्मय-हर्ष-रागादिरूपतामादधाना

'कैं[७९]रन्ध्रचितिमध्यस्था ब्रह्मपाशावलम्बिकाः।
पीठेश्वर्यो महाघोरा मोहयन्ति मुहुर्मुहुः॥'

इति श्रीतिमिरोद्घाटप्रोक्तनीत्या वर्ग[८०]-कलाद्यधिष्ठातृब्राह्म्यादिशक्तिश्रेणी[८१]शोभिनी श्रीसर्ववीराद्यागमप्रसिद्धलिपिक्रमसंनिवेशोत्थापिका अम्बा-ज्येष्ठा-रौद्री-वामा[८२]ख्यशक्तिचक्रचुम्बिता शक्तिरधिष्ठात्री, तदधिष्ठानादेव हि अन्तर[८३]ऽभेदानुसंधिवन्ध्यत्वात् क्षणमपि अलब्धविश्रान्तीनि बहिर्मुखान्येव ज्ञानानि, इति युक्तैव एषां[८४] बन्धकत्वोक्तिः। एतच्च

---

७८ 'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।' इति–स्थिता शब्दाभिन्नमेव ज्ञानम्।

७९ ये व्योम्नि चिद्गगने या चितिः तन्मध्यस्थाः चिच्छक्तिरूपा एव। वस्तुतः ब्रह्मपाश एव दुर्भेद्यपरमेयत्वात्। आत्याग्रा घोरतराः।

८० वर्गा अष्टौ, कला निवृत्त्यादयः। आदिना पदस्थान.।

८१ अघोर-घोर घोरतररूपिका शक्तिश्रेणी।

८२ वामा एव पराशक्तिः, दयांवीता मातृकाशक्तिरित्यर्थः।

८३ अन्त पूर्णाहन्ताया योऽभेदानुसंधिः तदभेदपरामर्शेनशून्य नात्।

८४ ज्ञानानाम्।

'शब्दराशिसमुत्थस्य ............... ।'

इति कारिकया,

'स्वरूपावरणे चास्य शक्तयः सततोत्थिताः ।'

इति च कारिकया संगृहीतम् ॥ ४ ॥

अथ एतद्बन्धप्रशमोपायमुपेयविश्रान्तिसतत्त्वं[85] मादिशति—

## उद्यमो भैरवः ॥ ५ ॥

योऽयं प्रसर[86]द्रूपाया विमर्शमय्याः संविदो झगिति उच्छलन[87]ात्मकपरप्रतिभोन्मज्जनरूप उद्यमः स एव सर्वशक्तिसाम[88]रस्येन अशेषविश्वभरितत्वात् सकलकल्पनाकुलालंकवलन[89]मयत्वाच्च भैरवो[90] भैरवात्मकस्वस्वरूपाभिव्यक्तिहे-

---

८५ सतत्त्वं सपरमार्थम् ।

८६ विश्वमयः प्रसरः विश्वोत्तीर्णश्च संविद् इत्यनेन अनुत्तररूपस्य योऽयं विमर्श आनन्दरूपः स उन्मेषः, स्वरूपविकास इत्येव रूपो विमर्शः ।

८७ शक्तिपातवशादाकस्मिकी स्फुरत्तात्मकस्वरूपप्रथा नवनवा ।

८८ समरसतापादनेन क्रोडीकारेणैकात्म्येन मयूराण्डरसवत् ।

८९ संस्कारशेषस्यापि ।

९० घृतमायुरितिवत् उद्यमस्य भैरवस्वरूपावभासहेतुत्वात् उद्यम एव भैरव इति । भैरव इति भरणरवणवमनरूपः भीरूणामभयमिति व्युत्पत्त्या संसारिणामभयदः । भीर्भयं संसारजातः तया जनितो रव आक्रन्दः भीरवः

तुत्वात् भक्तिभाजाम् अन्तर्मुखैतत्तत्त्वावधानधनानां जायते, इत्युपदिष्टं भवति । उक्तं च श्रीमालिनीविजये

'अकिंचिच्चिन्तकस्यैव गुरुणा प्रतिबोधतः ।
जायते यः समावेशः शाम्भवोऽसावुदीरितः ॥'

इति । अत्र हि 'गुरुणा प्रतिबोधतः' इत्यत्र

---

ततो जातः तदाक्रन्दवता स्फुरित अस्यैव भीरवस्य संसारभयविमर्शनस्य अय शक्तिपातवशेन उत्थापकः । भानि नक्षत्राणि ईरयतीति भीरः कालः त वायन्तीति भीरवाः कालग्राससमाधिरसिका योगिनस्तेषामयमित्यान्तरः स्वभावः । भिये पशुजनत्रासाय रव शब्दराशिसमुत्थाकारादिकलाविमर्शो यासा खेचर्यादिसविद्देवीना ता भीरव. तासामय स्वामी भैरवः । तथा भैरवो भीषणः संसारवृत्तविघटनपर एवमागमेषु निरुक्तत्वात् श्रीबृहस्पतिपादैः, शिवतनावन्वर्थव्याख्यातस्वरूपत्वाच्च ।

११ यदाहुराचार्याभिनवगुप्तपादाः

'अकिञ्चिच्चिन्तकस्येति विकल्पानुपयोगिता ।
तथा च झटिति ज्ञेयसमापत्तिर्निरूप्यते ॥
स कथ भवतीत्याह गुरुणातिगरीयसा ।
ज्ञेयाभिमुखबोधेन द्राक्प्ररूढत्वशालिना ॥
तृतीयार्थे तसि व्याख्या वा वैयधिकरण्यत ।
आवेशश्चास्वतन्त्रस्य स्वतद्रूपनिमज्जनात् ॥
परतद्रूपता शम्भोराद्या शक्त्यविभागिनः ।
तेनायमत्र वाक्यार्थो, विज्ञेय प्रोन्मिषत्स्वयम् ॥
न विना निश्चयेन द्राङ् मातृदर्पणबिम्बितम् ।
मातारमधरीकुर्वन् स्वा विभूतिं प्रदर्शयन् ।
आस्ते हृदयनैर्मल्यातिशये तारतम्यत ॥'

इति ।

गुरुतः स्वस्मात् प्रतिबोधतः इत्यस्यार्थो गुरुभिरादिष्टः । श्रीस्वच्छन्देऽपि उक्तम्

'आत्मनो भैरवं रूपं भावयेद्यस्तु पूरुषः ।
तस्य मन्त्राः प्रसिध्यन्ति नित्ययुक्तस्य सुन्दरि ॥'

इति । भावनं हि अत्र अन्तर्मुखोद्यन्तृतापद[१३]विमर्शनमेव । एतच्च

'एकचिन्ताप्रसक्तस्य यतः स्यादपरोदयः ।
उन्मेषः स तु विज्ञेयः स्वयं तमुपलक्षयेत् ॥'

इत्यनेन संगृहीतम् ॥ ५ ॥

एवं झगिति परप्रतिभोन्मेषावष्टम्भोपायिकां भैरवसमापत्तिम् अज्ञानबन्धप्रशमैकहेतुं प्रदर्श्य; एतत्परामर्शप्रकर्षाद्[१४] व्युत्थानमपि प्रशान्तभेदावभासं भवतीत्याह—

शक्तिचक्रसंधाने विश्वसंहारः ॥ ६ ॥

योऽयं परप्रतिभोन्मज्जनात्मोद्यन्तृतास्वभावो भैरव उक्तः अस्यैव अन्तर्लक्ष्यबहिर्दृष्ट्यात्मतया निःशेषशक्तिचक्रक्रमाक्रमाक्रामिणी[१५] अतिक्रा-

१२ भ्रमरकीटन्यायेन तन्मय एव परिशिष्यते इति ।
१३ उद्यन्तुर्भावः उद्यन्तृता तस्य पदमुन्मकर्तृत्वम् ।
१४ परप्रतिभाभ्यासदार्ढ्यात् ।
१५ क्रमः सृष्टिस्थितिसंहाराणामाभासविच्छेदनस्वभावः, अक्रमः युग-

न्तक्रमाक्रमातिरिक्तारिक्ततदुभयात्मतया[१६]पि अभिधीयमानापि अनेतद्रूपा अनुत्तरा परा स्वातन्त्र्यशक्तिः काप्यस्ति। यया स्वभित्तौ मद्युल्लासात् प्रभृति परप्रमातृविश्रान्त्यन्तं श्रीमत्सृष्ट्या[१७]दिशक्तिचक्रस्फारणात्मा क्रीडेयमादर्शिता। तस्यैतदाभासितस्य शक्तिचक्रस्य रहस्याम्नायाम्नातनीत्या यत्संधानं यथोचितक्रमविमर्शनं[१८] तस्मिन् सति; कालाग्न्यादेश्वरमकलान्तस्य विश्वस्य संहारो; देहात्मतया बाह्यतया च अवस्थितस्यापि सतः परसंविदग्निसाद्भावो भवतीत्यर्थः। उक्तं च श्रीभर्गशिखायाम्

'मृत्युं च कालं च कलाकलापं
विकारजालं प्रतिपत्तिसात्म्यम्।

---

पक्षेपामवभासः, तौ क्रमाक्रमावाक्रामतीति क्रमाक्रमाक्रामिणी। यदुक्तं ज्ञानगर्भे

'क्रमनयसमाश्रयव्यतिकरेण या संततं
क्रमनिजवपुर्विदधती विभात्युच्चकैः।
क्रमैकवपुरक्रमप्रकृतिरेव या शोभते
करोमि हृदि तामहं भगवतीं परां संविदम्॥'

इति सृष्ट्यादिक्रमक्रमरूपतामवभासयन्त्यपि तदतिवर्तनेन परिस्फुरन्ती क्रमाक्रमवपुः परैव अनाख्या पारमेश्वरी संवित्परामृष्टा भवत्वनेनेत्यर्थः।

१६ उभयात्मता पूर्णरूपता।

१७ सृष्ट्यादिशक्तिचक्रस्य पराशक्तिरूपत्वमेवास्तीत्यर्थः।

१८ मकारविमर्शान्तर्गत एव क्रमो यत्र।

ऐकात्म्येनानात्म्यविकल्पजातं[९९]
तदा स सर्वं कवलीकरोति ॥'

इति । श्रीमद्वीरावलावपि

'यत्र[१००] सर्वे लयं यान्ति दह्यन्ते तत्त्वसंचयाः ।
तां चितिं पश्य कायस्थां कालानलसमत्विषम् ॥'

इति । श्रीमन्मालिनीविजयेऽपि

'उच्चाररहितं वस्तु[१०१] चेतसैव विचिन्तयन् ।
यं समावेशमाप्नोति शाक्तः सोऽत्राभिधीयते ॥'

इत्युक्त्या एतदेव भङ्ग्या निरूपितम् । एतच्च सद्गुरुचरणोपासनया[१०२] अभिव्यक्तिमायातीति नाधिकं[१०३] उन्मीलितम् ।

---

९९ भिन्नानामात्मनामैकात्म्यम् ।

१०० सर्वे तत्त्वसंचयाः संस्कारशेषतयापि लीयन्ते इति । चितिं महाश्मशानम्,

१०१ वस्तु परावाग्रूपम्, अत एवानुच्चारम्, उच्चारास्पदं हि वैखरी। विचिन्तयन्निति शक्तिचक्रं वेद्यप्रकाशमनन्तरमेव झगिति विमृशन्, तादृग्वेद्यविमर्शनमेव शाक्त उपाय इत्यर्थः ।

१०२ यथोक्तं केनापि

'शैत्यत्वमभ्युपगता हृदये न रोद्धुं
शक्ता प्रमूढमनसामुपदेशवाचः ।
आर्द्रत्वमादधति किं नलिनीदलाना
श्लिष्टा निरन्तरतयापि नभोऽम्बुधारा ॥'

इत्यतोऽयमुपायः सद्गुरूपास्त्यैवाभिव्यक्तिमायातीत्यलमायासदायिना विस्तरेण ।

१०३ शक्तिचक्रानुसंधानं नाधिक्येन प्रकाशितमिति भावः ।

एतदेव

'यस्योन्मेषनिमेषाभ्यां............... ।'

इति,

'यदा त्वेकत्र संरूढः...... .......... ।'

इति च प्रथमचरमश्लोकाभ्यां संगृहीतम्॥ ६॥

एवमुपसंहृतविश्वस्य न समाधिव्युत्थानभेदः कोऽपि इत्याह—

## जाग्रत्स्वप्नसुषुप्तभेदे तुर्याभोगसंभवः॥७॥

समनन्तरनिरूपयिष्यमाणानां जाग्रत्स्वप्नसुषुप्तानां भेदे नानारूपे पृथक्त्वावभासे 'उद्यमो भैरवः' (१–५) इति लक्षितस्य[104] स्फुरत्तात्मनः सर्वदशानुस्यूतस्य तुर्यस्य य आभोगश्चमत्कारः तस्य संभवो नित्यमेव तुर्यचमत्कारमयत्वं प्रोक्तमहायोगयुक्तस्य भवतीत्यर्थः। केचित् संभव इत्यत्र[105] संविदिति स्पष्टार्थं पठन्ति। एतच्च

'यथेन्दुः[106] पुष्पसंकाशः समन्तादवभासते।
आह्लादनसमूहेन जगदाह्लादयेत्क्षणात्॥

---

१०४ उद्यमस्यालोचितस्य।

१०५ तुर्याभोगसंविदिति।

१०६ अर्वाचीनो पाठोऽस्तु विपक्षे वा, न तस्य प्रमाणान्तरपरिच्छेदः तुर्याभोगमयत्वात्, यथेन्दोः पुष्पकाशस्य जगदाह्लादनं, सर्वत्र समतयाह्ला-

तद्वद्देवि महायोगी यदा पर्यटते महीम् ।
ज्ञानेन्दुकिरणैः सर्वैर्जगच्चित्रं समस्तकम् ॥
आह्लादयेत्समन्तात्तदवीच्यादिशिवान्तकम् ।'

इत्यादिना श्रीचन्द्रज्ञाने जागरादौ तुर्याभोगमयत्वं महायोगिनो दर्शितम् । स्पन्दे तु

'जागरादिविभेदेऽपि.................. ।'

इति कारिकया संगृहीतम् ॥ ७ ॥

एतज्जाग्रदादित्रयं सूत्रत्रयेण लक्षयति—

**ज्ञानं जाग्रत् ॥ ८ ॥**

**स्वप्नो विकल्पाः ॥ ९ ॥**

**अविवेको मायासौषुप्तम् ॥ १० ॥**

सर्वसाधारणार्थविषयं[१०७] बाह्येन्द्रियजं ज्ञानं लोकस्य जाग्रत् जागरावस्था । ये तु मनोमा-

---

दनात्, जगदाह्लादनं च बाह्यचन्द्रवत् स्वरूपस्फूर्तिविभवात्मकं स्फुटमेवेतीयान् अर्थोऽत्र विवक्षितः ।

१०७ एकस्यैव घटस्य निर्विकल्पसविकल्पकतया प्रमितिविषयीभवनं जाग्रत्स्वप्नौ, तस्यैव स्वरूपानभिज्ञानं सौषुप्तम् । अन्यत्र तु

'अक्षैर्योऽर्थग्रहः पुंसां तज्जाग्रदिति कथ्यते ।
यत्तैर्विनार्थस्मरणं मनसा स्वप्नलक्षितम् ।
यत्रार्थस्मरणे न स्यात्तत्सौषुप्तमुदाहृतम् ॥'

इति ।

त्रजन्या असाधारणार्थविषया विकल्पाः स एव स्वप्नः स्वप्नावस्था; तस्य एवं-विधविकल्पप्रधानत्वात् । यस्तु अविवेको विवेचनाभावोऽख्यातिः; एतदेव मायारूपं मोहमयं सौषुप्तम् । सौषुप्तं लक्षयता प्रसङ्गात् उच्छेद्याया मायाया अपि स्वरूपमुक्तम् ।[108]

इत्थमपि च ईदृशेनाप्यनेन लक्षणेन तिसृष्वपि जागरादिदशासु त्रैरूप्यमस्तीति दर्शितम् । तथा चात्र यद्यत् स्वप्नदशोचितं प्रथममविकल्पकं ज्ञानं सा जागरा । ये तु तत्र विकल्पाः स स्वप्नः । तत्त्वाविवेचनं सौषुप्तम् । सौषुप्ते यद्यपि विकल्पा न संचेत्यन्ते; तथापि तत्प्रविविक्षायां[109] तथोचितजाग्रज्ज्ञानमिव तदनन्तरं संस्कारकल्पविकल्परूपस्तदुचितः स्वप्नोऽप्यस्त्येव ।

किं च योग्यभिप्रायेण प्रथमं तत्तद्धारणारूपं[110] ज्ञानं जाग्रत्, ततः तत्प्रत्ययप्रवाहरूपा वि-

१०८ मायास्वरूपं तु सर्वत्र मुख्यतया मोहमयत्वेन निरूपितम् ।

१०९ तत्र सौषुप्ते प्रवेष्टुमिच्छायाम् ।

११० धारणा ज्ञानप्रवाहरूपा, अहं वायुरह वायुरह चन्द्र इत्यादि-प्रत्ययरूप प्रवाह ।

कल्पः स्वप्नः, ग्राह्यग्राहकभेदासंचेतनरूपश्च समाधिः सौषुप्तम्, इत्यप्यनया वचोयुक्त्या दर्शितम् । अत एव श्रीपूर्वशास्त्रे जागरादीनां परस्परानुवेधकृतो[111] योग्यभिप्रायेणापि

'.........अबुद्धं बुद्धमेव च ।
प्रबुद्धं सुप्रबुद्धं च......... ॥'

इत्यादिना[112] भेदो निरूपितः ॥ ८ ॥ ९ ॥ १० ॥

एवं लोकयोग्यनुसारेण व्याख्याते जागरादित्रये शक्तिचक्रसंधानाद्विश्वसंहारेण यस्य तुर्याभोगमयत्वमभेदव्याप्त्यात्मकं स्फुरति; स तद्वाराधिरोहेण तुर्यातीतं पूर्वोक्तं चैतन्यमाविशन्—

## त्रितयभोक्ता वीरेशः ॥ ११ ॥

एतज्जागरादित्रयं शक्तिचक्रानुसंधानयुक्त्या तुर्यानन्दाच्छुरितं यः तत्परामर्शानुप्रवेशप्रकर्षाद्विगलितभेदसंस्कारमानन्दरसप्रवाहमयमेव पश्यति; स त्रितयस्यास्य भोक्ता चमत्कर्ता ।

---

१११ जाग्रति त्रैरूप्यं, स्वप्ने त्रैरूप्यं, सौषुप्ते त्रैरूप्यमित्यनुवेधनम् । यथा जागरेऽपि जाग्रत्स्वप्नसुषुप्तानि, एवं स्वप्नेऽपि जाग्रत्स्वप्नसुषुप्तानि, सुषुप्ते च जाग्रत्स्वप्नसुषुप्तानि, किंतु सुषुप्तरूपमनतिक्रान्तानि तादृशानीत्यर्थः ।

११२ अबुद्धमित्यादिना जाग्रत्स्वप्नसुषुप्ततुर्याणि कथ्यन्ते ।

तत एव

'त्रिषु[११३] धामसु यद्भोग्यं भोक्ता यश्च प्रकीर्तितः ।
वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यते ॥'

इति नीत्या निःसपत्नस्वात्मसाम्राज्योऽयं परमानन्दपरिपूर्णो भवभेदग्रसनप्रवणानां वीराणामिन्द्रियाणामीश्वरः स्वामी; श्रीमन्थान[११४]भैरवसत्तानुप्रविष्टो महाम्नायेपूच्यते। यस्तु एवं-विधो न भवति; स जागराद्यवस्थाभिर्भुज्यमानो लौकिकः पशुरेव। योग्यपि इमां धारामनधिरूढो न वीरेश्वरः; अपि तु मूढ एवेत्युक्तं[११५] भवति।

---

११३ त्रिषु धामसु जागरादिषु ग्राह्यग्राहकयुगल परामृशति यः; स भोगनिरतोऽपि कर्मभिर्न लिप्यते जलस्थपद्मपत्रवदित्यर्थः ।

११४ मथ्नाति तत्तद्वेद्य स्वात्मान्तर्लीनं कृत्वा पिण्डीकृत्य उत्थापयतीति मन्थानाभिधानः स्वच्छन्दभैरव इत्यर्थः ।

११५ यदाहुः

'विना स्वभावानुभवेन पुंसः
कैवल्यमुत्कान्तिबलाद्यदि स्यात् ।
अत्रापि पक्षे ननु मोक्षभाक्स
उद्बन्धनं यत्कुरुते प्रमूढः ॥'

तथा

'विदेहा अपि बध्यन्ते प्रलये गुणवासिताः ।
शरीरिणोऽपि मुच्यन्ते विशुद्धज्ञानसंश्रयात् ॥'

ज्ञानगर्भेऽपि

'मयि स्थितमिदं जगत् सकलमेव सर्वत्र वा
स्थितोऽहमिति धारणाद्वितयभावनावेशतः ।

एतच्च

'योगी स्वच्छन्दयोगेन स्वच्छन्दगतिचारिणा ।
स स्वच्छन्दपदे युक्तः स्वच्छन्दसमतां व्रजेत् ॥'

इत्यादिना श्रीस्वच्छन्दादिशास्त्रेषु वितत्य दर्शितम् । स्पन्देऽपि

'तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी ।'

इति कारिकया संगृहीतमेतत् ॥ ११ ॥

---

जगत्रितयनाथतामतिचिरेण समाप्यते
नृभिस्तव सपर्यया दलितकिल्बिषोपप्लवैः ॥'

इति ।

११६ परतत्त्वद्वयस्थित्यात्मना स्वात्मप्रतिष्ठया स्वच्छन्दगत्या चरत्यवश्यं योऽयं; परतत्त्वैक्यप्रतीतिमयत्वात् स्वच्छन्दशब्दवाच्यो महायोगः, तेन श्रीस्वच्छन्दभैरवस्य पदे धाम्नि युक्तोऽभिनिविष्टः स्यात् स तत्साम्यमेति ।

११७ तस्य तत्त्वस्य उपलब्धिः ज्ञानम्, सततं सर्वावस्थासु यदुक्तं ज्ञानगर्भे

'बहिष्करणबुद्ध्यहङ्कृतिमनःसुषुम्नाश्रयाच्-
चतुर्दशसु चण्डिके पथिषु येन येन मजेत् ।
कला शिवनिकेतन जननि तत्र सा तादृशी
दशोदयति दुर्लभा जगति या सुरैरप्यहो ॥'

इति । शिवनिकेतन, शिवस्य वेधस्य निकेतनमाश्रय ।

११८ त्रिषु पदेषु जागरादिषु भोक्तृरूपेण न व्यभिचरतीति, तुर्ये तु निर्भ्रान्तैव । उक्तं च

'काप्यवस्था न ते सास्ति यस्यां सविन्न वर्तते ।
तेन चिद्घनमेव त्वा योगिनः पर्युपासते ॥'

इति ।

किमस्य महायोगिनः काश्चित् तत्त्वाधिरोहप्रत्यासन्ना[११९] भूमिकाः सन्ति? याभिस्तत्त्वोर्ध्ववर्तिनी भूमिर्लक्ष्यते। सन्ति, इत्याह—

## विस्मयो योगभूमिकाः ॥ १२ ॥

यथा सातिशयवस्तुदर्शने कस्यचित् विस्मयो भवति तथा अस्य महायोगिनो नित्यं तत्तद्वेद्यावभासामर्श[१२०]भोगेषु निःसामान्यातिशयनवनवचमत्कारचिद्घनस्वात्मावेशवशात् [१२१]स्मेरस्मेरस्तिमितविकसितसमस्तकरणचक्रस्य यो विस्मयोऽनवच्छिन्नानन्दे स्वात्मनि अपरितृप्तत्वेन मुहुर्मुहुराश्चर्यायमाणता; ता एव योगस्य परतत्त्वैक्यस्य संबन्धिन्यो भूमिकाः; तदध्यारोहविश्रान्तिसूचिकाः परिमिता भूमयो, न तु [१२२]कन्दविन्द्वाद्यनुभववृत्तयः। तदुक्तं श्रीकुलयुक्तौ

१११ अधिरोहणस्य भूमिका. स्थानानि, याभिः षट्त्रिंशत्तत्त्वोपरिष्ठं स्थानं लक्ष्यते इति वाक्यार्थः।

१२० एतद्रूपचर्वणेषु सामान्याहन्ताविश्रमणेषु।

१२१ स्मेरस्मेरेति साश्चर्यनिःस्पन्दम्।

१२२ कन्दः मूलाधारः, विन्दुर्भ्रूमध्यस्थानम्।

एतच्च

'योगी स्वच्छन्दयोगेन स्वच्छन्दगतिचारिणा ।
स स्वच्छन्दपदे युक्तः स्वच्छन्दसमतां व्रजेत् ॥'

इत्यादिना श्रीस्वच्छन्दादिशास्त्रेषु वितत्य दर्शितम् । स्पन्देऽपि

'तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी ।'

इति कारिकया संगृहीतमेतत् ॥ ११ ॥

---

जगत्त्रितयनाथतामतिचिरेण संप्राप्यते
नृभिस्तव सपर्यया दलितकिल्बिषोपप्लवैः ॥'

इति ।

११६ परतत्त्वधृत्यवस्थित्यात्मना स्वात्मप्रतिष्ठया स्वच्छन्दगत्या चरत्यवश्यं योऽयं; परतत्त्वैक्यप्रतीतिमयत्वात् स्वच्छन्दशब्दवाच्यो महायोगः, तेन श्रीस्वच्छन्दभैरवस्य पदे धाम्नि युक्तोऽभिनिविष्टः स्यात् स तत्साम्यमेति ।

११७ तस्य तत्त्वस्य उपलब्धिः ज्ञानम्, सततं सर्वावस्थासु यदुक्तं ज्ञानगर्भे

'बहिष्करणवृत्त्यहंकृतिमनःसुषुम्नाश्रयाच्-
चतुर्दशसु चण्डिके पथिषु येन येन व्रजेत् ।
कला शिवनिकेतन जननि तत्र सा तादृशी
दशोदयति दुर्लभा जगति या सुरैरप्यहो ॥'

इति । शिवनिकेतन; शिवस्य वेद्यस्य निकेतनमाश्रयः ।

११८ त्रिषु पदेषु जागरादिषु भोक्तृरूपेण न व्यभिचरतीति, तुर्ये तु निर्भ्रान्तैव । उक्तं च

'काप्यवस्था न सा सास्ति यस्यां संविन्न वर्तते ।
तेन चिद्गगनेर त्वां योगिनः पर्युपासते ॥'

इति ।

किमस्य महायोगिनः काश्चित् तत्त्वाधिरोह-प्रत्यासन्ना[119] भूमिकाः सन्ति? याभिस्तत्त्वोर्ध्ववर्तिनी भूमिर्लक्ष्यते। सन्ति, इत्याह—

## विस्मयो योगभूमिकाः ॥ १२ ॥

यथा सातिशयवस्तुदर्शने कस्यचित् विस्मयो भवति तथा अस्य महायोगिनो नित्यं तत्तद्वेद्यावभासामर्शाभोगेषु[120] निःसामान्यातिशयनवनवचमत्कारचिद्घनस्वात्मावेशवशात् स्मेरस्मेर[121]स्तिमितविकसितसमस्तकरणचक्रस्य यो विस्मयोऽनवच्छिन्नानन्दे स्वात्मनि अपरितृप्तत्वेन मुहुर्मुहुराश्चर्यायमाणता; ता एव योगस्य परतत्त्वैक्यस्य संबन्धिन्यो भूमिकाः; तदध्यारोहविश्रान्तिसूचिकाः परिमिता भूमयो, न तु कन्दविन्द्वाद्यनुभववृत्तयः[122]। तदुक्तं श्रीकुलयुक्तौ

१११९ अधिरोहणस्य भूमिका स्थानानि, याभिः षट्त्रिंशत्तत्त्वोपरिस्थ स्थानं लक्ष्यते इति वाक्यार्थः।

१२० एतद्रूपचर्वणेषु सामान्याहन्ताविश्रमणेषु।

१२१ स्मेरस्मेरेति आश्चर्यनिःस्पन्दम्।

१२२ कन्द. मूलाधारः, विन्दुर्भ्रूमध्यस्थानम्।

'आत्मा चैवात्मना ज्ञातो यदा भवति साधकैः ।
तदा विस्मयमात्मा वै आत्मन्येव प्रपश्यति ॥'

इति । एतच्च

'तमधिष्ठातृभावेन स्वभावमवलोकयन् ।
स्मयमान इवास्ते यस्तस्येयं कुसृतिः कुतः ॥'

इति कारिकया संगृहीतम् ॥ १२ ॥

ईदृग्[१२३]योगभूमिकासमापन्नस्यास्य योगिनः—

**इच्छा शक्तिरुमा कुमारी ॥ १३ ॥**

योगिनः परभैरवतां समापन्नस्य या इच्छा सा शक्तिरुमा; परैव पारमेश्वरी स्वातन्त्र्यरूपा, सा च कुमारी विश्वसर्गसंहारक्रीडापरा 'कुमार क्रीडायाम्' इति पाठात् ।

अथ च कुं भेदोत्थापिकां मायाभूमिं मारयति अनुच्छिन्नप्रसरां करोति तच्छीला । कुमारी च परानुपभोग्या भोक्त्रै[१२४]कात्म्येन स्फुरन्ती ।

अथवा यथा उमा[१२५] कुमारी परिहृतसर्वासङ्गा महेश्वरैकात्म्यसाधनाराधनाय नित्योद्यु-

१२३ ईदृशीं भूमिका मासस्य योगिनः ।
१२४ भर्तारं यदा प्राप्स्ये इत्यभिप्रायेण ।
१२५ गिरितनया पार्वती ।

क्ता तथैव अस्येच्छा, इत्यस्मद्गुरुभिरित्थमेव पाठो दृष्टो व्याख्यातश्च ।

अन्यैस्तु 'शक्तिसमा[१२६]' इति पठित्वा ज्ञानक्रियापेक्षोऽस्याः[१२७] प्रकर्षो व्याख्यातः ।

एवं न लौकिकवत् अस्य योगिनः स्थूलेच्छा, अपि तु परा शक्तिरूपैव सर्वत्राप्रतिहता । तदुक्तं श्रीमत्स्वच्छन्दे

'सा[१२८] देवी सर्वदेवीनां नामरूपैश्च तिष्ठति ।
योगमायाप्रतिच्छन्ना कुमारी लोकभाविनी ॥'

इति । श्रीमृत्युञ्जयभट्टारकेऽपि

'सा ममेच्छा परा शक्तिरवियुक्ता[१२९] स्वभावजा ।

---

१२६ 'इच्छा शक्तिसमा कुमारी' इति ।

१२७ इच्छाशक्तेः ।

१२८ योगात्परतत्त्वैक्याद्धेतोरुत्थिता या माया, स्वरूपगोपना, तया प्रतिच्छन्ना स्थगितपरस्वरूपा, सर्वदेवीनां संबन्धिनामरूपप्रपञ्चेन स्थितेत्यर्थः । किं चैषा ब्रह्माण्डमवतीर्णा सती भगवच्छक्तिः परेषामनुपभोग्यत्वात्कुमारीत्वमाश्रित्य स्थिता, तादृशी चासौ लोकान्भावयति अभीष्टफलेन सम्पन्नान्सम्पादयति इति ।

१२९ यदेव मूलं वीर्यं पूर्वोक्तं, सा मम सम्बन्धिनी परा शक्तिरिच्छा, इच्छारूपतां प्राप्ता, कीदृशी स्वभावजा सहजा, शक्तियुक्ता गर्भीकृताशेषविश्वशक्त्यभेदविमर्शेति यावत्, स्वभावजेति स्फुटयति यद्देहेरिति, शक्तियुक्तेति च व्यनक्ति सर्वस्येत्यनेन, कारणात्मिका निर्मात्री, स्वा आत्मीया चिदानन्दस्वरूपसम्बन्धिनी शक्तिः, न तु व्यतिरिक्ता इति क्षेमराजपादाः 'शक्तियुक्ता, स्वा शक्तिः' इति पाठान्तराण्यनूद्य व्याचक्षते ।

वह्नेरूष्मेव विज्ञेया रश्मिरूपा रवेरिव ॥
सर्वस्य जगतो वापि सा शक्तिः कारणात्मिका ।'

इति । तदेतत्

'नहीच्छानोदनस्यायं प्रेरकत्वेन वर्तते ।
अपि त्वात्मबलस्पर्शात्पुरुषस्तत्समो भवेत् ॥'

इति कारिकया भङ्ग्या प्रतिपादितम् ॥ १३ ॥

ईदृशस्य महेच्छस्य[१३०]—

## दृश्यं शरीरम्[१३१] ॥ १४ ॥

यद्यद् दृश्यं बाह्यमाभ्यन्तरं वा, तत्तत् सर्वम् 'अहमिदम्' इति-सदाशिववन्महासमापत्त्या स्वाङ्गकल्पमस्य[१३२] स्फुरति; न भेदेन ।

शरीरं च देहधीप्राणशून्यरूपं नीलादिवद् दृश्यं; न तु पशुवद्दृढतया[१३३] भाति । एवं देहे बाह्ये च सर्वत्रास्य मयूराण्डरसवदविभक्तैव प्रतिपत्तिर्भवति[१३४] । यथोक्तं श्रीविज्ञानभैरवे

---

१३० महेच्छस्य योगिनः ।

१३१ शरीरं स्वाङ्गकल्पमित्यर्थः ।

१३२ महाप्रकाशापत्त्या स्वाङ्गवदेव विश्वं 'स्वशक्तिप्रचयोऽस्य विश्वम्' (३-३०) इति वक्ष्यमाणनीत्या स्वस्वभावाव्यतिरिक्तमेव परामृशतः ।

१३३ शरीरे अहंभावः दृढता ।

१३४ प्रतिपत्तिर्ज्ञानम् ।

'जलस्येवोर्मयो वह्नेर्ज्वालाभङ्ग्यः[१३५] प्रभा रवेः ।
ममैव भैरवस्यैता विश्वभङ्ग्यो विनिर्गताः ॥'

इति । एतच्च

'भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः[१३६] ।'

इत्यनेन संगृहीतम् ॥ १४ ॥

यच्चेदं सर्वस्य दृश्यस्य शरीरतया, शून्यान्तस्य च दृश्यतया, एकरूपं प्रकाशनमुक्तं नैतद् दुर्घटम्; अपि तु—

## हृदये चित्तसंघट्टाद्दृश्यस्वापदर्शनम् ॥ १५ ॥

विश्वप्रतिष्ठास्थानत्वात् चित्प्रकाशो हृदयं; तत्र चित्त[१३७]संघट्टात् चलतश्चलतः तदेकाग्रभावनात् दृश्यस्य, नीलदेहप्राणबुद्ध्यात्मनः; स्वा-

---

१३५ समुद्रकल्पस्य चिदात्मन ईश्वरस्य विश्वं तरङ्गरूपम्, अभिन्नं भिन्नमिवाभासमानं तत्रैवोदयव्ययानाप्नोति इति ध्यायेदिति शेषः।

१३६ भोग्यं हि नाम प्रमेयमुच्यते; न च प्रमेयं तदुपसर्जनप्रवृत्तित्वात् प्रमाणादतिरिच्यते। तच्च एवंविधं भोग्यं भोक्तुरतिरिक्तं न भवेत्, वस्तुतः सर्ववस्तूनां प्रमातर्येव विश्रान्तेः; अतश्च भोक्तैव तदुभयात्मना रूपेण प्रस्फुरति इति भावः।

१३७ समन्तात् घट्टनात् चलतः चित्तस्यैकाग्र्यभावनादिप्रकारैः। शिथिलैव संकोचस्थी चित्तस्पन्देनोल्लसते तत्र चित्प्रकाशो गगनादिविषयजातं परिच्छिन्नं समवधानतया इति भावार्थः।

पस्य च, एतदभाव[138]रूपस्य शून्यस्य; दर्शनं, त्यक्तग्राह्यग्राहकविभेदेन यथावस्तु स्वाङ्गकल्पतया प्रकाशनं भवति । चित्प्रकाशतामभिनिविशमानं हि चित्तं तदाच्छुरितमेव विश्वं पश्यति । तदुक्तं श्रीविज्ञानभैरवे

'हृ[139]द्याकाशे निलीनाक्षः पद्मसंपुटमध्यगः ।
अनन्यचेताः सुभगे परं सौभाग्यमाप्नुयात् ॥'

इति । परं हि अत्र सौभाग्यं विश्वेश्वरतापत्तिः । तत्त्ववृत्तिसमापन्नं महायोगिनमुद्दिश्य श्रीमत्स्वच्छन्देऽपि

'स च[140] सर्वेषु भूतेषु भावतत्त्वेन्द्रियेषु च ।
स्थावरे जङ्गमे चैव चेतनाचेतनं स्थितम् ॥
अध्वानं व्याप्य सर्वं तु सामरस्येन संस्थितः ।'

---

१३८ नीलाद्यभावरूपस्य ।

१३९ चित्तत्त्वे वेद्ये धृतधीन्द्रियः प्रमाणप्रमेययोर्मध्यगः सौभाग्यं स्वातन्त्र्यमुपैतीत्यर्थः । अथ वा ऊर्ध्वाधरपद्मसंपुटमध्यं गतो भावनयानुप्रविष्टः; अत एव हृदयाकाशे निलीनमक्षं मनः तद्द्वारेण च अन्येन्द्रियचक्रं यस्य सः ।

१४० स चेति, स एव प्राप्तपरसामरस्य एव स्थावरमचेतनं; जङ्गमं सचेतनं च; इति संक्षेपेण द्विधा स्थितं षड्विधमध्वानं व्याप्य 'षोढा हि वाच्यवाचकरूपोऽध्वा' तदन्तर्वर्तिषु सर्वेषु देवयोन्यादिषु चतुर्दशसु भूतेषु; भावेषु धर्मादिषु घटादिषु च; तत्त्वेषु पृथिव्यादिषु; भोगसाधनेषु च करणेषु; सामरस्येन स्थितः, सर्वास्ववस्थासु अविलुप्तपरभैरवसमापत्तिः । एषैव च निर्भुरध्यानसमाप्यात्मा महारहस्यभूरिति ।

[१४१] इति । स्पन्दे तु

'तथा स्वात्मन्यधिष्ठानात्सर्वत्रैवं भविष्यति ॥'

इत्यनेनैव एतत्संगृहीतम् ॥ १५ ॥

अत्रैव उपायान्तरमाह—

## शुद्धतत्त्वसंधानाद्वाऽपशुशक्तिः ॥ १६ ॥

[१४२] शुद्धं तत्त्वं परमशिवाख्यं, तत्र यदा विश्वम[१४३]नुसंधत्ते 'तन्मयमेव एतत्' इति, तदा अविद्यमाना पश्वाख्या बन्धशक्तिर्यस्य तादृगयं सदाशिववत् विश्वस्य जगतः पतिर्भवति । तदुक्तं श्रीमल्लक्ष्मीकौलार्णवे

'दीक्षासिद्धौ तु ये मोक्ताः प्रत्ययाः स्तोभ[१४४]पूर्वकाः ।
संधानस्यैव ते देवि कलां नार्हन्ति षोडशीम् ॥'

---

१४१ अत्र दृष्टप्रत्ययो यथा

'जनः स्वदेहकण्डूतिं विजानाति यथा तथा ।
परब्रह्मस्वरूपी च वेत्ति विश्वविचेष्टितम् ॥'

इति ।

१४२ शुद्धमिति 'मायोपरि महामाया' इति रहस्याम्नायदृशा सर्वत्र मायाशक्तिः श्रुतत्वात्', इत्यतः शुद्धं तत्त्वं परमशिवाख्यमेव । तत्र तत्त्वनिर्देश उपदेश्यजनापेक्षया ।

१४३ 'शिवमयमेवैतद्विश्वम्' इति विमृशति ।

१४४ प्रत्ययाः देशादिष्ववहितविप्रकृष्टवस्तुज्ञानानि; स्तोभः चित्तस्थावरणम् । संधानस्य शुद्धतत्त्वविमर्शस्य षोडशांशमपि ऐश्वर्यप्रकटनं नार्हन्ति, भवबन्धभूनिवृत्तिप्रथमाग्रान्तत्वम् ।

इति । श्रीविज्ञानभैरवे तु

"[१४५]सर्वं देहं चिन्मयं हि जगद्वा परिभावयेत् ।
युगपन्निर्विकल्पेन मनसा परमोद्भवः ॥'

इति । तदेतत्

'इति वा यस्य संवित्तिः क्रीडात्वेनाखिलं जगत् ।
स पश्यन्सततं युक्तो जीवन्मुक्तो न संशयः ॥'

इति कारिकया संगृहीतम् ॥ १६ ॥

ईदृग्ज्ञानरूपस्य अस्य योगिनः—

## वितर्क आत्मज्ञानम् ॥ १७ ॥

'विश्वात्मा शिव एवास्मि' इति यो वितर्को विचारः, एतदेव अस्य आत्मज्ञानम् । तदुक्तं श्रीविज्ञानभैरवे

'सर्वज्ञः सर्वकर्ता च व्यापकः परमेश्वरः ।
स एवाहं शैवधर्मा इति दार्ढ्याच्छिवो भवेत्[१४६] ॥'

इति । स्पन्देऽपि

'..................अयमेवात्मनो ग्रहः ।'

---

१४५ आपादात्केशान्तं सर्वं देहं प्रत्यक्ष चिदेकरूपम्; युगपत्, अक्रमेण; जगद्वा, स्फुरच्चिच्चमत्कारव्याप्त्या अन्तर्बहिः 'प्रकाशमानं न पृथक् प्रकाशात् अन्यथा चेत्यमानत्वानुपपत्तेः' इति न्यायात् प्रकाशः प्रकाशते इति भावयेत् ।

१४६ शिवस्यायं शैवो धर्मः स्वच्छस्वातन्त्र्यादिः; स एवाहमहमेव स इत्यसंदिग्धत्वेन भावनाच्छिवता; इय शाक्ती भूः ।

इत्यनेन एतदुक्तम्। तत्र हि आत्मनो ग्रहणं ग्रहो ज्ञानम् एतदेव, यद्विश्वात्मकशिवाभिन्नत्वम्; एषोऽपि अर्थो विवक्षितः ॥ १७ ॥

किं च अस्य—

**लोकानन्दः समाधिसुखम् ॥ १८ ॥**

लोक्यते इति लोको, वस्तुग्रामः; लोकयति इति च लोको, ग्राहकवर्गः; तस्मिन्[१४७] स्फुरति सति

'ग्राह्यग्राहकसंवित्तिः सामान्या सर्वदेहिनाम्।
योगिनां तु विशेषोऽयं संबन्धे सावधानता ॥'[१४८]

इति श्रीविज्ञानभट्टारकनिरूपितनीत्या प्रमातृपदविश्रान्त्यवधानान्तश्चमत्कारमयो य आनन्द एतदेव अस्य समाधिसुखम्। तदुक्तं तत्रैव

[१४९]'सर्वं जगत्स्वदेहं वा स्वानन्दभरितं स्मरेत्।
युगपत्स्वामृतेनैव परानन्दमयो भवेत् ॥'

---

१४७ ग्राह्यग्राहकवर्गे सामान्यलोकपरिकल्पिते स्फुरत्यपि योगिन. 'अहमिदम्' इति विकल्पाभावात् य आनन्दः तदेव समाधिसुखम्।

'अविकारोभयपार्श्वे चापपिच्छसदृशोऽर्थे।
अन्तर्मुखो योगी बहिर्मुख इति कलना कुतः ॥'

अहन्तेदन्तात्मभागयोर्विकाररहिते स्वात्मरूपे अर्थे इत्यर्थ।

१४८ सर्वदेहिना सकलप्रमातॄणां वेद्यवेदकसंवेदन निर्विशेषम्। योगिना तु तत्र आद्यन्तमध्यदशावगाहिप्रमातृस्वरूपाविस्मरणरूपा समाधानतेति।

१४९ स्वानन्दभरित, स्वस्य विषयात्मानन्द; स्वामृतेन स्वानन्देन भरित स्वकीयचिदानन्दपूर्णं सर्वं चिन्तयेत्। अत्र आद्यानचिद्रसरूपस्य जगतोऽपि भासनमन्यथानुपपत्तेः विशेषाधायकमिति।

इति। एतच्च

'इयमेवामृतप्राप्तिः.................।'

इत्यनेन संगृहीतम्।

अथ च यत् अस्य स्वात्मारामस्य समाधिसुखं, [१५०] तदेव तत्तादृशम् अवलोकयतां लोकानाम् आनन्दसंक्रमणयुक्त्या स्वानन्दाभिव्यक्तिपर्यवसायि[१५१] भवति। एतदपि श्रीचन्द्रज्ञानग्रन्थेन प्रागुक्तेन (२३ पृ० सू० ७) सुसंवादम्॥ १८॥

अथ ईदृशस्य अस्य योगिनो विभूतियोगं[१५२] दर्शयति—

## शक्तिसंधाने शरीरोत्पत्तिः॥ १९॥

'इच्छा शक्तिरुमा कुमारी' (१–१३) इति सूत्रेण या अस्य शक्तिरुक्ता, तामेव यदा अनुसंधत्ते, दार्ढ्येन[१५३] तन्मयीभवति, तदा तद्वशेन

---

१५० योगिसंबन्धि स्वानन्दमयं समाधिसुखं स्वानुभवगोचरम्।

१५१ तल्लोकान् पर्यवसाययति, पर्यवसन्तः प्रयोजयति। तेषां स्वानन्दाभिव्यक्तौ विश्रान्तिप्रदमित्यर्थः।

१५२ अणिमाद्यैश्वर्येण यथेष्टनिर्माणवैचित्र्यसंपादनसामर्थ्यम्।

१५३ स्वशक्तिस्वरूप-परमाकाशधामसमाविष्टतया अव्युच्छिन्नतद्विमर्शाभ्यसनेनेत्यर्थः।

अस्य यथाभिमतं शरीरमुत्पद्यते । तदुक्तं श्री-मृत्युञ्जयभट्टारके

'ततः प्रवर्तते शक्तिर्[154]लक्ष्यहीना निरामया ।
इच्छा सा तु विनिर्दिष्टा ज्ञानरूपा क्रियात्मिका ॥'

इत्युपक्रम्य

'सा योनिः सर्वदेवानां शक्तीनां चाप्यनेकधा ।
अग्नीषोमात्मिका योनिस्तस्यां [155]सर्वं प्रवर्तते ॥'

इति । शक्तिसंधानमाहात्म्यं लक्ष्मीकौलार्णवे

'[156]न संधानं विना दीक्षा न सिद्धीनां च साधनम् ।
न मन्त्रो मन्त्रयुक्तिश्च न योगाकर्षणं तथा ॥'

इत्यादिना प्रतिपादितम् । एतच्च

---

१५४ लक्ष्यहीना, वेद्यरहिता परस्फुरत्तात्मा; निष्क्रान्त आमयो महामाया यस्याः तादृशी महामायाद्युल्लासिका पराशक्तिः । तत एव द्वादशान्तधाम्नः प्रवर्तते समुन्मिषति, इच्छा-ज्ञान-क्रियारूपतया क्रमेण स्फुरतीत्यर्थः ।

१५५ प्राप्तपरतत्त्वाभेदस्य योगिनो या उन्मिषन्ती पराशक्तिरुक्ता, सा यतः सर्वदेवानामनाश्रितसदाशिवेश्वरानन्तरुद्रादीनां, शक्तीनां वामा-ज्येष्ठादीनां ब्राह्म्यादीनां च अग्नीषोमात्मिका योनिः; तत एव सोम-प्रधाना; यतस्तस्याः सर्वं प्रवर्तते; अत एव अग्नीषोमात्मप्रकृति विश्वम् अग्नीषोममयमिव । तथा च अग्निरपि आह्लादयति हिममपि च दहतीति तत्त्वविद आहुः; इति सृष्टिस्थितिसंहर्तृत्वं शक्तेः प्रदर्शितम् ।

१५६ यदि मन्त्रादिनापि यथाभिमतशरीरोत्पत्तिः संपद्यते, तथापि न स्वाभाविकी, व्यभिचारात्, कृत्रिमत्वात् । अतः संधानमेव शरीरान्तरोत्पत्तौ कारणमित्यर्थः ।

'यथेच्छाभ्यर्थितो धाता जाग्रतोऽर्थान्हृदि स्थितान्।
सोमसूर्योदयं कृत्वा संपादयति देहिनः[१५७] ॥'

इत्यनेन संगृहीतम्। देहिनः अत्यक्तदेहवासनस्य योगिनो हृदि स्थितान् अर्थान् तत्तदपूर्वनिर्माणादिरूपान् धाता महेश्वरः प्रकाशानन्दात्मतया सोमसूर्यरूपवाहोन्मीलनेन[१५८] सोमसूर्यसामरस्यात्मनश्च[१५९] शक्तेरुदयं कृत्वा बहिर्मुखवाहित्वेन तामासाद्य संपादयति; इति हि अस्यार्थः

'तथा स्वप्नेऽप्यभीष्टार्थान्·················।'

इत्येतच्छ्लोकप्रतिपादितस्वप्नस्वातन्त्र्यं प्रति दृष्टान्ते योजितः, इति स्पन्दनिर्णये मयैव दर्शितम् ॥ १९ ॥

अन्या अपि अस्य यथाभिलषिताः सिद्धय एतन्माहात्म्येनैव घटन्ते इत्याह—

भूतसंधानभूतपृथक्त्व-
विश्वसंघट्टाः ॥ २० ॥

भूतानि शरीरप्राणभावाद्यात्मकानि; तेषां

---

१५७ देहाभिमानवतः ।

१५८ प्राणापानविकासनेन ।

१५९ समानशक्तेः प्राणनरूपिण्या देहव्यापिन्याः ।

क्वचित् आप्यायनादौ संधानं, परिपोषणं; व्याध्याद्युपशमादौ पृथक्त्वं, शरीरादेर्विश्लेषणं[160]; देशकालादिविप्रकृष्टस्य[161] च विश्वस्य संघट्टो, ज्ञानविषयीकार्यत्वादिकः; अस्य पूर्वोक्तशक्तिसंधाने सति जायते। एतच्च सर्वागमेषु साधनाधिकारेषु अस्ति । तदेव स्पन्दे

'दुर्बलो[162]ऽपि तदाक्रम्य यतः कार्ये प्रवर्तते ।
आच्छादयेद्बुभुक्षां च तथा योऽतिबुभुक्षितः ॥'

इति ।

'ग्लानिर्विलुण्ठिका देहे तस्याश्चाज्ञानतः सृतिः ।
तदु[163]न्मेषविलुप्तं चेत्कुतः सा स्यादहेतुका ॥'

इति ।

'यथा ह्यर्थोऽस्फुटो दृष्टः सावधानेऽपि चेतसि ।
भूयः स्फुटतरो भाति स्वबलो[164]द्योगभावितः ॥

---

१६० भूताना व्याध्यादेः सकाशात् ।

१६१ नित्य विभु-स्वतन्त्र चिन्मात्रस्वरूपस्य देशकालादिपरिच्छेदाभावात्; योगिनोऽपि तदावेशसद्भावात् न तद्व्यवहित किंचित् इति भाव ।

१६२ दुर्बलः, क्षीणधातुः; तत्, स्पन्दतत्त्वम्; बुभुक्षानिवृत्तिरपि सिद्धिषु गणितेति भावः ।

१६३ तत् अज्ञानम्; सा ग्लानिः; तस्या हि हेतुरज्ञानम् । अतश्च योगिना वलीपलिताद्यभावः शरीरदार्ढ्यं चास्ति । 'ग्लानिर्विलुम्पिका देहे' इति मूलपाठः ।

१६४ स्वबलोद्योगः सविद्बलप्रयत्नः ।

तथा[165] यत्परमार्थेन येन यत्र यथा स्थितम् ।
तत्तथा बलमाक्रम्य न चिरात्संभवर्तते ॥'

इत्यादिना विभूतिस्पन्दे सोपपत्तिकं दर्शितम् ॥ २० ॥

यदा तु मितसिद्धीरनभिलष्यन् विश्वात्मप्रथामिच्छति तदा अस्य—

**शुद्धविद्योदयाच्चक्रेशत्वसिद्धिः॥२१॥**

वैश्वात्म्यप्रथावाञ्छया यदा शक्तिं संधत्ते तदा 'अहमेव सर्वम्' इति शुद्धविद्याया उदयात् विश्वात्मकस्वशक्तिचक्रेशत्वरूपं माहेश्वर्यमस्य सिद्ध्यति । तदुक्तं स्वच्छन्दे

'तस्मात्[166]सा तु परा विद्या यस्मादन्या[167] न विद्यते ।
विन्दते ह्यत्र युगपत्सार्वज्ञ्यादिगुणान्परान्[168] ॥

१६५ तथेति तेन संविद्बलप्रयत्नेन यद्वस्तु प्रातिस्विकरूपेण देशकालविशिष्टेन संस्थितं, तद्वस्तु संविद्बलमाश्रितवतो जनस्य आशु प्रतिभातीति । अतोऽत्र देशकालव्यवहितवस्तुनो ज्ञानविषयीभवनं नो दुर्घटमिति भाव ।

१६६ मायान्तावधिकात्मतत्त्वोर्ध्वस्य शुद्धविद्यादिशक्त्यन्ताध्वव्यापकात् विद्यातत्त्वात् इयमन्यैव विद्या ।

१६७ अन्येत्यपरा ईदृशी इत्यर्थात्, एतयैवाशेषविश्वक्रोडीकारात् ।

१६८ परानिति अभेदरूपान् सार्वज्ञ्यादीन् यतो युगपत् अत्र उन्मनाया योगिवरो लभते, तत इयं परा विद्या 'विद्लृ लाभे' इति धात्वर्थानुगमात् । यदाहु'

वेदनानादिधर्मस्य[169] परमात्मत्वबोधना।
वर्जनापरमात्मत्वे तस्माद्विद्येति सोच्यते॥
'तत्रस्थो[170] व्यञ्जयेत्तेजः परं परमकारणम्।
परस्मिंस्तेजसि व्यक्ते तत्रस्थः शिवतां व्रजेत्॥'

इति। तदेतत्

'दिदृक्षयेव सर्वार्थान्यदा व्याप्यावतिष्ठते।
तदा किं बहुनोक्तेन स्वयमेवावभोत्स्यते॥'

इत्यनेनैव संगृहीतम्॥ २१॥

यदा तु स्वात्मारामतामेव[171] इच्छति तदा अस्य—

---

'सर्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिश्च विभोर्विधिज्ञाः
षडाहुरङ्गानि महेश्वरस्य॥'

इति।

१६९ अनादिधर्मः स्वातन्त्र्यशक्त्यात्मा स्वभावः, तस्य वेदना विचारणा, आत्मनश्च यत्परमात्मत्वं शिवरूपत्वमस्ति, तस्य बोधना अवगमहेतु, अत एव अपरमात्मत्वे अतद्विषये इय वर्जना संपद्यते, तस्मात् 'विद विचारणे' 'विद ज्ञाने' इति धात्वर्थानुगमात् इय विद्योच्यते इति क्षेमराजपादाः।

१७० तत्रेति, उन्मनाख्याया विद्यायां; व्यञ्जयेत् आत्मीयमेवोन्मीलयेत् प्रत्यभिजानीयात्; तेज चिज्ज्योतिः; परम् असंकुचितं; परमकारणं परमशिवरूपम्; अतश्च शिवता मजेत्, तदैकात्म्यमियात् इति श्रीक्षेमराजपादा।

१७१ स्वात्मनि आ समन्तात् रमते इति स्वात्मारामः।

## महाह्रदानुसंधानान्मन्त्रवीर्यानुभवः ॥ २२ ॥

परा भट्टारिका संवित् इच्छाशक्तिप्रमुखं स्थूलमेयपर्यन्तं विश्वं वमन्ती, खेचरीचक्राद्यशेषप्रवाहप्रवर्तकत्व-स्वच्छत्वानावृतत्व-गभीरत्वादिधर्मयोगान्महाह्रदः[१७२]; तस्यानुसंधानात्, अन्तर्मुखतया अनारतं तत्तादात्म्यविमर्शनात्; वक्ष्यमाणस्य शब्दराशि[१७३]स्फारात्मकपराहन्ताविमर्शमयस्य मन्त्रवीर्य[१७४]स्यानुभवः, स्वात्मरूपतया स्फुरणं भवति । अत एव श्रीमालिनीविजये

'या सा शक्तिर्जगद्धातुः .................. ।'

इत्युपक्रम्य इच्छादिप्रमुखपञ्चाशद्[१७५]भेदरूपतया

---

१७२ खेचरीगोचर्याद्यशेषप्रवाहप्रवर्तकत्वात्, विश्वप्रतिबिम्बसहत्वेन स्वच्छत्वात्, प्रतिबिम्बसहत्वेपि विश्वानावृतत्वात्, दुर्लक्षतया गभीरत्वात् संविदो महाह्रदसाधर्म्यमुद्दिश्यते ।

१७३ शब्दानां पदवाक्याद्यात्मना विभक्तानां स्थूलानामविभागस्वभावः कारणात्मा यो राशिः, तस्य स्फारः नाम स्फुरणकर्तृता, तत्तदामर्शात्मना स्वभित्तौ विश्वरूपतावभिभासयिषा इति ।

१७४ मन्त्राणां वीर्यभूतस्य महामन्त्रस्य, पूर्णाहन्तायाः ।

१७५ आदिक्षान्तपञ्चाशद्वर्णरूपेण ।

मातृका[१७६]मालिनीरूपताम् अशेषविश्वमयीं शक्तेः प्रदर्श्य, तत एव मन्त्रोद्धारो दर्शितः; इति परैव शक्तिर्महाह्रदः; ततः तदनुसंधानात्[१७७] मातृका-मालिनीसतत्त्वमन्त्रवीर्यानुभव इति युक्तमुक्तम् । एतदेव

'तदाक्रम्य बलं मन्त्राः.................. ।'

इत्याद्युक्त्या भङ्ग्या प्रतिपादितम् ।

तदेवं 'चैतन्यमात्मा' (१–१) इत्युपक्रम्य तत्त्वातथ्यावभासिततदख्याति[१७८]मयं सर्वमेव बन्धं यथोक्ताद्वयात्मकभैरवसमापत्तिः प्रशमयन्ती, विश्वं स्वानन्दामृतमयं करोति, सर्वाश्च सिद्धीः मन्त्रवीर्यानुप्रवेशान्ता ददाति । इति शाम्भवो[१७९]-पायप्रथनात्मा अयं प्रथम उन्मेष उक्तः । अत्र तु मध्ये शक्तिस्वरूपमुक्तं, तत् शाम्भवरूपस्य

---

१७६ परप्रमानवियुक्तत्वात् तदनतिरिक्ता अक्षुब्धैव पराशक्तिः पशुभिः सर्वमन्त्रविधाना योनित्वेन 'अज्ञाता मातृका' इत्युक्ता । क्षुब्धा तु बीजयोनिषु परस्परसंघट्टात्मलोलीभावात् नादिफान्तरूपा मालिनी इति-संज्ञा; मलते विश्वमन्तर्दर्पणवत् धत्ते इति, विश्वस्वरूपिणी इत्यर्थः ।

१७७ अनुसंधान विमर्शनम् ।

१७८ चैतन्याख्यातिमयम्, आणवमलस्वरूपमित्यर्थः ।

१७९ शम्भौ प्रकाशरूपे भवः शाम्भवः; तत आगत इति वा ।

शक्तिमर्त्ता[१८०]प्रदर्शनाभिप्रायेण इति शिवम् ॥२२॥

इति श्रीमन्महामाहेश्वराचार्याभिनवगुप्तपादपद्मोपजीवि-श्रीक्षेमराजविरचितायां शिवसूत्रविमर्शिन्यां शाम्भवोपायप्रकाशनं नाम प्रथम उन्मेषः ॥ १ ॥

---

१८० शक्तिमत्ता स्वातन्त्र्यसारता ।

# शिवसूत्रविमर्शिनी ।

अथ

## द्वितीय उन्मेषः ।

इदानीं शाक्तोपायः प्रदर्श्यते । तत्र शक्तिः मन्त्रवीर्यस्फाररूपा; इति प्रथमोन्मेषान्तसूत्रित-तत्स्वरूपविवेचनपुरःसरमुन्मेषान्तरमारभमाणो मन्त्रस्वरूपं तावत् निरूपयति—

**चित्तं मन्त्रः ॥ १ ॥**

चेत्यते विमृश्यते अनेन परं तत्त्वम् इति चित्तं, पूर्णस्फुरत्तासतत्त्वप्रासाद-प्रणवादिविमर्शरूपं संवेदनम्; तदेव मन्त्र्यते गुप्तम्, अन्तर् अभेदेन विमृश्यते परमेश्वररूपम् अनेन, इति कृत्वा मन्त्रः । अत एव च परस्फुरत्तात्मकमनन-धर्मात्मता, भेदमयसंसारप्रशमनात्मक-त्राणधर्मता च अस्य निरुच्यते ।

अथ च मन्त्रदेवताविमर्शपरत्वेन प्राप्ततत्सा-

१ परा संविच्छक्तिः पूर्णाहन्ता, या विश्वस्फुरणकर्तृतारूपा ।

२ 'मनु अवबोधने' 'त्रृ पालने' इत्येताभ्यां निरुक्ततया निर्वचनीयत्वेन निर्णीततया उच्यते ।

[३]मैरस्यम् आराधकचित्तमेव मन्त्रः, न तु विचित्रवर्णसंघट्टनामात्रकम्। यदुक्तं श्रीमत्सर्वज्ञानोत्तरे

'उच्चार्यमाणा ये मन्त्रा न मन्त्रांश्चापि तान्विदुः ।
मोहिता देवगन्धर्वा मिथ्याज्ञानेन गर्विताः ॥'

इति । श्रीतन्त्रसद्भावेऽपि

'मन्त्राणां जीवभूता तु या स्मृता शक्तिरव्यया ।
तया हीना वरारोहे निष्फलाः शरदभ्रवत् ॥'

इति । श्रीश्रीकण्ठीयसंहितायां तु

'पृथङ्मन्त्रः पृथङ्मन्त्री न सिद्ध्यति कदाचन ।
ज्ञानमूलमिदं सर्वमन्यथा नैव सिद्ध्यति ॥'

इत्युक्तम् । एतच्च स्पन्दे

'सहाराधकचित्तेन तेनैते शिवधर्मिणः ॥'

इति भङ्ग्या प्रतिपादितम् ॥ १ ॥

अस्य च—

## प्रयत्नः साधकः ॥ २ ॥

३ मन्त्राधिदेवताभिः सह प्राप्तैक्यम् ।

४ पूर्णाहंविमर्शनात्मिका संविच्छक्तिः ।

५ वाच्यवाचकयोरभेदोपचारात् मन्त्रो मन्त्रदेवता । एवं मन्त्रिमन्त्रदेवतासु आराध्याराधकभावेन पृथग्धीः सिद्धिं नैति । मननत्राणधर्मकत्वात् तु मन्त्राः ज्ञानशक्तौ स्थिताः प्राप्तज्ञानशक्त्यात्ममहावीर्याः सर्वसिद्धिदाः प्रतिनियतकार्यसंपादनसमर्था भवन्ति इत्यर्थः ।

६ शिवस्य परमेश्वरस्य अनन्यसाधारणः सर्वज्ञत्वादिगुणो धर्मो विद्यते येषां ते मन्त्राः, मननत्राणरूपाः; शिवादभिन्नस्वरूपा इत्यर्थः ।

यथोक्तरूपस्य मन्त्रस्य अनुसंधित्सा[7]प्रथमोन्मेषावष्टम्भप्रयतनात्मा अकृतको यः प्रयत्नः स एव साधको, मन्त्रयितुर्मन्त्रदेवतातादात्म्यप्रदः । तदुक्तं श्रीतन्त्रसद्भावे

> 'आमिषं तु यथा खस्थः संपश्यञ्शकुनिः प्रिये ।
> क्षिप्रमाकर्षयेद्यद्वद्वेगेन सहजेन तु ॥
> तद्वदेव हि योगीन्द्रो मनो बिन्दुं विकर्षयेत्[8] ।
> यथा शरो धनुःसंस्थो यत्नेनाताड्य धावति ॥
> तथा बिन्दुर्वरारोहे उच्चारेणैव धावति ॥'

इति । अन्यत्रापि

> 'तद्ग्रहो[9] मन्त्रसद्भावः............... ।'

इति । अत्र हि तद्वत् इति, अकृतकनिजोद्योगबलेन योगीन्द्रो मनः कर्म, बिन्दुं विकर्षयेत् परप्रकाशात्मतां प्रापयेत् इति । तथा बिन्दुः

---

७ अनुसधातुमिच्छा अनुसधित्सा, तस्या प्रथम परप्रतिभोन्मज्जने यो निरोध तत्र प्रयत्नस्वभाव ।

८ विकर्षयेत् इति द्विकर्मक क्रियापदम् । बिन्दु. अविभक्तप्रकाशरूप. । यदुक्तम्

> 'उदिताया क्रियाशक्तौ सोमसूर्याग्निधामनि ।
> अविभाग प्रकाशो य: स बिन्दु परमो हि न ॥'

इति ।

९ तज्ज्ञानमेव मन्त्रसद्भाव , मन्त्रवीर्यमित्यर्थ ।

परप्रकाशः अकृतकोद्यन्तृतात्मना उच्चारेण[10] धावति, प्रसरति इत्यर्थः । एतच्च स्पन्दे

'अयमेवोदयस्तस्य ध्येयस्य ध्यायिचेतसि ।
तदात्मतासमापत्तिरिच्छतः साधकस्य यो[11] ॥'

इत्यनेनोक्तम् ॥ २ ॥

ईदृशसाधकसाध्यस्य मन्त्रस्य पूर्वोपक्षिप्तं वीर्यं लक्षयति—

## विद्याशरीरसत्ता मन्त्ररहस्यम् ॥ ३ ॥

विद्या पराद्वयप्रथा, शरीरं स्वरूपं, यस्य स विद्याशरीरो भगवान् शब्दराशिः; तस्य या सत्ता, अशेषविश्वाभेदमयपूर्णाहंविमर्शनात्मा स्फुरत्ता, सा मन्त्राणां रहस्यम्[12], उपनिषत् ।

---

१० उच्चारेण विमर्शरूपेण, न तु स्थान करण प्रयत्नरूपवीजाक्षरोच्चारेण, तस्याणवोपायपर्यवसायित्वात्; परप्रमातृविश्रान्त्यर्थं सहजोद्गमनकर्तृतात्मना विमर्शेन स्फुरति इति ।

११ तदात्मतासमापत्ति, मन्त्रदेवतात्मतायाः समापत्तिः । इदमत्र तात्पर्यम् । न्यासादिदैतो मन्त्रपद्धान्यदेवताकारायां मन्त्रोच्चारणावस्थायां साधकचेतसः, स्वयमप्रयत्नेन उपच्यमान यदभिन्नरूपत्व, स एव परामर्शक्षमसंविदो ध्यातुः, आराध्यदेवतायाः प्रत्यक्षदर्शनरूपो मुख्य उदयः; न तु व्यतिरेकनिभाव्यमानाकारता, इति अनयैव संविदा शिवरूपतापत्तेः 'शिवो भूत्वा शिवं यजेत्' इत्यस्य विधेः चरितार्थत्वम् ।

१२ वीर्यमित्यर्थः ।

यदुक्तं श्रीतन्त्रसद्भावे

'सर्वे वर्णात्मका मन्त्रास्ते च शक्त्यात्मकाः प्रिये ।
शक्तिस्तु मातृका ज्ञेया सा च ज्ञेया शिवात्मिका ॥'

इति । तत्रैव[13] च अयमर्थः अतिरहस्योऽपि वितत्य स्फुटीकृतः[14] । तथा च

'न जानन्ति गुरुं देवं शास्त्रोक्तान्समयांस्तथा ।
दम्भकौटिल्यनिरता लौल्यार्थाः[15] क्रिययोज्झिताः ॥
अस्मात्तु कारणाद्देवि मया वीर्यं प्रगोपितम् ।
तेन गुप्तेन ते गुप्ताः शेषा वर्णास्तु केवलाः ॥'

इति-पीठिकाबन्धं[16] कृत्वा

'या सा तु मातृका देवि परतेजःसमन्विता[17] ।
तया व्याप्तमिदं विश्वं सब्रह्मभुवनान्तकम् ॥
तत्रैस्थं च यदा देवि व्यापितं च सुरार्चिते ।
अवर्णस्थो यथा वर्णः स्थितः सर्वगतः प्रिये ॥
तथाहं कथयिष्यामि निर्णयार्थं स्फुटं तव ।'

---

१३ श्रीतन्त्रसद्भावे ।

१४ वक्ष्यमाणागमेन ।

१५ लोला रसना तस्या इद रसास्वादन लौल्य, तदेव अर्थो येषा ते, रसास्वादासक्ता..। उपलक्षणमेतत् शब्दादिविषयचमत्कारनिरता इत्यर्थ ।

१६ पीठिकाबन्धो मूलबन्ध , शास्त्रादौ सक्षेपेण संबन्धादिकथनरूप ।

१७ परतेज पराहन्ता ।

१८ अनाश्रितशिवादारभ्य स्थूलमेयपर्यन्तम् ।

१९ तत्रस्थमिति मातृकास्थ पर तेज । अवर्णस्थ इति अनुत्तरस्थित ।

इत्युपक्रम्य

'या सा शक्तिः परा सूक्ष्मा निराचारेति कीर्तिता ॥[२०]
हृद्बिन्दुं वेष्टयित्वान्तः सुप्तभुजगाकृतिः।
तत्र सुप्ता महाभागे न किञ्चिन्मन्यते उमे ॥
चन्द्राग्निरविनक्षत्रैर्भुवनानि चतुर्दश[२१]।
क्षिप्त्वोदरे तु या देवी विषमूढेव सा गता ॥

---

२० अनुत्तरशक्तिः स्वस्वातन्त्र्यात् ग्राह्यग्राहकात्मभावजातस्य इयत्तापरिच्छेदनेन स्वरूपगोपनात्मसंकोचावलम्बनात् स्वात्मानं सर्वोद्यततया अवस्थितेः प्रकट कुर्वाणापि बिन्दुस्वरूपिणी। वेत्तीति बिन्दुः विदिक्रियायां स्वतन्त्रः प्रमाता; तस्य रूपमविभागः प्रकाशः तत्स्वभावैव, अत एव परा संविद्रूपा, सूक्ष्मा प्राणनारूपा, नियतात्मध्यानपूजादिकात् आचारात् निष्क्रान्ता निराचारा, हृद्बिन्दु हृत्पद्ममण्डलान्तःस्थ, संकुचितात्मताप्राधान्यात् बहीरूपतया भेदभूमावेव प्रातमरोह नरात्मक बिन्दुम् अन्तर्वेष्टयित्वा स्वात्मान्तर्लीन विधाय, सुप्तभुजगाकृतिः, बहिर्भावोन्मुख्यविरहितत्वात् स्वात्ममात्रविश्रान्ता इत्यर्थः। इदमत्र तात्पर्यम्। बिन्दुः परप्रकाशात्मा, स्वातन्त्र्यात् विश्वमयविभासयिषुः द्वादशान्त भ्रूमध्यहृदयलक्षणेषु स्थानेषु विश्रान्तिभेदात् नर शक्ति शिवात्मको बोध्यः; इच्छाद्यात्मक शिव विद्या आत्मलक्षणरूपतया प्रस्फुरित इत्यर्थः। यदुक्त

'अत्र प्रकाशमात्र यत्स्थितं धामत्रये सति।
उक्त बिन्दुतया शास्त्रे शिवबिन्दुरसौ मतः ॥'

इति।

२१ प्रमा प्रमाण प्रमेय प्रमातृभिः सह चतुर्दश महासरान् उदरे क्षिप्त्वा स्वात्मसात्कृत्य, विषेण मोहिता इव संभ्रमयन्ती स्वात्मानमपि अजानती भवति इत्यर्थः।

प्रबुद्धा सा निनादे[22]न परेण ज्ञानरूपिणा ।
मथिता चोदरस्थेन बिन्दुना वरवर्णिनि ॥
तावद्वै भ्रमवेगेन मथनं शक्तिविग्रहे ।
भेदात्तु प्रथमोत्पन्ना बिन्दवस्तेऽतिवर्चसः ॥
उत्थिता[23] तु यदा तेन कला सूक्ष्मा तु कुण्डली ।
चतुष्कलमयो बिन्दुः शक्तेरुदरगः प्रभुः ॥
मध्यमन्थनयोगेन ऋजुत्वं जायते प्रिये ।
ज्येष्ठाशक्तिः स्मृता सा तु बिन्दुद्वयसुमध्यगा ॥
बिन्दुना क्षोभमायाता रेखैवामृतकुण्डली ।
रेखिणी नाम सा ज्ञेया उभौ बिन्दू यदन्तगौ ॥
त्रिपथा सा समाख्याता रौद्री नाम्ना तु गीयते ।
रोधिनी सा समुद्दिष्टा मोक्षमार्गनिरोधनात् ॥

---

२२ बिन्दुरेव तत्तत्परामर्शतामुल्लिलासयिषुः नादात्मकशब्दरूपतया स्फुरितः, शब्दयति स्वाभेदेन विश्वं परामृशति इति शब्दः, परावाग्रूपो विमर्शः, स एव नदति सर्वेषामेव जीवकलात्वेन स्फुरति इति नादात्मा। यदुक्तम्

'योऽसौ नादात्मकः शब्दः सर्वप्राणिष्ववस्थितः ।'

इति ।

२३ परैव सूक्ष्मा अमाकलारूपा कुण्डलिनी शक्तिः शिवेन सह परस्परसामरस्यरूपमध्यमन्थकभावात्मकं सङ्घट्टमासाद्य उत्थिता सती, इच्छाज्ञानक्रियारूपतामाश्रित्य रौद्रीत्वमुद्भावयन्ती, शृङ्गाटकाकारताम्-अम्बिकात्वमवलम्बमाना, उकारात्मकशाक्तद्वयकलाकारतां ज्येष्ठात्वम-धितिष्ठन्ती च, शिवबिन्दूदितकालाग्निरूपरेफात्मकबिन्दुविश्रान्तस्पष्टरेखा-कारतामाभासयन्ती, इत्यादिवर्णशरीरमुल्लासयति, इति उत्थिता इत्यारभ्य एवंरूपिणीत्यन्तस्य श्लोकषट्कस्य तात्पर्यार्थो निरूपितः ।

शशाङ्कशकलाकारा अम्बिका चार्धचन्द्रिका ।
एकैवेत्थं परा शक्तिस्त्रिधा[२४] सा तु प्रजायते ॥
आभ्यो युक्तवियुक्ताभ्यः संजातो नववर्गकः ।
नवधा च स्मृता सा तु नववर्गोपलक्षिता ॥
पञ्चमन्त्रगता देवि सैव[२५] आदिरनुक्रमात् ।
तेन पञ्चविधा प्रोक्ता ज्ञातव्या सुरनायिके ॥
स्वरद्वादशगा देवि द्वादशस्था उदाहृता ।
अकारादिक्षकारान्ता स्थिता पञ्चाशता भिदा ॥
हृत्स्था[२६] एकार्णवा प्रोक्ता कण्ठे प्रोक्ता द्वितीयका ।
त्रिरार्णवा तु ज्ञातव्या जिह्वामूले सदा स्थिता ॥
जिह्वाग्रे वर्णनिष्पत्तिर्भवत्यत्र न संशयः ।
एवं शब्दस्य निष्पत्तिः शब्दव्याप्तं चराचरम् ॥'

इत्यादिना ग्रन्थेन परभैरवीयपरावाक्शक्त्यात्मकमातृका, अत एव ज्येष्ठा-रौद्री-अम्बा-

२४ अनुत्तरेच्छोन्मेषरूपा ।

२५ सद्योजात वामदेव ईशान तत्पुरुष अघोराख्याः पञ्च मन्त्राः ।

२६ परावाग्रूपस्य अहमात्मनः परामर्शस्य हि अनन्यापेक्षं परत्वमिति परावाग्रूपैव परमेश्वरी स्वस्वातन्त्र्यात् पश्यन्तीरूपतामुल्लिलासयिषुः वाच्यवाचकक्रमानुदयात्, विभागस्य अस्फुटत्वात्, चिज्ज्योतिष एव प्राधान्यात्, द्रष्टृरूपतया पश्यन्तीशब्दव्यपदेश्या । तदनु वाच्यवाचकक्रमस्य आघूर्णितविभागत्वेऽपि स्फुटास्फुटरूपत्वेन बुद्धिमात्रनिष्ठतया दर्शनप्राधान्यात् द्रष्टृदृश्ययोरन्तरालवर्तित्वेन मध्यमापदवाच्या । ततोऽपि स्थानकरणप्रयत्नबलात्, तत्तद्वर्णक्रमोपग्रहात्, विभागस्य स्फुटत्वात्, दृश्यस्यैव प्राधान्यात्, विराटे शरीरे भवत्वात् वैखरीशब्दव्यपदेश्या । इति विश्वरूपतावभासने परं सूक्ष्म-स्थूलरूपतया त्रैविध्यम्; इति हृत्स्थेत्यादिश्लोकद्वयस्याय तात्पर्यार्थो निरूपितः ।

स्यशक्तिप्रसरसंभेदवैचित्र्येण सर्ववर्णोदयस्य उक्तत्वात्, वर्णसंघट्टनाशरीराणां मन्त्राणां सैव भगवती व्याख्यातरूपा विद्याशरीरसत्ता रहस्यम्—इति प्रदर्शितम् । प्रत्यागमं च मातृकामालिनीप्रस्तारपूर्वकं मन्त्रोद्धारकथनस्य अयमेव आशयः । रहस्यागमसारसंग्रहरूपत्वात् शिवसूत्राणाम् आगमसंवादे भरः अस्माभिः कृत; इति नासभ्यम् असूयितव्यम् । एवमपि संवादिते आगमे यदि रहस्यार्थो न बुध्यते, तस्मात् सद्गुरुसपर्या कार्या । एष च सूत्रार्थः

'तदाक्रम्य बलं मन्त्राः.............. ।'

इत्यनेन कारिकाद्वयेन स्पन्दे दर्शितः ॥ ३ ॥

येषां तु एवंविधमेतन्मन्त्रवीर्यं प्रोक्तमहाह्रदानुसंधानौपयिकमपि परमेश्वरेच्छात एव न हृदयङ्गमीभवति; अपि तु आनुषङ्गिकमात्रबिन्दुनादादिकलाजनितासु मितसिद्धिषु चित्तं रोहति, तेषाम्—

२७ तदिति निरावरणचिद्रूपबलमधिष्ठाय मन्त्राः अनुग्रहादौ अधिकारे, देहिना करणानि इव स्वाधिकारे प्रवर्तन्ते । निवृत्ताधिकाराणां तु तेषाम् आराधकचित्तेन सह स्वस्वभावव्योम्नि संलीनतया मायाकालुष्यपरित्यागात् शिवधर्मितासमापत्तिः ।

## गर्भे चित्तविकासोऽविशिष्ट-विद्यास्वप्नः ॥ ४ ॥

गर्भः अख्यातिर्महामाया; तत्र तदात्मके मितमन्त्रसिद्धिप्रपञ्चे यश्चित्तस्य विकासः, तावन्मात्रे प्रपञ्चे संतोषः; असावेव अविशिष्टा, सर्वजनसाधारणरूपा; विद्या, किञ्चिज्ज्ञत्वरूपा अशुद्धविद्या; सैव स्वप्नो, भेदनिष्ठो विचित्रो विकल्पात्मा भ्रमः । तदुक्तं पातञ्जले

'ते[२८] समाधावुपसर्गा व्युत्थाने सिद्धयः ॥' (३-३७)

इति । तदेतत्

---

२८ ते प्रातिभादयः समाहितचित्तस्य उत्पद्यमाना उपसर्गाः, तद्दर्शनप्रत्यनीकत्वात्; व्युत्थितचित्तस्य उत्पद्यमानाः सिद्धय इत्यनुमीयते । तत्र योगजधर्मानुगृहीतेभ्यो मनः-श्रोत्र-त्वक्-चक्षुः जिह्वा घ्राणेभ्यो यथासंख्यं प्रातिभ श्रावण वेदन आदर्श आस्वाद वार्त्तानि जायन्ते । तत्र प्रातिभात् सूक्ष्मव्यवहितविप्रकृष्टातीतानागतज्ञानम्, श्रावणात् दिव्यशब्दज्ञानम्, वेदनात् दिव्यस्पर्शाधिगमः, आदर्शात् दिव्यरूपदर्शनम्, आस्वादात् दिव्यरससंवित्, वार्त्तात् दिव्यगन्धज्ञानम् । इदमत्र सूत्रभाष्ययोः प्रयोजनम् । व्युत्थितचित्तो हि ताः सिद्धीरभिमन्यते जन्मदुर्गत इव द्रव्यकणिकामपि द्रविणसंभारम्; योगिना तु समाहितचित्तेन उपनताभ्योऽपि ताभ्यो विरक्तव्यम् । अभिवांछित तापत्रयोत्पत्तिकोपशमरूप-परमपुरुषार्थः स खलु अथ तत्प्रत्यनीकासु सिद्धिषु विरज्येत इति ।

'अतो बिन्दुरतो[२९] नादो रूपमस्मादतो रसः ।
प्रवर्तन्तेऽचिरेणैव क्षोभकत्वेन देहिनः ॥'

इत्यनेन दर्शितम् ॥ ४ ॥

यदा तु आगतामपि मितसिद्धिं खिलीकृत्य परामेव स्थितिमवष्टभ्नाति योगी ततः—

विद्यासमुत्थाने स्वाभाविके खेचरी शिवावस्था ॥ ५ ॥

प्राङ्निर्दिष्टसतत्त्वाया विद्यायाः स्वाभाविके समुत्थाने, परमेशेच्छामात्रघटिते मितसिद्धि-न्यग्भाविनि सहजे समुन्मज्जने; खे बोधगगने चरति इति खेचरी मुद्रा अभिव्यज्यते । की-

---

२९ बिन्दु भ्रूमध्यादौ प्रदेशे ध्यानाभ्यासप्रकर्षप्रवर्धमानोत्तरोत्तर प्रसादं तेजोविशेष, यो बिन्दुभेदाभ्यासात् धरातत्त्वध्यायिनामभिव्यज्यते । तथा नादो वेगवन्नदीघनिर्घोषघनोपक्रम क्रमसूक्ष्मीभावाभिव्यज्यमानमधुमत्त मधुकरध्वनितानुकारी स्वोच्चरितो ध्वनिविशेष, य व्योमतत्त्वाभ्यासिन शृण्वन्ति । तथा रूप संतमसाद्यावरणेऽपि सति तत्तद्रूपवस्त्वाकारदर्शनं, यत् तेजस्तत्त्वे न्यस्तनिश्चलमतिभि निरीक्ष्यते । तथा रसो रसवद्भोग्यवस्तुविरहेऽपि अमृतास्वादो मुखे, यो रसनाग्र लम्बिकादिधारणानिरतै अप्तत्त्वध्यायिभिरुपलभ्यते । पवनतत्त्वध्यायिना स्पर्शसुखविशेषोऽपि अस्मादेव प्रवर्तते इति द्रष्टव्यम् । उन्मेषाभ्यासयोगिना नाम क्षोभिणा भाव्यम् निरुत्तरपदारोहप्रत्यूहभूतत्वात् ।

दृशी खेचरी, शिवस्य चिन्नाथस्य अवस्थातुः संबन्धिनी अवस्था, स्वानन्दोच्छलत्तारूपा। न तु

> 'बद्ध्वा पद्मासनं योगी नाभावक्षेश्वरं न्यसेत्।
> दण्डाकारं तु तावत्तन्नयेद्यावत्[३०]खत्रयम्॥
> निगृह्य तत्र तत्तूर्णं प्रेरयेत् खत्रयेण तु।
> एतां बद्ध्वा महायोगी खे गतिं प्रतिपद्यते॥'

इत्येवं संस्थानविशेषानुसरणरूपा; अपि तु

> '................................. पराम्।
> गतिमेत्यर्थभावेन [३१]कुलमार्गेण नित्यशः॥
> चरते सर्वजन्तूनां खेचरी नाम सा स्मृता।'

इति–श्रीतन्त्रसद्भावनिरूपितपरसंवित्तिस्वरूपा। एवमिह भेदात्मकमायीयसमस्तक्षोभप्रशान्त्या चिदात्मकस्वरूपोन्मज्जनैकरूपं मन्त्रवीर्यं मुद्रावीर्यं च आदिष्टम्। तदुक्तं कुलचूडामणौ

> 'एकं सृष्टि[३२]मयं बीजमेका मुद्रा च खेचरी।
> द्वावेतौ यस्य जायेते सोऽविशान्तपदे स्थितः॥'

---

३० खे शिरसि खत्रय, शक्ति-व्यापिनी समनारूपमाकाशत्रयं भ्रूबिन्दोः प्रभृति यावत् ब्रह्मरन्ध्रं सुस्थितम्। तत्र तत् मनः अवष्टभ्य खत्रयेण ऊर्ध्वगमनाय प्रेरयेदिति।

३१ कुलमार्गेण, अथकुलद्वारेणेत्यर्थः।

३२ सृष्टिमय बीजमिति, मन्त्रवीर्यरूपम् अहमिति बीजम्। मुद्रा, परभैरवीयात्मा।

इति । स्पन्दे तु मन्त्रवीर्यस्वरूपनिरूपणेनैव मुद्रावीर्यं संगृहीतम् ।

'यदा क्षोभः प्रलीयेत तदा स्यात्परमं पदम् ।'

इत्यर्धेन अन्यपरेणापि चूडामण्युक्तं खेचरीस्वरूपं भङ्ग्या सूचितम् ॥ ५ ॥

तदत्र मुद्रामन्त्रवीर्यासादनेऽपि—

गुरुरुपायः ॥ ६ ॥

गृणाति उपदिशति तात्त्विकमर्थमिति गुरुः; सोऽत्र व्याप्ति[33]प्रदर्शकत्वेन उपायः । तदुक्तं श्रीमालिनीविजये

'स गुरुर्मत्समः प्रोक्तो मन्त्रवीर्यप्रकाशकः ।'

इति । स्पन्दे तु एवमादि[34]प्रसिद्धत्वात् न संगृहीतम् ।

'अगाधसंशयाम्भोधिसमुत्तरणतारिणीम् ।
वन्दे विचित्रार्थपदां चित्रां तां गुरुभारतीम् ॥'

इति-पार्यन्तिकोक्त्या च एतदपि संगृहीतमेव ।

---

३३ व्याप्तिरत्र मुद्रावीर्य-मन्त्रवीर्यस्वरूपा ।

३४ गुर्वादिवचनादेरित्यर्थः । तथा अन्यत्रापि

'यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः ।
उभयोरन्तरं नास्ति गुरोरपि शिवस्य च ॥'

इति ।

गुरुर्वा पारमेश्वरी अनुग्राहिका शक्तिः । यथोक्तं श्रीमालिनीविजये

'शक्तिचक्रं तदेवोक्तं गुरुवक्त्रं तदुच्यते ।'

इति । श्रीमन्त्रिशिरोभैरवेऽपि

'गुरोर्गुरुतरा शक्तिर्गुरुवक्त्रगता भवेत् ।'

इति । सैव अवकाशं ददती उपायः ॥ ६ ॥

तस्माद्गुरोः प्रसन्नात्—

मातृकाचक्रसंबोधः ॥ ७ ॥

शिष्यस्य भवतीति शेषः । श्रीपरात्रिंशकादिनिर्दिष्टनीत्या अहंविमर्शप्रथमकला[35] अनुत्तराकुलस्वरूपा, प्रसरन्ती आनन्दस्वरूपा[36] सती, इच्छेशानभूमिकाभासनपुरःसरं[37], ज्ञानात्मिकामुन्मेषदशां ज्ञेयाभासासूत्रणाधिक्येन च ऊनतां[38]

३५ इह खलु अनाख्यपरामर्शात्मा अनुत्तर शिवशक्त्यादिप्रतिनियतव्यपदेशासहिष्णु परप्रकाश एव पर तत्त्व, स एव च स्वातन्त्र्यात् विश्वमवविभासयिषु स्वात्मनि शिवशक्तिरूपतामवभासयति, तस्य शिवलक्षणस्य तत्त्वस्य अव्यभिचरितस्वभावा पूर्णाहन्तात्मा अनुत्तरा कुलस्वरूपा शक्तिरस्तीति । एव च अकारलक्षण कुल शरीरमस्य इति आद्यवर्णोऽभिहित ।

३६ आकाररूपा ।

३७ इरूपाम्, ईरूपा च । इच्छान्त तावत् अह विमर्श एव प्रथमकलारूप इत्यर्थ ।

३८ उन्मेषदशाम् उकाररूपाम्, ऊनताम् ऊकाररूपाम् ।

प्रदर्श्य, इच्छामेव द्विरूपां[३९] विद्युद्विद्योतनकल्पतेजोमात्ररूपेण, स्थैर्यात्मना च एषणीयेन रञ्जितत्वात् र-लश्रुत्या आरूपितेन, अत एव स्वप्रकाशात्मीकृतमेयाभासत्वतः अमृतरूपेण, मेयाभासारूपणमात्रतश्च बीजान्तरप्रसवासमर्थतया, षण्ढाख्यबीजचतुष्टयात्मना रूपेण प्रपञ्च्य, प्रोक्तानुत्तरानन्देच्छासंघट्टेन त्रिकोणबीजम्,[४०] अनुत्तरानन्दोन्मेषयोजनया च क्रियाशक्त्युपगमरूपमोकारं,[४१] प्रोक्तैतद्बीजद्वयसंघट्टेन[४२] षट्कोणं शूलबीजं[४३] च, इच्छाज्ञानशक्तिव्याप्तपूर्णक्रियाशक्तिप्रधानत्वात् शक्तित्रयसंघट्टनमयं प्रदर्श्य, इयत्पर्यन्तविश्वैकवेदनरूपं विन्दुमु-

---

३९ यथा विद्युतो विद्योतनं तस्या एव मनाक् आधिक्यम्, तथा सैव इच्छा ऋकारतामापन्ना विद्युदिव, तस्या एव विद्योतनं मनागाधिक्यं च ॠ इति, र-श्रुतिश्च वह्निबीजं तेजोरूपम्। एवं विद्युत्कल्पा एव इच्छा ऌ इति, तस्या विद्योतनकल्पं ॡ इति मनागधिकं, ल-श्रुतिश्च स्थैर्यात्म पृथिवीबीजम्। एवं तेजःस्थैर्यरूपेण एषणीयेन इच्छाया रञ्जितत्वात् षण्ढस्वराणां चतुर्णां तेजोमात्ररूपे र-श्रुतौ, स्थैर्यरूपे ल-श्रुतौ वा सामर्थ्यं द्वितय एव, नान्यत्र इति।

४० त्रिकोणबीजम् एकारः, स एव योनिबीजमिति।

४१ त्रिशूलषट्कोणबीजरूपम्।

४२ ए-ओ इत्येतद्बीजद्वयम्।

४३ त्रिशूलबीजम् ऐ औ इत्येतयोरन्यतमदिति।

न्मील्य, युगपदन्तर्वहिर्विसर्जनमयविन्दुद्वयात्मानं विसर्गभूमिमुद्दर्शितवती, अत एव अन्तर्विमर्शनेन अनुत्तरे एव एतद्विश्वं विश्रान्तं दर्शयति, वहिर्विमर्शेन तु कादि-मान्तं पञ्चकपञ्चकं अ-इ-उ-ऋ-ऌशक्तिभ्यः[४४] पुरुषान्तं समस्तं प्रपञ्चयति । एकैकस्याश्च शक्तेः पञ्चशक्तित्वमस्ति, इत्येकैकतः पञ्चकोदयः । आभ्य एव शक्तिभ्यः[४५] शिक्षोक्त[४६]संज्ञानुसारेण अन्तः-पुंभूमौ नियत्यादिकञ्चुकत्वेन अवस्थानात् अन्तस्थाख्यान्प्रमातृभूमिधारणेन विश्वधारणात् धारणाशब्देन आम्नायेषु उक्तान्, तदुपरि भेदविगलनेन अभेदापत्त्या उन्मिषितत्वात् ऊष्माभिधानान् चतुरो वर्णानाभासितवती । अत्र[४७] च अन्ते सर्वसृष्टिपर्यन्तवर्ति परिपूर्णममृतवर्ण[४८]

४४ चिदानन्देच्छाज्ञानक्रिया इति पञ्च शक्तयः वर्णसनिवेशोल्लासिका इत्यर्थः ।

४५ उक्तचिदादिभ्यः सर्ववर्णमूलभूताभ्यः इत्यर्थः ।

४६ व्याकरणादि शिक्षोक्तक्रमेण प्रमातृभूमौ नियति कला विद्या-राग इत्यादिभिः अन्तरवतिष्ठमानत्वात् अन्तःस्थसंज्ञामुपलभमानान् य-र ल व इत्यादीन् वर्णान् प्रथमकल्पेव आभासितवती इति भावः ।

४७ अत्रेति ऊष्माक्षरेषु श-ष-स ह इत्येतेषु ।

४८ मेयरूप भोग्यम् ।

-प्रदर्श्य, तदन्ते प्राणबीजप्रदर्शनं कृतम्; तत् अनुत्तरशक्त्याप्यायितानाहतमयम्[49], इयद्वाच्य-वाचकरूपं षडध्वस्फारमयं विश्वम्[50]; इति प्रत्यभिज्ञापयितुम् । अत एव प्रत्याहारयुक्त्या अनुत्तरानाहताभ्यामेव शिवशक्तिभ्यां गर्भीकृतम् एतदात्मकमेव विश्वम्; इति महामन्त्रवीर्यात्मनोऽहंविमर्शस्य तत्त्वम् । यथोक्तमस्मत्परमेष्ठिश्रीमदुत्पलदेवपादैः

'प्रकाशस्यात्मविश्रान्तिरहंभावो हि कीर्तितः ।
उक्ता सैव च विश्रान्तिः सर्वापेक्षानिरोधतः ॥
स्वातन्त्र्यमथ कर्तृत्वं मुख्यमीश्वरतापि च ।'

इति । तदियत्पर्यन्तं यन्मातृकायास्तत्त्वं तदेव ककार-सकारप्रत्याहारेण अनुत्तरविसर्गसंघट्टसारेण कूटबीजेन प्रदर्शितमन्ते[51]; इत्यलं रहस्यप्रकटनेन । एवं-विधायाः

'...................न विद्या मातृकापरा ।'

इत्याम्नायसूचितप्रभावाया मातृकायाः संव-

---

४९ ह-कलात्मकम् ।

५० वाचकं मन्त्र-वर्ण-पदात्मरूप, वाच्य कला-तत्त्व-भुवनात्मरूपम् ।

५१ अनुत्तरात्मकः ककारः, विसर्गात्मकः सकारः, तत्संघट्टात्मा च इति कूटवर्णः ।

न्धिनश्चक्रस्य प्रोक्तानुत्तरानन्देच्छादिशक्तिसमूहस्य चिदानन्दघनस्वस्वरूपसमावेशमयः सम्यक् बोधो भवति। एतच्चेह दिङ्मात्रेणोट्टङ्कितम्[५२]। विततं तु अस्मत्प्रभुपादैः श्रीपरात्रिं-

५२ उट्टङ्कित सूचितम्। तथा च अयमत्र स्फुटो वर्णनिर्णयः। अ-इति अनुत्तरप्रथमकला अकुलस्वरूपा पूर्णाहन्ता। आ इति तस्यामेव विश्रान्तिः, अत एव अकारद्वयमेलापनस्वरूपा आनन्दशक्तिः। इ-इति शिवसामरस्यरूपे संघट्टे बहिरुल्लिलसिषारूपा अघोराख्या इच्छाशक्तिः। ई इति सैव ईशित्री सती स्वात्मविश्रान्तेव, अत एव इकारद्वितयसंधिरूपता। उ इति इच्छाया बहिरौन्मुख्ये सति विश्वोन्मेषरूपा ज्ञानशक्तिः। ऊ इति तस्या दर्पणनगरवत् अभिन्नायां सत्यां ज्ञेयस्याधिक्यात् संवित्तत्त्वस्य ऊनतावभासित्वम्। ऋ ॠ-इति इच्छायाः खलु द्विप्रकारायाः शून्यभुवमधिशयानाया ज्ञानशक्तिसाचिव्येन तेजःस्पर्शित्वात् र श्रुत्या विद्युद्वत् विद्योतनवच्च अवभासित्वम्। ऌ-ॡ-इति तस्या एव अत्यन्तं शून्यभुवि प्रसरन्त्याः किंचित् ज्ञानशक्तिराहित्येन काष्ठपाषाणरूपतामिव आददानाया ल-श्रुत्या स्थैर्यात्मकत्वेन विद्युद्विद्योतनकल्पमवभासनम्, अत एव स्वात्ममात्रविश्रान्तित्वेन एषाममृतात्मकत्वम्; बहिरौन्मुख्याभावात् बीजान्तरप्रसवासमर्थत्वेन नपुंसकताव्यपदेशः। ए इति अनुत्तरानन्दयोरिच्छाया प्रसरतोः अनुत्तरप्राधान्यात् त्रिकोणबीजम्, इच्छाज्ञानक्रियाणा साम्यात्। ऐ इति तयोरेव इच्छायामीशित्र्या च अत्यन्तप्रसरणात् दीर्घीभवन, मात्राधिक्यात्। ओ इति अनुत्तरानन्दयोः बहिरुल्लिलसिषुमिच्छया ज्ञानशक्तौ विश्वोन्मेषावस्थाया प्रसरणरूपम्। औ-इति अस्यैव अत्यन्त दैर्घ्यात् इच्छाज्ञानक्रियाणां स्फुटतया त्रिशूलबीजत्वम्। अं इति एवमियत्पर्यन्तस्य विश्वस्य वेदनात्मकत्वेन बिन्दुतया प्रथम शक्तिमत्परामर्शः। अः-इति पूर्वोक्तस्य अनुत्तरस्यैव आनन्दशक्त्यविभक्तस्य विसर्गरूपतया शक्ति-

शक्तिविवरण-तन्त्रालोकादौ प्रकाशितम् । उक्तं च श्रीसिद्धामृते

'[53]सात्र कुण्डलिनी बीजजीवभूता चिदात्मिका ।
तज्जं ध्रुवेच्छोन्मेषाख्यं त्रिकं वर्णास्ततः पुनः ॥

---

प्राधान्यपरामर्शः। परमेश्वरस्य शक्तयः पञ्च । तासामेकैकस्याः अपि शक्तेः पञ्चकयोगः । तेन अनुत्तरात् प्रसृतस्य कवर्गस्य, इच्छायाः स्वरूपस्थाया जातस्य चवर्गस्य, अलुब्धलुब्धात्मद्विप्रकाराया इच्छाया उद्भूतस्य टवर्गस्य तवर्गस्य च, उन्मेषात् उत्पन्नस्य पवर्गस्य पञ्चकत्वम्। तत्र अवर्गस्य अधिष्ठात्री ब्राह्मी। कवर्गस्य माहेश्वरी, पृथ्वी-जल-तेजो-वायु-आकाशानि इति भूतपञ्चकस्वभावता च । चवर्गस्य वाराही अधिष्ठात्री, गन्ध-रूप-रस-स्पर्श-शब्दाः इति तन्मात्रपञ्चकत्वं च। टवर्गस्य अधिष्ठात्री कौमारी, उपस्थ-पायु-पाद-पाणि-वाचः इति कर्मेन्द्रियपञ्चरूपता च । तवर्गस्य अधिष्ठात्री चामुण्डा, घ्राण-जिह्वा-चक्षुः-त्वक्-श्रोत्राणि इति ज्ञानेन्द्रियपञ्चकत्वं च। पवर्गस्य अधिष्ठात्री चर्चिका, मनो-बुद्धि-अहंकार-प्रकृति-पुरुषतत्त्वानि इति पञ्चकत्वं च। अन्तस्थानां नियति राग-कला-विद्यातत्त्वचतुष्कत्वम्, माया-कालयोरत्रैव अन्तर्भावः । श-ष-सकाराणामीश्वर-सदाशिव-शक्तित्वम् । ह-इति पूर्वोक्तस्य विसर्गस्यैव स्थूलता । तदेवमनुत्तर-हकारयोः प्रत्याहारे निखिल वाच्यवाचकमयं षडध्वरूप विश्वम् अनुत्तर एव विश्राम्यति, इति-दर्शयितुम् अनुत्तरात्मकस्य ककारस्य, षकारस्य च शक्तिमयस्य सङ्घट्टात्मतया कूटबीजस्य अन्ते प्रदर्शनं कृतमिति वर्णनिर्णयः ।

[53] सा पारमेश्वरी संविन्मात्ररूपा विसर्गशक्तिरेव गर्भीकृतनिखिल-विश्वत्वात् कुण्डलिनीशब्दव्यपदेश्या अनच्ककलारूपा वाच्यवाचकात्मनि अस्य विश्वस्य अपि आदेः तत्कारणत्वे दूरापास्तत्वात् बीजभूता; तत्त्वेऽपि संविद्रूपत्वात् सर्वेषामपि जीवानां जीवभूता; नहि संविदमन्तरेण किञ्चिदपि स्फुरेदिति भावः। तदेवं-विधायाश्च तस्याः प्रकाशात् अनुत्तरेच्छोन्मेषा-ख्यं परामर्शत्रयं जातम्; तच्च परामर्शत्रयात् उत्पन्नान्या निखिल-वर्णमालोत्पत्तिः ।

१

आ इत्यवर्णादिर्योदि यावद्वैसर्गिकी कला ।
ककारादिसकारान्ताद्विसर्गात्पञ्चधा स च ॥
वहिश्चान्तश्च हृदये नादेऽथ परमे पदे ।
विन्दुरात्मनि मूर्धान्ते हृदयाद्व्यापको हि सः ॥
ओंदिमान्त्यविहीनास्तु मन्त्राः स्युः शरदभ्रवत् ।

---

५४ एकः इति शब्दः स्वरूपपरामर्शकः, अपरः प्रकारे; तेन अनुत्तरात् आनन्दो यथा जात', एवमिच्छातः ईशित्री; उन्मेषादूनता; यावत् ककारादिः सकरान्तो यस्याः एव विधा हकारात्मिका वैसर्गिकी कला जाता, निखिलमेव वर्णजातमुदितमित्यर्थः । सकारान्तेति वक्तव्ये ककारादि इत्यतःप्रभृति सकारपर्यन्त व्यञ्जनरूपस्य, कवर्गस्य अनुत्तरात् जन्मापि द्योतयितुमुक्तम् । 'अ कु ह विसर्जनीयाना कण्ठः' इत्यादिनीत्या कवर्गहकारविसर्जनीयानामकारादेव उत्पत्तिः । 'वैसर्गिकी कला' इति सामान्योक्तेः परापरो हि विसर्जनीयात्मा विसर्गः कटाक्षितः । एतच्च सर्वं विसर्गादुत्पन्न, विसर्ग एव तत्तदामर्शात्मना स्फुरित इत्यर्थः । स एव हि परप्रमात्रेकरूपोऽशेषविश्वक्रोडीकारेण अनुत्तरहकारात्मना प्रस्फुरन् अन्तर्बहीरूपतया नर शक्ति शिवात्मतामाभासयेत्; अत आह 'पञ्चधा स च' इति । चो हेतौ, यतः स विसर्ग एव विन्दुः, विदिक्रियायां स्वतन्त्र. प्रमाता वहीरूपतया हृदये नररूपतया, बहीरूपत्वेऽपि अन्तारूपतायामेव विश्रान्तेः, नादे शक्तितया, अन्तारूपतया परमे पदे द्वादशान्ते शिवतया, प्रस्फुरन् पञ्चप्रकारः । अत एव शरीरेऽपि हृदयात् मूर्धान्त हृत्कण्ठ ललाट-शक्त्यन्त द्वादशान्तेषु अर्थात् व्यवस्थितः । एव पञ्चधात्वेऽपि अस्य वस्तुतः त्रैरूप्ये एव पर्यवसानमिति न पूर्वापरव्याहतत्व किंचिदाशङ्कनीयम् । ननु एक एव असौ कथ हृदादौ वर्तते ? इत्यत आह 'व्यापको हि सः' इति । आ इत्यवर्णेति पद्यद्वयस्यार्थो निर्दिष्टः ।

५५ न केवल मातृकाया एव परमन्त्रवीर्यात्मत्वेन अशातायाः नैष्फल्य, यावत् मननत्राणधर्माणा मन्त्राणामपि इत्याह आदिमेति,

[५६]गुरोर्लक्षणमेतावदादिमान्त्यं च वेदयेत् ॥
पूज्यः सोऽहमिव ज्ञानी भैरवो देवतात्मकः ।
श्लोक[५७]गाथादि यत्किञ्चिदादिमान्त्ययुतं यतः ॥
तस्माद्विदंस्तथा सर्वं मन्त्रत्वेनैव पश्यति ।'

इति । एतच्च स्पन्दे

'[५८]सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी ।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका ॥'

इत्यनेनैव भङ्ग्या सूचितम् ॥ ७ ॥

---

तुशब्दः चार्थे । आदिमः अनुत्तरः, अन्त्यो हकारः, तेन मन्त्राः अहं-परामर्शरूपादिमान्त्यविहीनाः तद्रूपत्वेन अपरिज्ञायमानाः शरदभ्रवत् स्युः, अकिंचित्करा एव इत्यर्थः । अन्यथा पुनः अहं-परामर्शात्म-परमन्त्रवीर्यात्मत्वेन परिज्ञायमानाः तत्तत्स्वकार्यकारिणो भवेयुः इति तात्पर्यार्थः ।

५६ एतत्परिज्ञानमेव गुरोर्मुख्यं लक्षणमित्याह गुरोरिति । एवं-शान्त्यादियोगात् द्योतनस्वभावो विश्वनिर्भरः अहमिव सर्वेषां पूज्यः, इति भगवदुक्तिः ।

५७ एवं-विधो गुरुः न केवलं स्वभावत एव परिस्फुरत्परशक्तिवीर्यात्मनो मन्त्रानेव वेत्ति, यावत् किंचन लौकिकमपि श्लोकादि, इत्याह श्लोकेति । स खलु गुरुः तस्मात् निरतिशयज्ञानयोगात् सर्वं यत्किंचन बाह्य श्लोकादि तथा अहं-परामर्शत्वेन परामृशन्, मन्त्रत्वेनैव सर्ववेत्तृत्वात्मकमनन-संसारभयत्रुसात्मक-त्राणरूपकार्यकारितया साक्षात्करोति, यतः तदपि आद्यमान्त्ययुतम् अहंपरामर्शरूपमेव इत्यर्थः । नहि प्रकाशात्मपरप्रमातृरूपतामन्तरेण किंचिदपि स्फुरेदिति भावः ।

५८ मातृकातत्त्वपरिज्ञानवतामेव योगिनाम् इयं शक्तिः भुक्तिमुक्तिलक्षणां सिद्धिं यच्छेत्, अन्यथा तत्तद्वाचकानुवेधद्वारेण हर्षशोकादिरूपतामादधाना बन्धकारिणी एव पशूनाम्, इति भुक्तिमुक्तिलक्षणस्य योगात् निष्फलैव भवेदिति पिण्डार्थः ।

ईदृशस्य अस्य मातृकाचक्रसंबोधवतः—

## शरीरं हविः ॥ ८ ॥

सर्वैर्यत्प्रमातृत्वेन अभिषिक्तं स्थूलसूक्ष्मादिस्वरूपं शरीरं तत् महायोगिनः परस्मिन् चिदग्नौ हूयमानं हविः, शरीरप्रमातृताप्रशमनेन सदैव चिन्मातृताभिनिविष्टत्वात् । यदुक्तं श्रीविज्ञानभैरवे

'महाशून्यालये वह्नौ भूताक्षविषयादिकम् ।
हूयते मनसा साकं स होमः स्रुक्च चेतना ॥'

इति । श्रीतिमिरोद्घाटेऽपि

'यः प्रियो यः सुहृद्बन्धुर्यो दाता योऽतिवल्लभः ।
तदङ्गभक्षणाद्देवि ह्युत्पतेद्गगनाङ्गना ॥'

इति । अत्र हि देहप्रमातृताप्रशमनमेव पिण्डार्थः । श्रीमद्भगवद्गीतास्वपि

---

५९ महाशून्यस्य, शून्यातिशून्यपदस्य आ समन्तात् लयो यत्र परतत्त्वात्मनि वह्नौ, तत्र भूतेन्द्रिय विषय-भुवन-तत्त्वादिरूपं जगत् तद्विभागकल्पनाहेतुना मनसा सह, चेतना विश्वानुसंधात्री शक्तिरेव स्रुक् तया, हूयते यत् स होमः, अग्नौ हविर्दानमित्यर्थः । 'चितिः स्रुक् चित्तमाज्यम्' इत्यादि श्रुतेः ।

६० स्वात्मार्पणानुकूल्यस्य आश्रयभूतेषु प्रिय पुत्रादि-रूपेषु धर्मिषु स्थितानां प्रियत्वादिधर्मरूपाणामङ्गानां भक्षणात्, तदहन्तादिप्रशमनात् योगी मत्स्यपलादि भुङ्क्ते इत्यर्थः ।

'सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥'[61]

इति । स्पन्दे तु

'यदा क्षोभः प्रलीयेत तदा स्यात्परमं पदम् ।'

इत्यनेनैव संगृहीतम् । क्षोभो देहाद्यहंप्रत्ययरूपः, इति हि तद्वृत्तौ भट्टश्रीकल्लटः ॥ ८ ॥

अस्य च—

## ज्ञानमन्नम् ॥ ९ ॥

यत्पूर्वं 'ज्ञानं बन्धः' (१—२) इत्युक्तं तत् अद्यमानत्वात्, ग्रस्यमानत्वात् योगिनामन्नम् । यत्संवादितं प्राक्

'मृत्युं च कालं च कलाकलापं
विकारजातं प्रतिपत्तिसात्म्यम् ।
ऐकात्म्य-नानात्म्यवितर्कजातं
तदा स सर्वं कवलीकरोति ॥'

इति ।

[62]अथ च यत्स्वरूपविमर्शात्मकं ज्ञानं तत्

६१ सर्वान् इन्द्रियव्यापारान्, मानसान्, मुखनासिकानिर्गमनादीन् वायवीयान् व्यापारान् च आत्मनो मनस. संयमहेतौ योगनाम्नि ऐकाग्र्य-वह्नौ सम्यक् ज्ञानपरिदीपिते निवेशयन्ति, गृह्यमाण विषय संकल्प्यमान वा तदेकाग्रतयैव परित्यक्तान्यव्यापारतया शुद्ध्या गृह्णन्ति इति तात्पर्यम् ।

६२ उत्तार्थविषये अर्थान्तरमादिशति ।

अस्य अन्नं, पूर्णपरितृप्तिकारितया स्वात्मविश्रान्तिहेतुः । तदुक्तं श्रीविज्ञानभैरवे

'अन्नैकर्तमे[63]युक्तिस्थे योत्पद्येत दिनादिनम् ।
भरिताकारिता सात्र तृप्तिरत्यन्तपूर्णता ॥'

इति । युक्तिर्हि[64] तत्र द्वादशोत्तरशतभूमिकाज्ञानरूपैव । एतच्च स्पन्दे

'प्रबुद्धः[65] सर्वदा तिष्ठेत्................... ।'

इत्यनया कारिकया संगृहीतम् ॥ ९ ॥

यदा तु एवं सततावहितो न भवति, तदा ज्ञानवतोऽपि अस्य अवधानावलेपात्—

विद्यासंहारे तदुत्थस्वप्नदर्शनम् ॥ १० ॥

प्रोक्तज्ञानस्फाररूपायाः शुद्धविद्यायाः संहारे, निमज्जने, तदुत्थस्य, क्रमात्क्रमन्यकृतविद्यासंस्कारस्य स्वप्नस्य, भेदमयस्य विकल्पप्रपञ्चरूपस्य दर्शनं, स्फुटम् उन्मज्जनं भवति। तदुक्तं श्रीमालिनीविजये

---

६३ द्वादशोत्तरशतभूमिकासु एकतमस्या भूमिकाया समाहितमनसो योगिनो या विश्वभरितात्म भैरवावस्था सा तृप्तिरित्यर्थः ।

६४ शाम्भव शाक्ताणवाख्योपायत्रयस्य भिन्नतया निर्दिष्टत्वात् इयत्संख्याक-भूमिकामत्ययात्मिका ।

६५ असंकुचितस्वातन्त्र्यशक्ति रित्यर्थं ।

'न चैतदप्रसन्नेन शङ्करेणोपदिश्यते ।
कथञ्चिदुपदिष्टेऽपि वासना नैव जायते ॥'

इत्युपक्रम्य

'वासनामात्रलाभेऽपि योऽप्रमत्तो न जायते ।
तमनित्येषु भोगेषु योजयन्ति विनायकाः ॥'[66]

इति । तदेतत्

'अन्यथा तु स्वतन्त्रा स्यात्सृष्टिस्तद्धर्मकत्वतः ।
सततं लौकिकस्येव जाग्रत्स्वप्नपदद्वये ॥'[67]

इत्यनेन स्पन्दे संगृहीतम् । अतश्च नित्यं शुद्धविद्याविमर्शनपरेणैव योगिना भाव्यम् इत्युपदिष्टं भवति । यथोक्तम्

---

६६ विनायकाः तत्तद्दिव्यगण-दिव्यभोगभूमिकाद्यधिष्ठातारः परसिद्धिविरोधयुक्ताः, ऋतम्भरप्रज्ञावतो ब्राह्मणस्य सत्त्वशुद्धिमनुपश्यन्तः स्थानैरुपनिमन्त्रयन्ते । भो इहास्यतां, कमनीयोऽयं भोगः, कमनीयेयं कन्या, रसायनमिदं जरामृत्यू बाधते, वैहायसमिदं यानं, अमी कल्पद्रुमाः, पुण्या मन्दाकिनी, सिद्धा महर्षयः, उत्तमा अनुकूला अप्सरसः, दिव्ये श्रोत्रचक्षुषी, वज्रोपमः कायः, स्वगुणैः सर्वमिदमुपार्जितमायुष्मता, प्रतिपद्यतामिदमक्षय्यमजरममरस्थानं देवानां प्रियम्, इति पातञ्जलदर्शनोपक्रमकारेण सविनयादरपूर्वं दिव्यवस्तुगुणानुकीर्तनतत्प्रदर्शनेन योगिनमनित्यभोगेषु प्रलोभयन्ते । तस्मात् परसिद्धिमात्रो मत्पूर्वभूतत्वात् भोगेभ्यो विरज्येतेति भावः ।

६७ एकस्य स्वतन्त्रपरमेशितुः ममैव इदं विश्वम्-इति विश्वमरितप्रतिमरूपप्रमाधानपरित्यागेन योगिनः पदद्वये प्रसरद्रूपक्रियात्मकतया विविधप्रमदानसमर्थं नानाभाववैचित्र्यनिर्माणं पयोधिव दुर्निवारप्रसरं सृष्टिः नीलसुखादिरूपस्यैव अथ स्वापत्तीक्रियते इत्यर्थः । समाहितचेतसस्तु तत्र ज्ञानरूपा समावेशेन स्फुरन्ती पारमेश्वरी शक्तिः चिन्मयस्वरूपापत्तिमनिरुन्धाना न प्रभवति इति भावः ।

'तस्मात्तेषु संसक्तिं कुर्वीतोत्तमवाञ्छया ।'

इति–श्रीपूर्वे । श्रीस्पन्देऽपि

'अतः सततमुद्युक्तः स्पन्दतत्त्वविविक्तये ।
जाग्रदेव निजं भावमचिरेणाधिगच्छति ॥'

इति । एवं 'चित्तं मन्त्रः' (२–१) इत्यतः प्रभृति मन्त्रवीर्य-मुद्रावीर्यानुसंधिप्रधानम्

'उच्चाररहितं वस्तु चेतसैव विचिन्तयन् ।
यं समावेशमाप्नोति शाक्तः सोऽत्राभिधीयते ॥'

इत्याम्नातं शाक्तोपायं विविच्य, अवधानावलिप्तं प्रति 'विद्यासंहारे तदुत्थस्वप्नदर्शनम्' (२–१०) इति सूत्रेण एतदनुषङ्गेण आणवोपायप्रतिपादनस्य अवकाशो दत्तः । इति शिवम् ॥ १० ॥

आदितः सूत्रसंख्या ॥ ३२ ॥

इति श्रीमन्माहेश्वराचार्याभिनवगुप्तपादपद्मोपजीवि-श्रीक्षेमराजविरचितायां शिवसूत्रविमर्शिन्यां शाक्तोपायप्रकाशनं नाम द्वितीय उन्मेषः ॥ २ ॥

---

६८ शाक्ततत्त्वस्य स्वरूपाविर्भावाय सततमुद्युक्तानो जागरावस्थायामेव निरावरणचिद्रसघनभैरवपरमार्थसत्ता संवेदयते इति ।

६९ इदैकाग्र्येण विमर्शनविषयीकुर्वन् ।

७० भेदमयप्रपञ्चदर्शनस्य निमज्जने च उपाय इति प्रसंगेन ।

# शिवसूत्रविमर्शिनी ।

अथ

## तृतीयोन्मेषारम्भः ।

इदानीमाणवोपायं[1] प्रतिपिपादयिषुः, अणोः तावत्स्वरूपं दर्शयति—

**आत्मा चित्तम् ॥ १ ॥**

यदेतत् विषयवासनाच्छुरितत्वात् नित्यं त[2]दध्यवसायादिव्यापारबुद्ध्यहङ्कृन्मनोरूपं चित्तं, तदेव अतति[3], चिदात्मकस्वस्वरूपाख्यात्या स[4]त्त्वादिवृत्त्यवलम्बनेन योनीः संचरति, इति

---

१ आणवोपायो नाम पाशवव्यापारः । यदा तु असौ विकल्पः स्वसंस्कारार्थमुपायान्तरमपेक्षते, तदा बुद्धिप्राणादिकान् परिमितरूपान् उपायत्वेन गृह्णन् अणुत्व प्राप्त आणव ज्ञानमाविर्भावयति । तत् हि चित्तविश्रान्त्यात्मकम् । यदुक्तम्

'पूर्वे विसृज्य सकल कर्तव्य शून्यतानले ।
चित्तविश्रान्तिसंज्ञोऽयमाणवः परिकीर्तितः ॥'

२ तदिति तेषां विषयाणां निश्चयाभिमानविकल्पाः ।

३ अत सातत्यगमने इति पाठात् ।

४ प्रकाशचाञ्चल्यावरणादीनां सत्त्वादिगुणकार्याणां वृत्त्याश्रयेण, प्रकाशो बुद्धिव्यापारः, चाञ्चल्यं मनसः, आवरणमहंकृतेः ।

आत्मा अणुरित्यर्थः। न तु चिदेकरूपस्य अस्य अतनमस्ति। अत एव 'चैतन्यमात्मा' (१-१) इति-स्वभावभूततात्त्विकैतत्स्वरूपप्रतिपादनाशयेन पूर्वमात्मा लक्षितः। इदानीं तु एतदीयसंकोचावभासप्रधानाणवदशौचित्येन, इति न पूर्वापरवैषम्यम्॥ १॥

अस्य चित्तस्वरूपस्य अणवात्मनः—

## ज्ञानं बन्धः॥ २॥

सुखदुःखमोहमयाध्यवसायादिवृत्तिरूपं तदुचितभेदावभासनात्मकं यत् ज्ञानं, तत् बन्धः। तत्पाशितत्वादेव हि अयं संसरति। तदुक्तं श्रीतन्त्रसद्भावे

'सत्त्वस्थो राजसस्थश्च तमस्थो गुणवेदकः।
एवं पर्यटते देही स्थानात्स्थानान्तरं व्रजन्॥'

इति। एतदेव

'तन्मात्रोदयरूपेण मनोऽहंबुद्धिवर्तिना।

---

५ नहि वस्तुतो नित्यविमुबुद्धस्वरूपस्य आत्मनः क्वचित् देशाद्यन्तरे गतिरित्यर्थः।

६ अध्यवसायो निश्चयः, आदिना विकल्पनाभिमानादि गृह्यते।

७ तन्मात्राणि स्थूलभूतकारणभावेन ईश्वरेच्छयैव अवभासिताः सूक्ष्माः शब्दादयः, तेषामुदयः स्थूलशरीरभावपरिणताकाशाद्यात्मना

पुर्यष्टकेन संरुद्धस्तदुत्थं प्रत्ययोद्भवम् ॥
भुङ्क्ते परवशो भोगं तद्भावात्संसरेत्....।'

इत्यनेनानूदितम् ।

'..................................अतः ।
संसृतिप्रलयस्यास्य कारणं संप्रचक्ष्महे ॥'

**इत्येतत्प्रतिविधानाय[९] स्पन्दशास्त्रे ॥ २ ॥**

---

अभिव्यक्ति', तथा च यद्यत् नाड्यादि सुषिर तदाकाश शब्दतन्मात्रोदयः । यद्यत् सक्रिय प्राणादि स वायुः स्पर्शतन्मात्रोदयः । यद्यत् उष्णभास्वरादिरूपमग्न्यादि तत्तेजो रूपतन्मात्रोदयः । यद्यत् द्रवरूप रुधिरादि ता आपः रसतन्मात्रोदय' । यद्यत् कठिन मांसास्थिस्नाय्वादि सा पृथिवी गन्धतन्मात्रोदयः इति तन्मात्रोदयो रूपमाकारो यस्य तेन, मनोऽहङ्बुद्धिवर्तिना अनुभूयमानस्य आत्मलाभोऽनुभवश्च अन्तःकरणनिविष्टः, इति मनसि रजोगुणोदये, अहङ्कारे तमोगुणोदये, बुद्धौ च सत्त्वगुणोदयरूपाया वृत्तिर्वर्तन यस्य तादृशेन, पुर्यां सूक्ष्मशरीरे तन्मात्रपञ्चक गुणत्रयमिति स्थूलशरीरकारणभूतमष्टक यत् संनिविष्ट तन्मुख्य पुर्यष्टक, तत्कार्यत्वात् स्थूलमपि शरीर, तेन संरुद्धः तावन्मात्रमेव आत्मत्वेनाभिमन्यमानो विस्मृतसर्वात्मकत्वादिस्वसामर्थ्यवशात् बद्धः, अत एव परवशः सर्वशक्तिस्वभावव्यतिरिक्त कारणान्तराधीनसकलसमीहितार्थसिद्धत्वात् अस्वतन्त्र' सन्, भोग मायाभाधितानादिनिजकर्मोपचित-वासनानुगुण-सुखादिसंवेदनात्मकतया पर्यवसित स्वविषयमात्र पुर्यष्टकोद्भूत देहबन्धे भोगनिर्वृत्ते. हेतुतः प्रत्ययोद्भवं नियतस्वविषयज्ञानोत्पादरूप यत. अथ पशुर्भुङ्क्ते अनुभवति स्वविषयमात्रभोक्तृताभिमानप्रत्ययोत्पादस्य भोगसद्भावात्, अत तस्य स्थूलसूक्ष्मात्मपुर्यष्टकस्य विद्यमानत्वात् अप्रबोधे सति अनुच्छेदात् संसरेत् अनवरत नानाशरीरभोगवासना कर्मचक्रभ्रममनुभवेत् आ प्रबोधप्रत्युदयात् ।

८ अतो हेतो अस्य पशो. संसृतिश्चयस्य कारणमिति वैयधिकरण्येन पञ्चम्यौ व्याख्येये ।

९ एतदिति भोक्तृताभिमानात्मसंसृतिकारणस्य निराकरणाय ।

ननु च

'ज्ञानं प्रकाशकं लोके आत्मा चैव प्रकाशकः ।
अनयोरपृथग्भावाज्ज्ञाने ज्ञानी प्रकाशते ॥'

इति-श्रीविज्ञानभैरवोक्तदृष्ट्या ज्ञानमपि प्रकाशमयमेव, इति-कथमस्य बन्धरूपत्वम्। सत्यमेतत्, यदि परमेश्वरप्रसादादेवं प्रत्यभिज्ञायेत, यदा तु तन्मायाशक्तितो नैवं विमर्शस्तदा—

## कलादीनां तत्त्वानामविवेको माया ॥ ३ ॥

किञ्चित्कर्तृतादिरूपकलादिक्षित्यन्तानां तत्त्वानां कञ्चुक-पुर्यष्टक-स्थूलदेहत्वेन अवस्थि-

---

१० ज्ञान इति, नीलाद्युपलम्भाध्यवसायादिपदे, ज्ञानी प्रकाशात्मा आत्मैव प्रस्फुरति, अनयोः ज्ञानिज्ञानयोरेकस्वभावात् । यदुक्तम्

'प्रकाशमान न पृथक् प्रकाशात्
स च प्रकाशो न पृथग्विमर्शात् ।
नान्यो विमर्शोऽहमिति-स्वरूपाद्
अहस्वरूपोऽस्मि चिदेकरूपः ॥' इति ।

पुनश्च । 'प्रकाशमाने परमार्थभानौ
नश्यत्यविद्यातिमिरे समस्ते ।
तदा बुधा निर्मलदृष्टयोऽपि
किंचिन पश्यन्ति भवप्रपञ्चम् ॥' इति ।

'ज्ञानं न भवतो भिन्नं ज्ञेयं ज्ञानात्पृथङ् नहि ।
अतो न स्वितरत्किंचित्तस्माद्भेदो न वास्तवः ॥' इति च ।

तानां योऽयमविवेकः[११], पृथक्त्वाभिमतानामेव अपृथगात्मत्वेन प्रतिपत्तिः, सा माया तत्त्वाख्यातिमयः प्रपञ्चः। तदुक्तं श्रीतन्त्रसद्भावे

'[१२]कलोद्वलितचैतन्यो विद्यादर्शितगोचरः।
रागेण रञ्जितात्मासौ बुद्ध्यादिकरणैर्युतः॥
एवं मायात्मको बन्धः प्रोक्तस्तयो[स्त द-]दरात्मकः।
तदाश्रयगुणो धर्मोऽधर्मश्चैव समासतः॥
तत्रासौ संस्थितः पाश्यः पाशितस्तैस्तु तिष्ठति।'

इति। स्पन्दे तु

'अप्रबुद्धधियस्त्वेते[१३] स्वस्थितिस्थगनोद्यताः।'

इत्यनेन एतत् भङ्ग्या उक्तम्॥ ३॥

---

११ परमार्थस्वरूपस्य अप्रथनस्वभावः।

१२ कलया किंचित्कर्तृत्वलक्षणेन कलातत्त्वेन उद्वलितमपूर्णतां प्राप्तं चैतन्यं सर्वकर्तृत्वलक्षणं यस्य सः। विद्यया अल्पज्ञतात्मकेन विद्यातत्त्वेन दर्शिताः कमनीयतया प्रमेयभूमिकां नीता गोचरा इन्द्रियार्थाः। रागेण रागतत्त्वेन रञ्जितो विषयेषु साभिलाषीकृत आत्मा यस्य। तस्य पश्योः दरात्मको मिताहन्तात्ममायीयमलस्वरूपो बन्धः। तदाश्रयेति मायीयबन्धाश्रयः शुभाशुभकर्मवासनास्वभावः। तत्रैव उभयरूपे मले, असौ बध्यते इत्यर्थः।

१३ अप्रबुद्धा परमेश्वरपरानुग्रहविरहात् अविगलितगाढाज्ञाननिद्रा धीः येषां तान्, गुणादिस्पन्दनिःष्यन्दाः स्वस्मिन् परमात्मनि सामान्यस्पन्दमात्रकर्मके स्थितिः निर्विकल्पप्रतिपत्तिप्रभवा सुस्थिरा प्रतिष्ठा; तस्याः स्थगने सद्य एव आच्छादने गृहीतोद्योगाः, प्रतिपक्षभूतस्य प्रबोधस्य अभावात् लब्धप्रसरत्वात् एवमुपचरिताः, दारुणे दुर्लङ्घ्ये जन्मादिप्रबन्धमार्गे

अतश्च एतत्प्रशमाय[१४]—

## शरीरे संहारः कलानाम् ॥ ४ ॥

महाभूतात्मकं, पुर्यष्टकरूपं, समनान्तं यत् स्थूलं, सूक्ष्मं, परं शरीरं, तत्र याः पृथिव्यादिशिवान्ततत्त्वरूपाः कला भागाः, तासां संहारः, स्वकारणे लयभावनया[१५] दाहादिचिन्तनयुक्त्या[१६] वा ध्यातव्यः, इति शेषः । यदुक्तं श्रीविज्ञानभैरवे

---

पातयन्ति इत्युत्तरेणान्वयः । अयमाशयः, यथा कांश्चित् राजादीन् प्रमादित्वाद्यवस्थासत्त्वात् सदपि सैन्यादिस्वसामर्थ्यं सत्त्वेन अप्रतिपद्यमानान् अन्तरप्रेक्षिणो विपक्षाः स्वपदव्यपरोपणबद्धाभियोगा महति व्यसने पातयन्ति आ स्वसामर्थ्यसद्भावप्रतिपत्तेः । एवमप्रबुद्धस्य सर्वकर्तृत्वादिलक्षणं निजं महिमानं सामान्यस्पन्दरूपं विद्यमानमपि अप्रतिबुध्यमानस्य सर्वकार्यपरतन्त्रं देहादिसर्गमेव आत्मत्वेन अवगच्छतः एते लब्धप्रसराः मुषितोऽहमित्यादयो गुणप्रधानाः प्रत्ययप्रवाहाः सत्ये स्वात्मनि स्थितिं व्यवधाय संसारमेव आसादयन्ति आ प्रबोधप्राप्तेः, इति प्रबुद्धा एव अस्योपदेशस्य विषया न अप्रबुद्धाः ॥

१४ एतदिति मायाबन्धनिवृत्त्यै ।

१५ यथा उपनिषदि 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुर्वायोरग्निरग्नेराप अद्भ्यः पृथिवी पृथिव्याः पुरुषः पुरुष एवेदं सर्वम्' इति यथाक्रमं यथास्वकारणमुत्पद्यन्ते । एवं व्युत्क्रमं तत्त्वानां पृथिव्यादिशिवान्तानां स्वकारणे लयो भाव्यते आरोहणक्रमेण ।

१६ निजापसव्यपादाङ्गुष्ठात् भावनया उत्थापितेन कालाग्निरुद्रेण रचितवपुःप्लोषणादियुक्तिः ।

'भुवनाध्वादिरूपेण चिन्तयेत्क्रमशोऽखिलम् ।
स्थूलसूक्ष्मपरस्थित्या यावदन्ते मनोलयः ॥'

इति । तथा

'कालाग्निना कालपदादुत्थितेन स्वकं पुरम् ।
प्लुष्टं विचिन्तयेदन्ते शान्ताभासः प्रजायते ॥'

इति । एवमादि च सर्वागमेष्वस्ति । अत एव

'उच्चारकरणध्यानवर्णस्थानप्रकल्पनैः ।
यो भवेत्स समावेशः सम्यगाणव उच्यते ॥'

इति-श्रीपूर्वशास्त्रे ध्यानादि एव आणवत्वेन उक्तम् । एतच्च स्थूलत्वात् शाक्तोपायप्रकाशात्मनि स्पन्दशास्त्रे न संगृहीतम् । यत्तु अत्र पर्यवसानभङ्ग्या शाक्तादि अस्ति, तत् अस्माभिः

---

१७ भेद-भेदाभेद-अभेदस्थित्या वा भुवन तत्त्व कलाध्वस्थित्या, अन्त इति भावनावसाने निर्विकल्पपदविश्रान्तिः । ध्यानाख्योऽयमाणवोपाय ।

१८ दक्षपादाङ्गुष्ठात्, पुरमिति शरीरम्, आभासः परिमितप्रमेयादिज्ञानम् ।

१९ उच्चार. स्थूलसूक्ष्मोभयरूपेण प्राणव्यापार', करण देहसनिवेशविशेषात्मा मुद्रादिव्यापारः, ध्यान बुद्धिव्यापार', यदेतत् सर्वतत्त्वात्तिर्भूल स्वप्रकाश परतत्त्व तस्यैव निजहृदयबोधे विभावनम्, वर्णः सूक्ष्मप्राणोधारे स्फुरन् अव्यक्तानुकृतिप्रायो ध्वनिः सृष्टिसंहारबीजात्मा, स्थान त्रिकोणकन्दहृदादि, एतदभ्यासात् परसंवित्तिलाभो भवति ।

२० विकल्पसंस्कारेण स्फुटतमनिकल्पोन्मुखप्रेक्षिणि चित्तसंबोधलक्षणे "शाक्तोपाये चित्तविश्रान्तिलक्षणस्य आणवोपायस्य पर्यवसानम्, इत्यर्थः ।

अत्रापि स्पन्दग्रन्थात् संवादितं; संवादयिष्यते च किंचित् ॥ ४ ॥

एवं ध्यानाख्यमाणवमुपायं प्रदर्श्य, तदेकयोगक्षेमान्[२१] प्राणायाम-धारणा-प्रत्याहार-समाधीन् प्रदर्शयति—

## नाडीसंहार-भूतजय-भूतकैवल्य-भूतपृथक्त्वानि ॥ ५ ॥

योगिना भावनीयानि इति शेषः । नाडीनां प्राणापानादिवाहिनीनां सुषीणां संहारः, प्राणापानयुक्त्या[२२] एकत्र उदानवह्न्यात्मनि मध्यनाड्यां विलीनतोपादनम्[२३] । यदुक्तं श्रीमत्स्वच्छन्दे

'अपसव्येन[२४] रेचयेत सव्येनैव तु पूरयेत् ।
नाडीनां शोधनं ह्येतन्मोक्षमार्गपथस्य च ॥

---

२१ अप्राप्तस्य प्राप्तिर्नाम योगः, प्राप्तस्य परिरक्षण नाम क्षेमः ।

२२ पूरकादिपरिशीलनेन बाह्यान्तरप्रसरद्रूपतापरित्यजे संमेलनम् ।

२३ चिरकाल कुम्भकाभ्यसनेन सर्वनाडीषु विधरणः प्राणवायुरुदाने विलीयते तदादित्वात् तासां नाडिसंहार इत्युपचर्यते इत्यर्थः ।

२४ सव्येन दक्षनासापथेन रेचक कुर्यात्, अपसव्येन वामेन पूर्वैव वायुपूरणं कुर्यात्, एवमनवरतं क्रियमाणमेतत् नाडीनां मोक्षमार्गपथस्य वा मध्यधाम्नः शोधन मारुतप्रशमन भवति ।

रेचनात्पूरणाद्रोधात्प्राणायाम[25]स्त्रिधा स्मृताः ।
सामान्या बहिरेते तु पुनश्चाभ्यन्तरे त्रयः ॥
आ[26]भ्यन्तरेण रेच्येत पूर्येताभ्यन्तरेण तु ।
निःस्पन्दं कुम्भकं कृत्वा कार्याश्चाभ्यन्तरास्त्रयः ॥'

इति। भूतानां पृथिव्यादीनां जयो धारणाभिर्वशीकारः । यथोक्तं तत्रैव

'वा[27]यवी धारणाङ्गुष्ठे आग्नेयी नाभिमध्यतः ।
माहेयी कण्ठदेशे तु वारुणी घण्टिकाश्रिता ॥
आकाशधारणा मूर्ध्नि सर्वसिद्धिकरी स्मृता ।'

इति । भूतेभ्यः कैवल्यं, चित्तस्य ततः प्रत्याहरणम् । यदुक्तं तत्रैव

---

२५ प्राणायाम इति, प्राणस्य यथास्थितवाह्विजयेन स्वायत्ततानयनम् । एते त्रयः प्राणायामाः सर्वसाधारण्येन नासिकापथे क्रमेण निर्वर्त्यमानाः साधारणा बाह्याश्चेत्यर्थः ।

२६ मध्यपथेन अत्र रेचन द्वादशान्ते, पूरणं हृदि, निष्कम्प कुम्भकमिति निरायासं प्रशान्तकुम्भकमित्यर्थः, कार्या इति निर्वर्तनीया भवन्ति ।

२७ पाददेशे तिर्यग्गतेः, नाभौ जाठराग्नेः, कण्ठे क्षितिपदे धरण्याः, घण्टिकायां रसस्य, ब्रह्मरन्ध्रे च व्योम्नः सद्भावात् तथैव च धारणा उक्ता । अत्र च वर्णमण्डललाञ्छनाक्षरात्मकत्वं धारणाध्येयम्, प्रथमं कण्ठे पार्थिवीं धारणां बद्ध्वा हृदयात् उद्घातपञ्चकेन पञ्चगुणं पार्थिवं तत्त्वं भिन्द्यात् । ततोऽनेनैव क्रमेण हृदयादेव चतुर्भिरुद्घातैः चतुर्गुणमम्भस्तत्त्वं, ततो हृदयादेव नाभिदेशे त्रिभिः त्रिगुणमग्निम्, अनन्तरं हृदयादेव द्वाभ्यां पादाङ्गुष्ठगतं द्विगुणं वायुं, ततोऽपि अङ्गुष्ठात् सङ्कोचयुक्त्या प्राणशक्तिमूर्ध्वमुद्बोध्य, हृदयादेव एकोद्घातयुक्त्या शरवत् ब्रह्मरन्ध्रस्थमेकगुणं व्योमग्रन्थिं भित्त्वा, द्वादशान्ते सर्वाः सिद्धयो भवन्ति ।

'[28]नाभ्यां हृदयसंचारान्मनश्चेन्द्रियगोचरात् ।
प्राणायामश्चतुर्थस्तु सुप्रशान्त इति स्मृतः ॥'

इति । हृदयान्नाभौ प्राणस्य, विषयेभ्यो मनसश्च तत्रैव संचारणादित्यर्थः । भूतेभ्यः पृथक्त्वं, तदनुपरक्तस्वच्छस्वच्छन्दचिदात्मता । यदुक्तं तत्रैव

'भित्त्वा[29] क्रमेण सर्वाणि उन्मनान्तानि यानि च ।
पूर्वोक्तलक्षणैर्देवि त्यक्त्वा स्वच्छन्दतां व्रजेत् ॥'

इति । 'भूतसंधानभूतपृथक्त्वविश्वसंघट्टाः' (१–२०) इति यत् पूर्वमुक्तम्, तत् शाम्भवोपायसमाविष्टस्य अयत्नतो भवति । इदं तु आणवोपायप्रयत्नसाध्यमिति विशेषः ॥ ५ ॥

एवं देह[30]शुद्धि-भूतशुद्धि-प्राणायाम-प्रत्याहा-

---

२८ निष्कम्पकुम्भकानन्तर शनैः शनैः हृदयादधः संचारयुक्त्या प्राण नाभ्यामेव नियम्येत्यर्थात्, तथा इन्द्रियगोचरात् तत्प्रत्याहारयुक्त्या नाभ्यामेव मनो नियम्य, मनोनियमपूर्वकं प्राणं नाभौ नियच्छतो योगिनः सुप्रशान्तः प्राणायामो भवति, तदनु निरुद्धवायुप्रकोपहरणाय नाभितो वामनासापुटेन मन्दं मन्द विरेचयेत् इति भावः ।

२९ हृत्कण्ठादीनि सर्वाणि, उद्गत मनो यस्मात् उन्मना तत्पर्यन्तानि स्थानानि, पूर्वोक्तलक्षणैः पञ्चप्रणवाधिरारोहैः भित्त्वा, अथ एतत्सर्वं त्यक्त्वा स्वच्छन्दतामेति गाढगाढोन्मनापदविश्रान्तिप्रकर्षात् तुर्यातीतदशालाभात् चिदानन्दघनपरभैरवसमावेशमनुभवति योगीन्द्र इत्यर्थः ।

३० स्वकारणे लयभावनया, कालाग्निना दग्धदेहादिभावनया वा देहशोधनमभिहितमस्ति ।

र-धारणा-ध्यान-समाधिभिर्या तत्तत्तत्त्वरूपा सिद्धिर्भवति सा मोहावरणात्, न तु तत्त्वज्ञानादित्याह—

## मोहावरणात्सिद्धिः ॥ ६ ॥

मोहयति इति मोह, माया; तत्कृतादावरणात् प्रोक्तधारणादि[३१]क्रमसमासादिता तत्तत्तत्त्वभोगरूपा सिद्धिर्भवति । न तु परतत्त्वप्रकाशः । यदुक्तं श्रीमल्लक्ष्मीकौलार्णवे

'[३२]स्वयम्भूर्भगवान्देवो जन्मसंस्कारवर्जितः ।
निर्विकल्पं परं धाम अनादिनिधनं शिवम् ॥
प्रत्यक्षं सर्वजन्तूनां न च पश्यति मोहितः ।'

इति । विगलितमोहस्य तु

---

३१ आदिपदेन ध्यानसमाधी ग्राह्यौ ।

३२ अनन्योन्मुखप्रेक्षित्वात्मस्वातन्त्र्यशक्तिसमवेतो भगवान् विश्वोदयविलयादिक्रीडनशीलो द्योतनादिसतत्त्वश्च देवः चिद्घनः परमेश्वर एव स्वयं स्वेच्छयैव, न तु प्रयोजनान्तरापेक्षया, तत्तद्रुद्रक्षेत्रज्ञाद्यनन्तप्रमातृरूपवैचित्र्येण भवनशीलः स्फुरन् मायाप्रमातृतां समुल्लास्य विस्मृतस्वतन्त्रचिद्घनस्वभावो विचित्रपशु-पक्षि-नृ-सरीसृपादिजन्मनां संस्कारेण वासनया वर्जितः, स्वायत्तीकृत्य अस्वतन्त्रतां प्रापितः, अत एव मोहितो भिन्नवेद्यप्रथात्ममायीयपाशेन मलिनितः, सर्वजन्तूनां शिवप्रकाशमन्तरेण सत्तास्फुरत्तानुपपत्तेः प्रत्यक्षं चित्प्रकाशस्वभावं स्वात्मानं न पश्यति, न च परामृशति; इति वाक्यार्थः ।

'[३३]मध्यमं प्राणमाश्रित्य प्राणापानपथान्तरम् ।
आलम्ब्य ज्ञानशक्तिं च तत्स्थं चैवासनं लभेत् ॥
प्राणा[३४]दिस्थूलभावं तु त्यक्त्वा सूक्ष्ममथान्तरम् ।
सूक्ष्मातीतं तु परमं स्पन्दनं लभ्यते यतः ॥
प्राणायामः स निर्दिष्टो यस्मान्न च्यवते पुनः ।
श[३५]ब्दादिगुणवृत्तिर्या चेतसा ह्यनुभूयते ॥

---

३३ उदानरूपं ज्ञानशक्तिरूपम्, उदानस्य प्राणीयभावनिमज्जनेन चिद्धाम्न्युन्मज्जनात् ज्ञानशक्तिरूपत्वम् । न च भ्रमितव्यं, बुद्ध्यभावे कथं ज्ञानम् ? इति, तस्य सदोदितत्वात् । यदाहुः 'अख्यात्युल्लसितेषु भिन्नेषु भावेषु बुद्धिरुच्यते अभेदे चिन्मये बोध' इति । श्रीसोमानन्दपादा अपि

बुद्धिं विना कथं बोधः सा बुद्धिः प्रकृतेः प्रजा ।
न च तस्य तया योग इति चेदपरस्थितौ ॥
सा बुद्धिर्यत्पुनः सूक्ष्मं सर्वदिक्कं व्यवस्थितम् ।
ज्ञानं बोधमयं तस्य शिवस्य सहजं सदा ॥

इति । तां ज्ञानशक्तिम् उन्मिषत्स्फुरत्तारूपां संविदमालम्ब्य तत्स्थमेव आसनं योगी लभते, निजज्ञानशक्त्यासीनः चिन्महेशरूपो भवति ।

३४ प्राणापानसमानेषु यः स्थूलो रेचकपूरकादिस्वभावः तं त्यक्त्वा, अथेति, एतत्स्थूलप्राणायामानन्तरभाविनं सूक्ष्मम्, आन्तरं मध्यपथेन रेचनाचमनादिरूपं च तमुल्लिङ्घ्य यस्मात् सूक्ष्ममपि अतीत, परमम् अप्रा-णाय्यचित्स्फुरत्तात्म स्पन्दनं लभ्यते तस्मात् तदेव परं स्पन्दनं यत् स एव स्थूलसूक्ष्मभेदभाजां प्राणानाम्, आयामः प्रशमितप्राधान्यावभासात्मा नियमः, निर्दिष्ट उत्कृष्टतया निरूपितः । यस्मादिति यं प्राणायाममासाद्य न पुनः च्यवते चित्प्रमातृमयतां न कदाचित् जहातीति ।

३५ शब्दस्पर्शादीनां गुणानां सत्त्वादिरूपाणां या काचित् वृत्तिर्दशा चेतसा संविदा अनुभूयते, तामनादरेण अपहस्त्य, स्वचेतसा अविकल्पसंवित्परामर्शनेनैव परचिद्धामप्रवेशः, दि इति यस्मात् भूमेः प्रधतस्य चित्तस्य तत्प्रतीपप्रापणात्मा प्रत्याहारः, अतश्च भववाधानां निकृन्तकः इत्यर्थः ।

त्यक्त्वा तां परमं धाम प्रविशेत्तत्स्वचेतसा ।
प्रत्याहार इति प्रोक्तो भवपाशनिकृन्तनः ॥

धी[36]र्गुणान्समतिक्रम्य निर्ध्येयं परमं विभुम् ।
ध्यात्वा ध्येयं स्वसंवेद्यं ध्यानं तच्च विदुर्बुधाः ॥

धारणां[37] परमात्मत्वं धार्यते येन सर्वदा ।
धारणा सा विनिर्दिष्टा भवपाशनिवारिणी ॥

स्वपरस्थेषु भूतेषु जगत्यस्मिन्समानधीः ।
शिवोऽहमद्वितीयोऽहं समाधिः स परः स्मृतः[38] ॥'

**इति श्रीमन्मृत्युजिद्भट्टारकनिरूपितनीत्या धारणादिभिरपि परतत्त्वसमावेश एव भवति, न तु मितसिद्धिः ॥ ६ ॥**

---

३६ बुद्धेः सत्त्वादिगुणान् समावेशेन प्रशमय्य, निर्ध्येय ध्येयेभ्यो नियत्याकृत्यादिरूपेभ्यो निष्क्रान्तं, निष्क्रान्तानि च तानि यस्मात् तं, विभु व्यापकमव्यय नित्य, स्वसंवेद्य स्वप्रकाश, ध्येयं ध्यानार्हम् । अथ च अध्येयम् अध्येतव्य विमृष्टव्य स्मर्तव्य च; अर्थात् चिदानन्दघन परमेश्वर ध्यात्वा विमृश्य तत्त्वशः तद्विमर्शात्मैव ध्यानम् अविच्छिन्नेन पारम्पर्येण जानन्ति, च एवार्थे ।

३७ येन योगिना सर्वदा परमात्मत्व चैतन्य समावेशेन अवलम्ब्यते, तस्य या धारणा चैतन्यविमर्शनात्मा वृत्तिः, सा भवबन्धविनाशे हेतुः धारणा अन्यधारणावैलक्ष्येण विनिर्दिष्टा । अथ च यया चिद्घनानन्दपर-*मात्मप्रकाशोपचयो भूयिष्ठो भवति सा धारणा; न तु भूतानामधिकरणेषु* तत्तत्प्यस्वचतुरस्रादिस्वरूपानुभवनम् ।

३८ ग्राह्य-ग्राहकयुगलरूपतया स्थितेषु भावेषु सर्वमिदमहमेव इत्य-हन्तेदन्तासामानाधिकरण्यात्मक शुद्धविद्योत्थाध्यवसायरूपः समाधि ।

तदाह—

**मोहजयादनन्ताभोगात्सहज-**
**विद्याजयः ॥ ७ ॥**

मोहस्य, अख्यात्यात्मकसमनान्तपाशात्मनो मायाया जयाद्, अभिभवात् । कीदृशात् ? अनन्तः, संस्कारप्रशमपर्यन्तः आभोगो, विस्तारो यस्य तादृशात्

'वेदनानादिधर्मस्य……………… ।'

इत्यादिना निरूपितरूपायाः सहजविद्याया जयो, लाभो भवति । आणवोपायस्यापि शाक्तोपायपर्यवसानादित्युक्तत्वात्[३९] । तथा च श्रीस्वच्छन्दे

'समनान्तं[४०] वरारोहे पाशजालमनन्तकम् ।'

इत्युपक्रम्य

---

३९ ध्यानौपयिकस्य आणवसमाधानस्य शुद्धविकल्पोपाये शाक्ते परिविश्रमणात् इत्यर्थः ।

४० एकादशविधो माघ्रो ध्वनिः, यथा अकारः उकारो मकारो बिन्दुः अर्धचन्द्रो निरोधी नादो नादान्तः शक्तिः व्यापिनी समना इति, एतदवधेः शकारणपट्कस्य भेदप्रधात्मतया पाशजालकल्पस्य हेयता, अत ऊर्ध्वम् अभेदविमर्शात्मतया उपादेयता । वरारोह इति वर उत्कृष्ट आरोहः शक्तिद्वादशान्ते विश्रमण यस्याः तत्संबुद्धिः ।

'पाशावलोकनं त्यक्त्वा स्वरूपालोकनं हि यत्।
आत्मव्याप्तिर्भवत्येषा शिवव्याप्तिस्ततोऽन्यथा ॥
सार्वज्ञ्यादिगुणा येऽर्था व्यापकान्भावयेद्यदा।
शिवव्याप्तिर्भवत्येषा चैतन्ये हेतुरूपिणी ॥'

इति-ग्रन्थेन आत्मव्याप्त्यन्तस्य मोहस्य जयात् उन्मनाशिवव्याप्त्यात्मनः सहजविद्यायाः प्राप्तिरुक्ता। यदुक्तं तत्रैव

'आत्मतत्त्वं ततस्त्यक्त्वा विद्यातत्त्वे नियोजयेत्।
उन्मना सा तु विज्ञेया मनः संकल्प उच्यते ॥
संकल्पात्क्रमतो ज्ञानमुन्मनं युगपत्स्थितम्[४३]।
तस्मात्सा च परा विद्या यस्मादन्या न विद्यते ॥

४१ पाशाना समनान्तानाम् अवलोकनम् आत्मत्वेन अभिमननम्, स्वरूप पाशोत्तीर्णचिन्मात्रस्य यत्, एतावत्पर्यन्ता आत्मव्याप्तिः।

४२ ये सर्वज्ञत्व-सर्वकर्तृत्वादिरूपा गुणा धर्माः परमोपादेयत्वेन अर्थ्यमानत्वात् अर्थाः, तान् व्यापकान् अशेषमन्तरभेदेन क्रोडीकुर्वतो यदा स्वान् भावयेत् तदा तद्भावनापरिनिष्पत्तिः आत्मन. शिवव्याप्ति॰, सा च भावकस्य चैतन्ये हेतुरूपिणी प्रयोजिका, तत्प्रसादादेव शुद्धात्मन. तद्भावनाप्ररूढेः।

४३ योजयेत् आत्मानमित्यध्याहार॰, सा विद्या, सङ्कल्प इच्छा, सा च ईशितव्यविश्वक्रमासूत्रणात्मत्वात् क्रमतो ज्ञानम् इत्युक्तम्। उन्मनम् उत्क्रान्तम् उत्कर्षे च मनः प्राप्त यत्र तत् उन्मनम्; युगपत् इति विश्वस्य आमृशणावभासननिर्माणाद्यनन्तशाखाशतभिन्नस्यापि अत्र नित्योदितानन्दघनस्वातन्त्र्यशक्त्याभासात्मत्वेन अवस्थानात्, अत ईदृक् उन्मन ज्ञानमेव उन्मनाशक्तिः।

वेदनानादिधर्मस्य परमात्मत्वबोधना।
वर्जनापरमात्मत्वे तस्माद्विद्येति चोच्यते॥
तत्रस्थो[४४] व्यञ्जयेत्तेजः परं परमकारणम्।'

इति॥ ७॥

एवमयमासादितसहजविद्यः—

## जाग्रद्द्वितीयकरः॥ ८॥

लब्ध्वापि शुद्धविद्यां तदेकध्यं[४५]ऽभ्यासो जागरूकः, पूर्णविमर्शात्मकस्वाहन्तापेक्षया यत् द्वितीयं[४६]मिदन्तावमृश्यं वेद्यावभासात्मकं जगत्, तत् करो रश्मिर्यस्य तथाविधो भवति। विश्वमस्य स्वदीधितिकल्पं स्फुरति इत्यर्थः। यथोक्तं श्रीविज्ञानभैरवे

'यत्र[४७] यत्राक्षमार्गेण चैतन्यं व्यज्यते विभोः।
तस्य तन्मात्रधर्मित्वाच्चिल्लयाद्भरितात्मता॥'

४४ तत्रस्थो विद्यास्थोऽसंकुचितपरमशिवरूपं प्रत्यभिजानीयात्।

४५ तस्यां विद्यायाम् एकधाभाव ऐकध्य तदैकाग्र्यम्।

४६ स्वानुभूतिप्रकाशापेक्षया द्वितीयं शक्तिरूपम्।

४७ यत्र यत्र नीलसुखादौ, अक्षमार्गेण चक्षुरादिसुषिरमार्गेण, विभोः परभैरवस्य आत्मनः चैतन्यं चित्प्रकाशो व्यज्यते स्फुरति; तस्य नीलादे तन्मात्रधर्मित्वात् चैतन्यव्यतिरेके चेत्यत्वाभावापत्तेः दर्पणमात्रात्मकवि चित्रप्रतिबिम्बवत् चैतन्यमात्रस्वभावत्व विमृश्य विश्वभित्तिभूतायां चितावेव यो लीयते तस्य परभैरवतैव, यथा घनीभूतः प्रकाश एव सूर्यमण्डलं जातं तथा चिदेव हि आश्यानीभूता जगदात्मना भाति इत्याशयः।

इति । श्रीसर्वमङ्गलायामपि

'शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते ।
शक्तयोऽस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः ॥'

इति ॥ ८ ॥

ईदृशश्चायं सर्वदा स्वस्वरूपविमर्शाविष्टः—

नर्तक आत्मा ॥ ९ ॥

नृत्यति, अन्तर्विगूहितस्वस्वरूपावष्टम्भमूलं तत्तज्जागरादिर्नानाभूमिकाप्रपञ्चं स्वपरिस्पन्दलीलयैव स्वभित्तौ प्रकटयति इति नर्तक आत्मा। तदुक्तं श्रीनैश्वासदेवीमहेश्वरनर्तकाख्ये सप्तमपटले देवीकृतस्तवे

'त्वमेकांशेनान्तरात्मा नर्तकः कोशरक्षिता ॥'

इति । भट्टश्रीनारायणेनापि.

'विश्वंस्थाशेपसद्वीजगर्भं त्रैलोक्यनाटकम् ।
प्रस्ताव्य हर संहर्तुं त्वत्तः कोऽन्यः कविः क्षमः ॥'

४८ आदिना स्वप्नसुषुप्ते ग्राह्ये । इच्छादिशक्तिविजृम्भणपूर्वं निरुपादानहेतुनिचय नानाभूमी. चिद्भित्तावेव उन्मीलयतीत्यर्थः ।

४९ आत्मैव पुर्यष्टकसंबन्धात् वासनारूपैः शुभाशुभैः निबद्धः सन् योनेर्योन्यन्तरं पर्यटन् आत्म-चामात्मनेरन्तः व्यवस्थितत्वात् अन्तरात्मा ईरः, कोशरक्षितेति स्वस्वरूपपरमात्मरक्षितेत्यर्थः ।

५० विश्वस्मिन् सर्वं भावानां बीजं मायाशक्त्यादि गर्भे यस्य तत्;

इति । सर्वागमोपनिषदि श्रीप्रत्यभिज्ञायाम्

> 'संसारनाट्यप्रवर्तयिता सुप्ते जगति जागरूक
> एक एव परमेश्वरः ॥'

इति ॥ ९ ॥

एवं-विधस्य अस्य जगन्नाट्यनर्तकस्य भूमिकाग्रहण-पदबन्धस्थानरङ्गमाह—

## रङ्गोऽन्तरात्मा ॥ १० ॥

रज्यतेऽस्मिन् जगन्नाट्यक्रीडाप्रदर्शनाशयेनात्मना इति रङ्गः, तत्तद्भूमिकाग्रहणस्थानम्; अन्तरात्मा, संकोचावभाससतत्त्वः शून्यप्रधानः प्राणप्रधानो वा पुर्यष्टकरूपो देहापेक्षया अन्तरो जीवः। तत्र हि अयं कृतपदः स्वकरणपरिस्पन्द[52]क्रमेण जगन्नाट्यमाभासयति । उक्तं च श्रीस्वच्छन्दे

---

नाटकपक्षे बीजादिसंज्ञा सन्ध्यास्त्रप्रसिद्धा, सदर्तुं प्रगमयितुं, मुखसंधिना प्रस्तोतुं निर्वहणसंधिना निर्वाहयितुं च भवन्तमृते अन्यः कविः कवयिता कः प्रजापतिश्च क्षम, न कोऽपि इत्यर्थः ।

५१ प्राणपुर्यष्टकनियन्त्रितो जीव., जीवभावस्य पुर्यष्टकप्राण एव मुख्यत्वात् ।

५२ षट्त्रिंशत्तत्त्वाविविस्फुरणात्मा आन्तरेन्द्रियस्पन्दः ।

'पुर्यष्टकसमावेशाद्विचरन्सर्वयोनिषु[५३] ।
अन्तरात्मा स विज्ञेयः.................. ॥'

इति ॥ १० ॥

इत्थं अन्तरात्मरङ्गे नृत्यतोऽस्य–

**प्रेक्षकाणीन्द्रियाणि ॥ ११ ॥**

योगिनश्चक्षुरादीनि इन्द्रियाणि हि संसारनाट्यप्रकटनप्रमोदनिर्भरं स्वस्वरूपम् अन्तर्मुखतया साक्षात्कुर्वन्ति, तत्प्रयोगप्ररूढ्या विगलितविभागं चमत्काररससंपूर्णतामापादयन्ति[५४]। यच्छ्रुतिः

'कश्चिद्धीरः प्रत्यगात्मानमैक्षद् आवृत्तचक्षुरमृतत्वमश्नन् ॥'
( कठोपनिषदि अ० २ । व० ४ । मं० १ )।

इति ॥ ११ ॥

अस्य च–

**धीवशात्सत्त्वसिद्धिः ॥ १२ ॥**

धीः, तात्त्विकस्वरूपविमर्शनविशारदा [ वि-

---

५३ य एष कञ्चुकमानशरीर प्रकृतिलीन आत्मा अयमेव आन्तर सूक्ष्मशरीरारम्भक तन्मात्रपञ्चक मनोबुद्ध्यहङ्कारात्मकस्य पुर्यष्टकस्य सम्बन्धात् वासनावलितो योन्यन्तरगामी इत्यर्थः ।

५४ अहन्तारसचमत्कारपरिशीलनदार्ढ्यात् 'अहमिद चमत्करोमि' इति विभागपरिवर्जं स्वात्मान 'शिवोऽहमस्मि' इति परामृशन् चमत्कुरुते इत्यर्थः।

शदा ] धिषणा तद्वशात् सत्त्वस्य स्फुरत्तात्मनः सूक्ष्मस्य आन्तरपरिस्पन्दस्य सिद्धिरभिव्यक्तिर्भवति । नाट्ये च सात्त्विकाभिनयसिद्धिर्बुद्धिकौशलादेव लभ्यते ॥ १२ ॥

एवं स्फुरत्तात्मकसत्त्वासादनादेव[५६] अस्य योगिनः—

## सिद्धः स्वतन्त्रभावः ॥ १३ ॥

सिद्धः, संपन्नः; स्वतन्त्रभावः, सहजज्ञत्व-कर्तृत्वात्मकम् अशेषविश्ववशीकारि स्वातन्त्र्यम् । यदुक्तं श्रीश्रीनाथपादैः

'श्रयेत्स्वातन्त्र्यशक्तिं स्वां सा श्रीकाली परा कला ।'

इति । श्रीस्वच्छन्देऽपि

५५ सात्त्विकरूपस्य अभिनयस्य सिद्धिरित्यन्वयः । सात्त्विकः स्तम्भ-स्वेद-रोमाञ्चादिरूपः । अभिनयः नटैः नाट्यादिभिः रामयुधिष्ठिरादीनामवस्थानुकरणम् । सात्त्विकेत्युपलक्षण वाचिक-आङ्गिक-आहार्याणाम् ।

५६ स्वातन्त्र्यशक्तिविस्फुरणात्मनः सत्त्वस्य प्राप्तेरित्यर्थः ।

५७ 'पुरुषे षोडशकले तामाहुरमृतां कलाम् ।'

इत्युक्तस्वरूपा स्वातन्त्र्यशक्तिः, कलयति परामृशति, क्षिपति विसृजति संहरति च, गणयति, जानीते च इति—काली, विश्वस्य अन्तर्बहीरूपतया पालन-पूरणात्मकत्वात् परा-इत्यन्वर्था ।

'सर्वतत्त्वा[58]नि भूतानि मन्त्रवर्णाश्च ये स्मृताः ।
नित्यं तस्य वशास्ते वै शिवभावनया सदा ॥'

इति ॥ १३ ॥

एष स्वतन्त्रभावोऽस्य—

## यथा तत्र तथान्यत्र ॥ १४ ॥

यत्र देहे योगिनः स्वाभिव्यक्तिर्जाता तत्र यथा, तथा अन्यत्र सर्वत्र सदावहितस्य सा [59]भवति । यथोक्तं श्रीस्वच्छन्दे

'स्वच्छन्दश्चैव स्वच्छन्दः स्वच्छन्दो विचरेत्स[60]दा ।'

इति । श्रीस्पन्देऽपि

'लभते, त[61]त्प्रयत्नेन परीक्ष्यं तत्त्वमादरात् ।
यतः स्वतन्त्रता तस्य सर्वत्रेयमकृत्रिमा ॥'

इति ॥ १४ ॥

---

५८ सर्ववेद्योल्लासस्य शिवाभिन्नस्वात्मैक्येन परामर्शनात् जलाद्या-दीनि तत्त्वानि, भूतानि हिंसादिजन्तवः, वर्णाः शब्दराशिशरीरस्थाः नित्यं वशे तिष्ठन्ति ।

५९ अवहितस्य योगिनः शरीरान्तरसंक्रान्ति समुत्क्रान्त्यादिषु अपि स्वातन्त्र्याविर्भावात् इत्यर्थः ।

६० योगप्रकर्षात् तु नित्यम् आदिमध्यान्तकोटिषु अयं श्रीस्वच्छ-न्दभैरव एव स्फुरन् स्थित इति यावत् ।

६१ अयमाशयः, प्राकृत जडमपि एतत् बाह्याभ्यन्तरमिन्द्रियचक्रं प्रवृत्त्यादिचेतनव्यापारसमर्थं यत्संस्पर्शबलात् भवति, तत् तत्त्वमात्मत्वेन

न चैवमपि उदासीनेन अनेन भाव्यम् अपि तु—

**बीजावधानम् ॥ १५ ॥**

कर्तव्यमिति शेषः। बीजं विश्वकारणं स्फुरत्तात्मा परा शक्तिः। यदुक्तं श्रीमृत्युजिद्भट्टारके

'सा योनिः सर्वदेवानां शक्तीनां चाप्यनेकधा ।
अग्नीषोमात्मिका योनि[६२]स्ततः सर्वं प्रवर्तते ॥'

इत्यादि। तत्र परशक्त्यात्मनि बीजे, अवधानं भूयो भूयश्चित्तनिवेशनं कार्यम् ॥ १५ ॥

एवं हि सति असौ योगी—

**आसनस्थः सुखं ह्रदे निमज्जति ॥ १६ ॥**

आस्यते, नित्यमैकात्म्येन स्थीयते अस्मिन् इति आसनं, परं शाक्तं बलम्; यस्तत्र तिष्ठति, परिहृतपरापरध्यानधारणादिसर्व[६३]क्रियाप्रयासो

---

स्फुटीकृत सत्, इन्द्रियचैतन्यापादनस्वातन्त्र्यवत् सर्वविषयस्वातन्त्र्यलाभाय कल्पते एव, अत परीक्ष्य, येन अभ्यासदशायामेव अभिव्यज्यमाने स्वातन्त्र्ये परशरीरावेशादिसिद्धि उपपद्यते ।

६२ संहारसृष्टि प्रमाणप्रमेय प्राणापान सूर्यसोमादिशब्दाभिधेया ।

६३ शाक्त-आणवोपायशो उज्झन् स्फुटतमविकल्पसंक्रिया स्थानक-रण यमोंघारादीन् सर्वान् परिहृत्य 'शिवोऽहमस्मि' इत्यहन्तया परामृशन्।

नित्यमन्तर्मुखतया तदेव परामृशति यः, स सुखमनायासतया, हठे, विश्वप्रवाहप्रसरहेतौ स्वच्छोच्छलत्तादियोगिनि[६४] परामृतसमुद्रे निमज्जति, देहादिसंकोचसंस्कारत्रोडनेन तन्मयीभवति । यदुक्तं श्रीमृत्युजिद्भट्टारके एव

'नोर्ध्वे[६५] ध्यानं प्रयुञ्जीत नाधस्तान्न च मध्यतः ।
नाग्रतः पृष्ठतः किञ्चिन्न पार्श्वे नोभयोरपि ॥
नान्तः शरीरसंस्थं[६६] तु न बाह्ये भावयेत्कचित् ।
नाकाशे बन्धयेल्लक्ष्यं नाधो दृष्टिं निवेशयेत् ॥

६४ विश्वप्रतिविम्बोपग्रहणे शक्तत्व स्वच्छता, देशकालाकारवस्तूपादानसामग्रीनिरपेक्ष तत्तद्वस्तुरूपेण अवभासनकारित्वमुच्छलत्ता ।

६५ ऊर्ध्वे द्वादशान्ते, अध. कन्दादौ, मध्यतो मध्ये हृदयादौ, अग्रत पृष्ठत पार्श्वयो', तत्पुरुष-सद्योजातादिरूपम् ।

६६ नान्त शरीरेति

'आ मूलात्किरणाभासा सूक्ष्मात्सूक्ष्मतरात्मिकाम् ।
चिन्तयेत्ता द्विषट्कान्ते शाम्यन्तीं भैरवोदय. ॥'

इति वत् । न बाह्य इति

'वस्त्वन्तरे वेद्यमाने सर्ववेद्येषु शून्यता ।
तामेव मनसा ध्यायन्विदितेऽपि प्रशाम्यति ॥'

इति-वत् । नाकाश इति

'तेजसा सूर्यदीपादेराकाशे शबलीकृते ।
दृष्टिं निवेश्य तत्रैव स्वात्मरूप प्रकाशते ॥'

इति-वत् । नाध इति

न चक्षुर्मीलनं किञ्चिन्न किंचिद्दृष्टिबन्धनम् ।
अवलम्बं निरालम्बं सालम्बं नैव भावयेत् ॥
नेन्द्रियाणि न भूतानि शब्दस्पर्शरसादयः ।
एवं त्यक्त्वा समाधिस्थः केवलं तन्मयीभवेत् ॥

---

'कूपादिके महागर्ते स्थित्वोपरि निरीक्षणात् ।
अविकल्पमतेः सम्यक्सद्यश्चित्तलयः स्फुटम् ॥'

इति-वत् ।

६७ न चक्षुर्मीलनमिति

'एवमेव निमील्यादौ नेत्रे कृष्णाममग्रतः ।
प्रसार्य भैरवं रूपं भावयंस्तन्मयो भवेत् ॥'

इति-वत् । दृष्टिबन्धनम् इति

'निर्वृक्षगिरिभित्त्यादौ देशे दृष्टिं विनिक्षिपेत् ।
विलीने मानसे भावे वृत्तिक्षीणः प्रजायते ॥'

इति-वत् । अवलम्ब्यते इत्यवलम्बो, ध्येय आकारः तमिति

'भावे त्यक्ते निरुद्धा चिन्नैव भावान्तरं व्रजेत् ।
तदा तन्मध्यभावेन विकसत्यतिभावना ॥'

इति वत् । निरालम्बमिति

'उभयोर्भावयोर्ज्ञाने ज्ञात्वा मध्यं समाश्रयेत् ।
युगपच्च द्वयं त्यक्त्वा मध्ये तत्त्वं प्रकाशते ॥'

इति-वत् । सह आलम्बेन वर्तते इति सालम्बं साकारज्ञानम्

'इच्छायामथ वा ज्ञाने जाते चित्तं निवेशयेत् ।
तत्र युक्त्यानन्यचेतास्ततः स्यादात्मदर्शनम् ॥'

इति-वत् ।

६८ नेन्द्रियाणीति, तत्तद्धारणापटलोत्तीर्णा सर्वं त्यक्त्वा समाधिस्थ-श्चिन्तकत्वेन स्वस्वरूपविमर्शप्रवणः, तन्मयः आनन्दपदलीनः समरसज्ञानमयः ।

सार्वस्था परमा प्रोक्ता शिवस्य परमात्मनः ।
निराभासं पदं तत्तु तत्प्राप्य विनिवर्तते ॥'

इति ॥ १६ ॥

तदेवं नाडीसंहाराद्याणवोपायक्रमासादितमोहजयोन्मज्जच्छुद्धविद्यात्मकशाक्तबलासादनप्रकर्षाद् आत्मीकृतपरामृततद्धदात्मकशाम्भवपदो योगी—

## स्वमात्रानिर्माणमापादयति ॥ १७ ॥

स्वस्य चैतन्यस्य संबन्धिनी मात्रा चिद्रसाश्यानतात्मा अंशः, तद्रूपं यथेष्टवेद्यवेदकावभासात्मकं निर्माणमापादयति, निर्मितत्वेन दर्शयति । यदुक्तं श्रीस्वच्छन्दे

'तदेवं भवति स्थूलं स्थूलोपाधिवशात्प्रिये ।
स्थूलसूक्ष्मविभेदेन तदेकं संव्यवस्थितम् ॥'

इति । प्रत्यभिज्ञायामपि

---

६९ या च एव भूता दशा, सा शैवी मुक्तावस्था, वेद्योल्लासानामात्यन्तिकानवभासनपदम्; विनिवर्तते इति सांसारिकीं स्थितिमुज्झति इत्यर्थः ।

७० महाप्रकाशात्मनः श्रीस्वतन्त्रनाथस्य स्वच्छन्दभैरवस्यैव स्वस्वातन्त्र्येण स्थूलाभासतया स्फुरणात्, स एव विचित्रवेद्यस्फूर्त्या उपाधीयते; व्यापकः प्रकाशो हि व्याप्यात्मना स्फुरति, न तु व्याप्यं नाम तस्माद्भिन्नम्, अतः स उपाधिः चित्तत्त्वात् नातिरिच्यते इति भावः ।

'आत्मानमत एवायं ज्ञेयीकुर्यात्पृथक्स्थिति ।
ज्ञेयं न तु ........................................... ॥'

इति । आगमेऽपि

'जलं[७२] हिमं च यो वेद गुरुवक्त्रागमात्प्रिये ।
नास्त्येव तस्य कर्तव्यं तस्यापश्चिमजन्मता ॥'

इति अनेनैव आशयेन उक्तम् । एतदेव

'इति वा यस्य संवित्तिः क्रीडात्वेनाखिलं जगत् ।
स पश्यन्सततं युक्तो जीवन्मुक्तो न संशयः ॥'

इति-अनेन स्पन्दे प्रतिपादितम् ॥ १७ ॥

न चैवं स्वशक्तिनिर्मितभूत[७३]भावशरीरवतोऽस्य जन्मादिबन्धः कश्चिदित्याह—

---

७१ एतादृशाशुद्धस्वातन्त्र्यवशात् नैष तदा पृथगेव लब्धप्रतिष्ठं वस्तु अवैति, अपि तु अज्ञेयमात्मानम् अनियन्त्रितप्रभावतया ज्ञेयीकरोति, भिन्नज्ञेयसापेक्षत्वे ज्ञानकर्तृता म्लायेत् ज्ञातृत्वं हीयेत इति तात्पर्यम् ।

७२ यथा जलहिमयोः रस-तदास्यानताभावः, एव शिव तच्छक्त्यात्मजगतोः चिद्रस-तदास्यानतासंवेदनात् परशाक्तस्फारपूतहृदयानां पश्चिमं जन्मान्तरं नास्ति, वर्तमाने जीवन्मुक्ततया स्थितस्यापि देहस्य आरब्धकर्मभोगक्षये निवर्तिष्यमाणत्वात् ।

७३ द्विविध शरीरं भूतात्मकं भावात्मकं च । तत्र मायाशक्तिवैभवविसारिततात्त्विकस्वभावतया वस्तुसंवेदनावसरे स्वरूपापरामर्शमुकुलितप्रामर्थ्योऽयं जीवः अवच्छिन्नाहंकारास्पदतया शिरःपाण्यादिमच्छरीरत्वेन यत् परामृशति तत् अस्य स्थूलादिमयत्वात् भूतात्मकम् । यत्तु व्यतिरिक्तं शब्दादिविषयत्वेन परामृशति तत् भावात्मकम् । परमार्थे तु विचार्यमाणे द्वयमेव भिन्नं स्वस्मात् अस्य शरीरं, संवेद्यमानत्वाविशेषात् ।

## विद्याऽविनाशे जन्मविनाशः ॥१८॥

प्रोक्तायाः सहजविद्याया अविनाशे सततोन्मग्नतया स्फुरणे, जन्मनः अज्ञान[७४]सहकारिकर्महेतुकस्य दुःखमयस्य देहेन्द्रियादिसमुदायस्य, नाशो विध्वंसः संपन्न एव । यदुक्तं श्रीकण्ठ्याम्

'समप्रपञ्चं परित्यज्य हेयोपादेयलक्षणम् ।
तृणादिकं तथा पर्णं पाषाणं सचराचरम् ॥
शिवाद्यवनिपर्यन्तं भावाभावोपबृंहितम् ।
सर्वं शिवमयं[७५] ध्यात्वा भूयो जन्म न प्राप्नुयात् ॥'

इति । श्रीस्वच्छन्दे

'स्वनिर्वाणं[७६] परं शुद्धं गुरुपारम्परागतम् ।
तद्विदित्वा विमुच्येत गत्वा भूयो न जायते ॥'

इति । श्रीमृत्युजित्यपि

---

७४ अज्ञानपदेन  अपूर्णम्मन्यता भेदप्रथात्मकम् आणव-मायीयाख्यमलद्वयं ग्राह्यं, तत् कर्मणः सहकारि, उपोद्बलकम् इत्यर्थः ।

७५ प्रमेयमिकाशौन्मुख्यपरिवर्जनमेव  विश्वमयानुत्तरशिवमयीकरणम्, प्राक् सृष्टे विश्वस्य चिद्रसस्वभावैकात्म्येन अवस्थानात् इत्यर्थः ।

७६ स्वनिर्वाणं मोक्षमार्गं पराद्वयमयत्वात्, अत एव परं शुद्धं शुद्धाशुद्धसदाशिवादिपदात् अपि प्रकृष्टम्, गुरूणां परम्परैव पारम्परं परभैरव-स्वच्छन्द-सदाशिव ईशान अनन्त श्रीकण्ठादिरूपम्, ततः आगतम्, विदित्वा अनुभूय, विमुच्येत जीवन्नेव विमुक्तः स्यात्, देहान्ते गत्वा तदैकात्म्यमेति ।

'तत्त्वत्रयविनिर्मुक्तं शाश्वतं त्वचलं ध्रुवम् ।
दिव्येन योगमार्गेण दृष्ट्वा भूयो न जायते ॥'

इति ॥ १८ ॥

यदा तु शुद्धविद्यास्वरूपम् अस्य निमज्जति तदा—

**कवर्गादिषु माहेश्वर्याद्याः पशुमातरः ॥ १९ ॥**

अधिष्ठात्र्यो भवन्ति इति शेषः ।

'या सा शक्तिर्जगद्धातुः कथिता समवायिनी ।
इच्छात्वं तस्य सा देवि सिसृक्षोः प्रतिपद्यते ।
सैकापि सत्यनेकत्वं यथा गच्छति तच्छृणु ॥
एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम् ।
ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते ॥

७७ तत्त्वत्रयं नर शक्ति-शिवाख्यम्, शाश्वतमविवर्तं विवर्तवाद इव न असत्यविभक्तान्यरूपोपग्राहि, अचलमपरिणामि, ध्रुवं नित्यम्, दिव्येन योगमार्गेण विकल्पहानोन्मिषदविकल्पविमर्शावष्टम्भोपायेन साक्षात्कृत्य पुनर्जन्म नैति ।

७८ परतत्त्वधामाधिरूढावपि प्रमाद्यतः पशून् परापरमयशब्दप्रत्ययोत्पादनेन अविश्रान्तं परस्वरूपावृतौ आधिपत्यभाजो मातृका मोहयन्ति इति तात्पर्यम् ।

७९ शक्तिर्विमर्शात्मिका, समवायिनी परप्रमातृवियुक्तत्वात् तदात्मभूता, तस्याः आद्योच्छलत्तात्मकत्वेन बहिरुल्लिलसिषास्वभाववशात् इच्छात्वमाप्तिः ।

८० इदमेतत्-इत्थेवमाकारवतां भावानाम् अनुन्मिषत्संविदभेदानां कल्पितमायीयपश्वादिप्रमातृरपेक्षया भेदेन ज्ञापनात् ज्ञानशक्तिरुच्यते ।

एवं-भूतमिदं वस्तु भवत्विति यदा पुनः ।
जाता तदैव तत्तद्वत्कुर्वत्यत्र क्रियोच्यते[८१] ॥
एवं सैषा द्विरूपापि पुनर्भेदैरनन्तताम् ।
अर्थोपाधिवशात्प्राप्ता चिन्तामणिरिवेश्वरी ॥
तत्र तावत्समापन्नमातृभावा[८२] विभिद्यते ।
द्विधा च नवधा[८३] चैव पञ्चाशद्धा च मालिनी ॥
बीजयोन्यात्मकाद्भेदाद् द्विधा बीजं स्वरा मताः ।
कादिभिश्च स्मृता योनिर्नवधा वर्गभेदतः ॥
बीजमत्र शिवः शक्तिर्योनिरित्यभिधीयते ।
वर्गाष्टकविभेदेन माहेश्वर्यादि चाष्टकम् ॥
प्रतिवर्णविभेदेन शतार्ध[८४]किरणोज्ज्वला ।
रुद्राणां वाचकत्वेन तत्संख्यानां निवेशिता ॥'

इति-श्रीमालिनीविजयनिरूपितनीत्या पारमेश्वरी परावाक् प्रसरन्ती, इच्छा-ज्ञान-क्रियारूपतां श्रित्वा, बीजयोनि-वर्ग-वर्ग्यादिरूपा शिव-शक्ति-माहेश्वर्यादिवाचक-आदि-क्षान्तरूपां मातृकात्मतां श्रित्वा, सर्वप्रमातृषु अविकल्प-

---

८१ निगूहितस्वस्वरूपावष्टम्भमूल तत्तद्वैचित्र्यभूमिकाप्रपञ्च वितन्वतः परमेश्वरस्य असौ पारमेश्वरी स्वातन्त्र्यशक्तिः तत्तत्प्रमातृ प्रमेयाद्यनन्ताभासवैचित्र्यकारितया समुच्छलन्ती क्रियाशक्तिरित्युच्यते ।

८२ वाच्य-वाचकात्मजगज्जननात् माता ।

८३ पूर्वबीजस्यापि वर्गान्तरात्मतया अभ्युपगमात् नवधात्वम् ।

८४ शतार्धेति पञ्चाशच्छक्तिभास्वरा, रुद्राणां पञ्चाशतो वाच्यात्मनाम् वाचकत्वेन परिनिष्ठिता ।

शाम्भवोपायानुगुणहठपाकयुक्त्या जागरादिसंहारो दर्शितः । अनेन तु सूत्रेण आणवोचितावष्टम्भयुक्त्या दलकल्पं जागरादित्रयं तुर्यरसासिक्तं कार्यम् इत्युक्तम्; इति विशेषः ॥

अत्रोपायमाह—

## मग्नः स्वचित्तेन प्रविशेत् ॥२१॥

'प्राणादिस्थूलभावं तु त्यक्त्वा सूक्ष्ममथान्तरम् ।
सूक्ष्मातीतं तु परमं स्पन्दनं लभ्यते यतः ॥'

इत्युपक्रम्य

'........................प्रविशेत्तत्स्वचेतसा ॥'

इति-श्रीमृत्युजिद्भट्टारकनिरूपितनीत्या प्राणायाम-ध्यान-धारणादिस्थूलोपायान् परित्यज्य,

---

८७ हठपाकक्रमः, हठेन क्रमातिक्रमरूपेण सकृदुपदेशाद्यात्मना बलात्कारेण, यः पाकः चिदग्निसात्कारः, तस्य क्रमेण स्थूलाद्युपाधीनां विगलनम्; इयं युक्तिः तीव्रतरशक्तिपाताधिकारेण शांभवोपायविशेषानुगुणा इत्यर्थः ।

८८ दलः पद्मकोशः, स यथा पत्राद्विभिन्नः तद्वत् पृथगवभासमानमित्यर्थः ।

८९ अभेति जागरादिदशासु तैलवत् आसेचने ।

९० स्थूलो रेचकपूरकादिस्वभावः, तदनन्तरभावि सूक्ष्मम् आन्तरं मध्यपथेन रेचनाचमनादिरूपम्, तदतीतम् प्राणव्यतिरिक्तपूर्वतनचिरस्फुरत्तात्म स्पन्दनम् ।

स्वचित्तेन[९१], अविकल्पकरूपेण अन्तर्मुखान्तर-विमर्शचमत्कारात्मना संवेदनेन, प्रविशेत् समाविशेत् । कीदृक् सन्? मन्नः, शरीरप्राणादिप्रमातृतां तत्रैव चिच्चमत्काररसे मज्जनेन प्रशमयन् । तदुक्तं श्रीस्वच्छन्दे

'व्यापारं मानसं त्यक्त्वा बोधरूपेण योजयेत् ।
तदा शिवत्वमभ्येति पशुर्मुक्तो भवार्णवात् ॥'

इति । श्रीविज्ञानभट्टारकेऽपि

'मानसं चेतना शक्तिरात्मा चेति चतुष्टयम् ।
यदा प्रिये परिक्षीणं तदा तद्भैरवं वपुः ॥'[९२]

इति । एतदेव ज्ञानगर्भे स्तोत्रे

'विहाय सकलाः क्रिया जननि मानसीः सर्वतो
विमुक्तकरणक्रियानुसृतिपारतन्त्र्योज्ज्वलम् ।

---

९१ चेत्यसंकोचौन्मुख्यहानपूर्वमसङ्कुचितचितिरूपेण इत्यर्थः ।
'तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः ।'

इति-स्पन्ददृशा आदौ शिष्यात्मानं स्वात्मनि समरसीकृत्य, समनान्तमतिक्रम्य, शुद्धात्मनि स्थितिं बद्ध्वा, बोधरूपेण अविकल्पसंवित्स्पर्शेनैव उन्मनाशक्त्यनुप्रवेशप्रमुखं शिवे योजयेत् ।

९२ मानसं संकल्पात्मकम्, चेतना बुद्धिः, शक्तिः प्राणाख्या, आत्मा एतदुपहितः परिमितप्रमाता; एतच्चतुष्टयं यदा परिक्षीणं, चिच्चमत्कारतामापन्नं, तदा तत् पूर्वोक्तं भैरवं वपुर्भवति ।

स्थितैस्त्वदनुभावतः सपदि वेद्यते सा परा
दशा नृभिरतन्द्रितासमसुधामृतस्यन्दिनी ॥[९३]'

इत्यनेन महागुरुभिर्निबद्धम् ॥ २१ ॥

इत्थं च परमपदप्रविष्टस्य अस्य वस्तुस्वा[९४]-भाव्यात् यदा पुनः प्रसरणं भवति तदा—

## प्राणसमाचारे समदर्शनम् ॥२२॥

परस्फुरत्तात्मकशाक्तपरिमलसंस्कृतस्य प्राणस्य, सम्यक् इति विकसितसमग्रग्रन्थ्यात्मकान्तरावष्टम्भ[९५]बलात्, आ ईषत् बहिर्मन्दमन्दं चारे प्रसरणे, समं चिदानन्दघनात्मतया एकरूपं, दर्शनं संवेदनम्[९६], अर्थात् सर्वदशासु अस्य भवति इत्यर्थः। उक्तं च श्रीमदानन्दभैरवे

---

९३ मानसीः विकल्पस्मृत्यादिरूपाः, करण दिव्यकरणाख्यमूर्ध्वरेचकादिमुद्राबन्धनम्, इत्य शाम्भवोपायसमाविष्टैर्योगिभिः अनुत्तरानन्ददशा अनुभूयते।

९४ विसर्गधाम्नः चिदर्कबिम्बस्य बहिः विचित्रविश्वपदार्थोल्लिलसिपातममरीचिनिचयप्रसारणौन्मुख्य स्वभावः, प्रत्यवमर्शस्वरूपत्वात्।

९५ यत्र विश्वे पाशात्मग्रन्थयः स्वात्मसात्क्रियन्ते, तादृशस्य आन्तरस्वरूपस्य आलम्बनबलात्।

९६ येयं जीवनस्वभावा चिद्रूपस्य स्थितिः, सैव सामान्यस्पन्दरूपा अचेतनप्राणादेः चेतनायमानतासंपादयित्री, अहमिति विकल्पपरामर्शमयी प्राणादिविशिष्टरूपेण प्राग्विष्य भजते, तस्मात् प्राणादिप्रसरणमुपजीव्य

'उत्सृज्य लौकिकाचारमद्वैतं मुक्तिदं श्रयेत् ।
स समं सर्वदेवानां तथा वर्णाश्रमादिके ॥
द्रव्याणां समतादर्शी स मुक्तः सर्वबन्धनैः ।'

इति । अत एव श्रीप्रत्यभिज्ञायाम्

'बुद्धिप्राणप्रसरेऽपि बाह्यदेशाद्युपादानानाहितसंकोचानां विश्वात्मस्वरूपलाभ एव ॥'

इत्युक्तम् ॥ २२ ॥

यदा तु अन्तर्मुखतुर्यावधानावष्टम्भप्रकर्षलभ्यं तुर्यातीतपदम् एवमयं न समाविशति, अपि तु पूर्वापरकोटिसंवेद्यतुर्यचमत्कारमात्रे एव संतुष्यन्नास्ते, तदा अस्य–

मध्येऽवरप्रसवः ॥ २३ ॥

पूर्वापरकोट्योस्तुर्यरसमास्वादयतो, मध्ये मध्यदशायाम्[99], अवरः अश्रेष्ठः, प्रसवो व्युत्था-

---

वर्तमाना जागरादितुर्यातीता दशा, अन्यथा तुर्यतदतीतयो व्युत्थानानुपपत्ते, प्राणवृत्तिसद्भावादेव व्युत्थीयते योगिभि, अतो हेयासु प्राथमिकीषु तिसृषु अवस्थासु चिदात्मतया संवेद्यते वेद्यम् इति तात्पर्यम् ।

९७ देवानाम् अनाश्रित सदाशिव ईश्वर अनन्तरुद्रादीनाम् । वर्णाश्रमादि विप्रब्रह्मचार्यादि, आदिना श्वपचादि, द्रव्याणा क्षीरमद्यादीना चिदात्मैक्यतापरामर्शी इत्यथ ।

९८ अनाहितसंकोचानामिति अकृतचित्स्वरूपावृतीनाम् ।

९९ अवरप्रसवो भेदप्रथनात्मा मध्यदशायामेव भवति न सर्वत्र ।

नात्मा कुत्सितः सर्गो जायते । न तु 'विद्यासंहारे तदुत्थस्वप्नदर्शनम्' (२–१०) इत्युक्तसूत्रार्थनीत्या सदा व्यामुह्यति इत्यर्थः । उक्तं श्रीमालिनीविजये

'वासनामात्रलाभेऽपि योऽप्रमत्तो न जायते ।
तमनित्येषु भोगेषु योजयन्ति विनायकाः ॥
तस्मान्न तेषु संसक्तिं कुर्वीतोत्तमवाञ्छया ।'

इति प्रागपि (७१पृ०) संवादितम् ॥ २३ ॥

एवमेव प्रसवेऽपि प्रवृत्ते यदि तुर्यरसावष्टम्भेन मध्यपदं सिञ्चति पुनरपि, तदा—

## मात्रास्वप्रत्ययसंधाने नष्टस्य पुनरुत्थानम् ॥ २४ ॥

मात्रासु[101] पदार्थेषु स्वप्रत्ययसंधानम् ।

'चक्षुषा यच्च संधानं[102] वाचा वा यश्च गोचरः ।
मनश्चिन्तयते यानि बुद्धिश्चैवाध्यवस्यति ॥

---

१०० चिदानन्दघनस्वस्वरूपामृतरसास्वादने समाधानसंस्कारस्य प्राप्तौ प्रमाद्यतो माहेश्वर्यादिभिः, विघ्नैः, सिद्धैश्च अनित्यदिव्यभोगेषु विलोभनात्, तुर्यातीतपदसमावेशाय तेषु रतिः न विधेया इत्यर्थः ।

१०१ मीयन्ते इति मात्राः, रूपादयो विषयाः; पञ्चस्वेव विषयेषु विश्वपदार्थानां परिसमाप्तेः ।

१०२ सधान रूपज्ञानम्, वाचा पश्यन्त्यादिरूपिण्या, यानि गुरादीनि ।

अहङ्कृतानि यान्येव यत्र वेद्यतया स्थितम्[१०३]।
यश्च नास्ति स तत्रैव त्वन्वेष्टव्यः प्रयत्नतः ॥'

इति-श्रीस्वच्छन्दनिरूपितनीत्या 'विश्वमिदम् अहम्', इति चिद्घनात्मरूपतां सर्वत्र अनुसंदधतः[१०४], पूर्वोक्तावरप्रसवात् नष्टस्य, अपहारिततुर्यैकघनचमत्कारमयस्वभावस्य, पुनरुत्थानम् उन्मज्जनं तदैक्यसंपत्संपूर्णत्वं योगिनो भवति इत्यर्थः। तदुक्तं श्रीस्वच्छन्दे

'प्रसह्य चञ्चलीत्येव[१०५] योगिनामपि यन्मनः।'

इत्युपक्रम्य

'यत्र[१०६] ज्ञेयमयो भावः स्थिरः पूर्णः समन्ततः।
मनो न चलितं तस्य सर्वावस्थागतस्य तु ॥

१०३ कल्पितप्रमात्रपेक्षया भिन्नावभासप्राणितम् इदन्तास्पदम् अवलम्ब्यता ग्राह्यभावेन स्थितम्, स इति चित्प्रकाश परमशिवो भावाभावमये विश्वस्मिन् जगति चित्प्रकाशैकात्म्येन प्रकाशमाने अन्वेष्टव्य प्रत्यभिज्ञेय। यथा अय स चिदात्मा प्रकाशो महेश्वर, यत्प्रकाशाभेदेन विश्वमिद प्रकाशते, प्रकाशबाह्यस्य कस्यापि प्रकाशनानुपपत्ते यस्तु अय विश्वप्रकाशात्मा स्वप्रकाश प्रकाश प्रकाशते स एवाहमिति तात्पर्यम्।

१०४ पौन पुन्येन आवेशसद्भावात् अवहितत्वेन विमृशत।

१०५ कुटिल चलति भोगाभिलाषेण व्युत्थानमेव धावति, न अभीष्ट पदमवष्टभ्नाति यस्मात्।

१०६ तत इति अध्याहार्यम् पूर्वपद्यसापेक्षत्वात्, ज्ञेय परतत्त्व, भाव आशय चिन्त्यतुर्यातीतपदमय, स्थिरो निश्चल, पूर्णो निराकाङ्क्ष, समन्तत सर्वसर्विकया, तु अप्यर्थे।

> यत्र यत्र मनो[107] याति ज्ञेयं तत्रैव चिन्तयेत् ।
> चलित्वा यास्यते कुत्र सर्वं शिवमयं यतः ॥'

इति ।

> 'विषयेषु च सर्वेषु इन्द्रियार्थेषु[108] च स्थितम् ।
> यत्र यत्र निरूप्येत नाशिवं विद्यते क्वचित् ॥'

इति च ॥ २४ ॥

इत्थमासादितप्रकर्षो योगी—

## शिवतुल्यो जायते ॥ २५ ॥

तुर्यपरिशीलनप्रकर्षात्[109] प्राप्ततुर्यातीतपदः परिपूर्णस्वच्छस्वच्छन्दचिदानन्दघनेन शिवेन भगवता तुल्यो, देहकलाया अविगलनात् तत्समो जायते[110] । तद्विगलनेन साक्षाच्छिव एव असौ इत्यर्थः । तथा च श्रीकालिकाक्रमे

---

१०७ ईदृशस्य महायोगिनो मन एव परतत्त्वैक्यभावनावाधित कर्तृ तुर्यातीतपदं ज्ञेयं सर्वत्र चिन्तयत्येव । तदुक्तं महागुरुभिः

> 'चिरभावनयौषध्या बद्धे मनसि सद्गतेः ।
> काष्ठकुड्यादिषु क्षिप्ते रसवच्छिवहेमता ॥'

इति ।

१०८ इन्द्रियाणि च अर्थश्च ऐन्द्रियिकं प्रयोजनं च विषयोपभोगः, तेषु स्थितो योगिवरो यो निरूप्येत विचार्येत यत्र कुत्रापि नास्य अशिवमस्ति, सर्वस्य अस्य प्रकाशमानतया प्रकाशघनशिवैकात्म्यात् ।

१०९ पुनः पुनः तुर्यपदपरामर्शनदार्ढ्यात् मध्यधाम्नि प्रोच्छलदहन्ताचमत्कृतिप्ररूढेः ।

११० मुखेन्दुरितिवत् ईषत् न्यूनतया साम्यम् ।

'तस्मान्नित्यमसंदिग्धं बुद्ध्वा योगं गुरोर्मुखात् ।
अविकल्पेन[111] भावेन भावयेत्तन्मयत्वतः ॥
यावत्तत्समतां याति भगवान्भैरवोऽब्रवीत् ।'

इति ॥ २५ ॥

एवमपि च 'येनेदं तद्धि भोगतः' इत्याद्युक्तरीत्या उपनतभोगातिवाहनमात्रप्रयोजनात् देहस्थितिः अस्य न अतिक्रमणीया इत्याह[112]–

## शरीरवृत्तिर्व्रतम् ॥ २६ ॥

प्रोक्तदृशा शिवतुल्यस्य योगिनः शिवाहंभावेन वर्तमानस्य, शरीरे वृत्तिर्वर्तनं यत्, तदेव व्रतम्; स्वस्वरूपविमर्शात्मकनित्योदितपरपूजातत्परस्य नियमेन अनुष्ठेयम् अस्य। तथा च श्रीस्वच्छन्दे

१११ विकल्पहान्या उन्मिषदविकल्पविमर्शावष्टम्भेन शिवमयभावेन तुर्यातीताख्य पद भावयेत्, शिवमयभावनाया भैरवस्वरूपसाम्यप्राप्त्यवधित्वात् ।

११२ आगामिसञ्चितयोः कर्मणो ज्ञानाग्निना भस्मसाद्भावेऽपि प्रारब्धस्य भोगमन्तरेण नाशयितुमशक्यत्वात् जीवन्मुक्तस्य आ प्रारब्धभोगपरिसमाप्तेः देहस्थितिः, चक्रभ्रमिरिव आ वेगावसानात् न अतिवर्तनीया, देहपाते विदेहमुक्तेः अपुनरावर्तनात् ।

'सुप्रदीप्ते[११३] यथा वह्नौ शिखा दृश्येत चाम्बरे ।
देहप्राणस्थितोऽप्यात्मा तद्वल्लीयेत तत्पदे ॥'

इत्युक्त्या देहप्राणाद्यवस्थितस्यैव शिवसमाविष्टत्वमुक्तम् । न पुनस्तस्य देहस्थितिव्यतिरिक्तं व्रतमुपयुक्तम् । यदुक्तं श्रीत्रिकसारे

'देहोत्थिताभिर्मुद्राभिर्यः सदा मुद्रितो बुधः ।
स तु मुद्राधरैः[११४] प्रोक्तः शेषा वै अस्थिधारकाः ॥'

इति । श्रीकुलपञ्चाशिकायामपि

'अव्यक्तलिङ्गिनं दृष्ट्वा संभाषन्ते मरीचयः[११५] ।
लिङ्गिनं नोपसर्पन्ति अतिगुप्ततरा यतः ॥'

इति ॥ २६ ॥

---

११३ देह-मन्त्र-प्राण-आत्म शिवपदानाम् औचित्यात् काष्ठ-अरणि-वह्नि-तच्छिखा-अम्बराणि दृष्टान्तः, तेन अरणिमन्थनयुक्त्या सुप्रदीप्ते प्रज्वालिते वह्नौ सति यथा शिखा ज्वाला दाह्यं दग्ध्वा अम्बरे दृश्यते, तत्र लयात् तदात्मभाव प्राप्ता अवलोक्यते, तद्वद्दिव्यकरणमन्त्रारणिसमुत्तेजनेन देहे यः प्राणः तस्मिन् सुप्रदीप्ते मध्योर्ध्ववाह्युदानाभितामायाति, देहे स्थितो य आत्मा प्रोच्चशुद्धविज्ञानकेवलरूपो वह्निशिखातुल्यः समनान्त समस्त देहदारु दग्ध्वा तस्मिन् तुर्यातीते पदे लीयते, निरुपाधि-परमशिवैकात्म्यमेत्येव इत्यर्थः ।

११४ 'अन्तर्लक्ष्यबहिर्दृष्टि.' इत्याद्युक्तलीत्या शांभवीयमुद्रामुद्रणात् मुद्राधरः, न तु काय करणनिवेशविशेषधारणात् ।

११५ निगूढभैरवीयमुद्राचिह्नितस्य सर्वाः शक्तयः उपसृता आविर्भवन्ति । व्यक्तरूपमुद्राधृतोऽनुपसरणात् ।

एवं-विधस्य अस्य—

## कथा जपः ॥ २७ ॥

'अहमेव परो हंसः शिवः परमकारणम् ।'

इति-श्रीस्वच्छन्दनिरूपितनीत्या नित्यमेव पराहंभावनामयत्वात् ।

'तस्य देवातिदेवस्य परबोधस्वरूपिणः ।
विमर्शः परमा शक्तिः सर्वज्ञा ज्ञानशालिनी ॥'

इति-श्रीकालिकाक्रमनिरूपितनीत्या महामन्त्रात्मकाकृतकाहंविमर्शारूढस्य यद्यदालापादि तत्तदस्य स्वात्मदेवताविमर्शानवरतावर्तनात्मा जपो[११६] जीयते । यदुक्तं श्रीविज्ञानभैरवे

'भूयो भूयः परे भावे भावना भाव्यते हि या ।
जपः सोऽत्र स्वयं नादो मन्त्रात्मा जप्य ईदृशः[११७] ॥'

इति । तथा

---

११६ अनुत्तरज्ञानशालित्वात् योगिनो यत्किंचन आलापादि लौकिकव्यवहारानुसारि तदस्य जपः, अहंपरामर्शसार-स्वात्मदेवताभावनातात्पर्यात्, नहि महाप्रकाशात्मपरप्रमातृरूपता विना किंचिदपि प्रस्फुरेदित्यर्थः।

११७ विश्वपूरणात् परे भावे स्वस्वभावे या भावना, विमर्शना

'अहमेव परो हंसः शिवः परमकारणम् ।'

इत्यादिरूपा भाव्यते संपाद्यते, स जपः, नादोऽहन्तकारविमर्शात्मा, जप्यो जपनीयो स्वात्मदेव । यदुक्तम्

१५

'सकारेण बहिर्याति हकारेण विशेत्पुनः।
हंस-हंसेत्यमुं मन्त्रं जीवो जपति नित्यशः॥
षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः।
जपो देव्या विनिर्दिष्टः सुलभो दुर्लभो जडैः॥'

इति ॥ २७ ॥

ईदृग्जपव्रतवतोऽस्य चर्या[118]माह—

## दानमात्मज्ञानम् ॥ २८ ॥

प्रोक्तचैतन्यरूपस्य आत्मनो यत् ज्ञानं, साक्षात्कारः, तत् अस्य दानम्; दीयते परिपूर्णं स्वरूपम्, दीयते खण्ड्यते विश्वभेदः[119], दायते शोध्यते मायास्वरूपम्, दीयते रक्ष्यते लब्धः शिवात्मा स्वभावश्च अनेन इति कृत्वा[120]।

अथ च दीयते इति दानम्, आत्मज्ञानमेव अनेन अन्तेवासिभ्यो दीयते। तदुक्तम्

---

'नास्योच्चारयिता कश्चित्प्रतिहन्ता न विद्यते।
स्वयमुच्चरते देवि प्राणिनामुरसि स्थितः॥'

इति।

११८ चर्या, स्वरूपसाक्षात्कारोपायस्थितिः कर्तव्यं वा।

११९ विश्वरूपो धरण्यादिशिवान्तं षट्त्रिंशत्तत्त्वलक्षणो भेदः।

१२० डुदाञ् दाने, दो अवखण्डने, दीङ् रक्षणे, दैप् शोधने, एते अत्र धातवः।

'दर्शनात्स्पर्शनाद्वापि विततान्द्भवसागरात् ।
तारयिष्यन्ति योगीन्द्राः[121] कुलाचारप्रतिष्ठिताः ॥'

इति ॥ २८ ॥

यथोक्तनीत्या शिवतुल्यतया नित्यमेवं व्रतजपचर्यानिष्ठत्वात् निजशक्तिचक्रारूढः[122] स एव तत्त्वत उपदेश्यानां प्रतिबोधकः[123] इत्याह—

## योऽविपस्थो ज्ञाहेतुश्च ॥ २९ ॥

अवीन् पशून् पाति इति अविपं 'कवर्गादिषु माहेश्वर्याद्याः पशुमातरः' (३–१९) इत्यभिहितदृशा माहेश्वर्यादिशक्तिचक्रं, तत्र तिष्ठति विदितस्वमाहात्म्यत्वात्[124] प्रभुत्वेन यः प्रतपति, स ज्ञाहेतुः; जानाति इति ज्ञा ज्ञानशक्तिः, तस्या हेतुः, उपदेश्यान् ज्ञानशक्त्या प्रतिबोधयितुं[125]

१२१ योगीन्द्राणां योगिनीसिद्धादीनां दर्शन-स्पर्शन-चरुभोजन-कथन-शास्त्रसंक्रमणादिभिः उपायैः तीव्रशक्तिपातवत्सु अनुग्राह्येषु उपकर्तृत्वम् इत्यर्थः । कुलानां देहाक्षभुवनादीनामाचरणम् आचारः सृष्टिसंहारादिः तत्र अवस्थिताः ।

१२२ स्वशक्तिविकासमयं विश्वमध्यासीनः ।

१२३ स्वस्वरूपप्रत्यभिज्ञापकः ।

१२४ सर्वोऽयं मद्विभव इति प्रत्यभिज्ञातस्वात्मैश्वर्यत्वात् ।

१२५ स्वात्मानं प्रत्यभिज्ञापयितुमित्यर्थः ।

क्षमः । अन्यस्तु शक्तिचक्रपरतन्त्रीकृतत्वात् स्वात्मनि अप्रभविष्णुः[१२६] कथमन्यान् प्रबोधयेत्। यच्छब्दापेक्षया सूत्रेऽत्र तच्छब्दोऽध्याहार्यः । च शब्दो ह्यर्थे । योऽयमविपस्थः स यस्मात् ज्ञानप्रबोधनहेतुस्तस्माद्युक्तमुक्तम् 'दानमात्मज्ञानम्, ( ३–२८ ) इति ।

अन्ये तु 'अक्षरसारूप्यात्[१२७] प्रब्रूयात्' इति निरुक्तस्थित्या 'यो' इति योगीन्द्रः. 'वि' इति विज्ञानम्, 'प' इति पदम्, 'स्थ' इति पदस्थः इत्यस्य अन्त्यमक्षरम् । 'ज्ञ' इति ज्ञाता, 'हे' इति हेयः, 'तु' इति तुच्छता, विसर्जनीयेन विसर्गशक्तिः[१२८], चकारेण अनुक्तसमुच्चयार्थेन कर्ता परामृश्यते इत्याश्रित्य, यो योगीन्द्रो विमर्शशक्त्या स्वरूपात्मविज्ञानपदस्थः, स ज्ञाता कर्ता च अवगन्तव्यः; तदा च अस्य हेयतां तुच्छतां निःसारतां, न तु उपादेयतामा-

---

१२६ माहेश्वर्यादिशक्तिभि पारतन्त्र्याधानात् पशुभावमापितः ।

१२७ अश्नोतेरौणादिकसरन् प्रत्यये, अश्नुते प्रतिशब्दमिष्टार्थप्रकाशितया वेदाङ्गानि व्याप्नोतीत्यक्षरम्, तत्सारूप्यात्, प्रतिशब्दमक्षरसमरूपगतशब्दैर्निर्वचनं विधेयमित्यर्थः ।

१२८ ऊष्मांश.सृष्टिरूपा ।

सादयति इति व्याचक्षते। एतच्च न नः प्रतिभाति, पदार्थसङ्गतेर्नातिचारुत्वात्; प्रतिसूत्रं च ईदृशव्याख्याक्रमस्य सहस्रशो दर्शयितुं शक्यत्वात् ॥ २९ ॥

अस्य च—

स्वशक्तिप्रचयोऽस्य विश्वम् ॥३०॥

यतोऽयं शिवतुल्य उक्तस्ततो यथा

'शक्तयोऽस्य जगत्कृत्स्नम्………………… ।'

इत्याद्याम्नायदृष्टया शिवस्य विश्वं स्वशक्तिमयं, तथा अस्यापि स्वस्याः संविदात्मनः शक्तेः, प्रचयः क्रियाशक्ति[129]स्फुरणरूपो विकासो, विश्वम् । यदुक्तं श्रीमृत्युजिति

'यतो ज्ञान[130]मयो देवो ज्ञानं च बहुधा स्थितम् ।
नियन्त्रितानां बद्धानां त्राणं तन्नेत्रमुच्यते ॥'

कालिकाक्रमेऽपि

---

१२९ विश्वनिर्माणसामर्थ्यं क्रियाशक्तिरित्यर्थः ।

१३० देवः परमेश्वरो ज्ञानमयः, चिन्मात्रपरमार्थः; तच्च ज्ञानं बहुधा स्वातन्त्र्यात् सङ्कोचमाभास्य नानात्वमाश्रित्य स्थितम्, अतश्च सङ्कोचाभासभाजो ये निगूहितस्वरूपतया नियन्त्रिता आमासिता देवेन तत एव बद्धाः, तेषां नानादर्शनोपासाभिः स्वस्वरूपप्रथाहेतुतया यतो देवः त्राणं, तस्मात् निरुक्तदृशा नेत्रमुच्यते न तु चक्षुर्गोलकतया ।

'तत्तद्रूपतया[131] ज्ञानं बहिरन्तः प्रकाशते ।
ज्ञानादृते नार्थसत्ता ज्ञानरूपं ततो जगत् ॥
न हि ज्ञानादृते भावाः केनचिद्विषयीकृताः ।
ज्ञानं तदात्मतां यातमेतस्मादवसीयते[132] ॥
अस्तिनास्तिविभागेन निषेधविधियोगतः ।
ज्ञानात्मता ज्ञेयनिष्ठा भावानां भावनाबलात् ॥
युगपद्वेदनाज्ज्ञानज्ञेययोरेकरूपता[133] ।'

इति ॥ ३० ॥

न केवलं सृष्टिदशायां निजशक्तिविकासोऽस्य विश्वं, यत् तत्पृष्ठपातिनौ—

## स्थितिलयौ ॥ ३१ ॥

'स्वशक्तिप्रचयः' इत्यनुवर्तते । क्रियाशक्त्याभासितस्य विश्वस्य तत्तत्प्रमात्रपेक्षं कंचित्कालं बहिर्मुखत्वावभासनरूपा या स्थितिः, चिन्म-

१३१ नीलसुखादिरूपतया बहिरन्तःप्रकाशमानानां भावानां प्रकाशसारत्वात् तदन्वयव्यतिरेकानुविधायित्वेन पृथक् सत्ता नास्ति इत्यर्थः ।

१३२ यो यमनुपजीव्य नोपलभ्यते स तस्मात् अव्यतिरेकी, यथा मृदं विना घटः, तस्मात् ज्ञानस्यैव ज्ञेयभावात्मतया परिनिष्ठानिश्चय इत्यर्थः ।

१३३ भावाभावरूपाणां नीलसुखादिभावानां, भावनाबलात् स्वात्मसाक्षात्कारबलात्, उभयोः ज्ञानज्ञेययोः एकतमस्यानिष्पत्तिरिदे सत्ताया असंभवात् ऐकरूप्याभ्युपगमः ।

यप्रमातृविश्रान्त्यात्मा च यो लयः, तावेतौ एतस्य स्वशक्तिप्रचय एव; तत्तद्वेद्यं हि आभासमानं विलीयमानं च निजसंविच्छक्त्यात्मकमेव, अन्यथा अस्य संवेदनानुपपत्तेः[१३४] । अत एव श्रीकालिकाक्रमे

'अस्तिनास्तिविभागेन.................... ।'

इत्यादि स्थितिलयपरत्वेनोक्तम् । तथा

'सर्वं शुद्धं निरालम्बं[१३५] ज्ञानं स्वप्रत्ययात्मकम् ।
यः पश्यति स मुक्तात्मा जीवन्नेव न संशयः ॥'

इति ॥ ३१ ॥

नन्वेवं सृष्टिस्थितिलयावस्थासु अन्योन्यभेदावभासमयीषु अस्य स्वरूपान्यथात्वमायातम्[१३६]! इत्याशङ्काशान्त्यर्थमाह—

---

१३४ कल्पितशून्यमायीयादिप्रमातुः अपेक्षया विश्वस्य बाह्यतावभासमयी स्थितिः, कल्पितप्रमातृभावनिमज्जने तदपेक्षिविश्वबाह्यतानवभासनात् चिन्मयस्वरूपविश्रान्तिः विलयः, उभयस्य अस्य स्वसंविच्छक्तिमयत्वात्, तदनभ्युपगमे द्वयोरपि अनयोः उपलब्ध्यनुपपत्तेः इति तात्पर्यम् ।

१३५ आलम्ब्यात् वेद्यात् निष्क्रान्तं, क्रोडीकृताशेषवेद्यम्; स्वप्रत्ययात्मकं स्वाहन्तात्मकम् ।

१३६ वेद्यपरामर्शौन्मुख्ये तदतिरिक्तस्वात्मविमर्शननिरासोऽन्यथात्वम् ।

## तत्प्रवृत्तावप्यनिरासः संवेत्तृभावात् ॥ ३२ ॥

तेषां सृष्ट्यादीनां प्रवृत्तावपि उन्मज्जनेऽपि, नास्य योगिनः संवेत्तृभावात् तुर्यचमत्कारात्मकविमर्शमयात् उपलब्धृत्वात्, निरासश्चलनम्; तन्निरासे कस्यचिदप्यप्रकाशनात् । यदुक्तं तत्रैव

'नाशे[१३७]ऽविद्याप्रपञ्चस्य स्वभावो न विनश्यति ।
उत्पत्तिध्वंसविरहात्तस्मान्नाशो न वास्तवः ॥
यतोऽविद्या समुत्पत्तिध्वंसाभ्यामुपचर्यते ।
यत्स्वभावेन नष्टं न तन्नष्टं कथमुच्यते ॥'

इति । एतदेव स्पन्दे

'अवस्थायुगलं चात्र कार्यकर्तृत्वशब्दितम् ।
कार्यता क्षयिणी तत्र कर्तृत्वं पुनरक्षयम् ॥'

तथा ।

---

१३७ मायोद्भासितदेहाक्षतत्त्वभुवनादिविलयेऽपि सदोदितस्फुरणधर्मिणः संवित्स्वभावस्य उदयास्तमयाभावात् अविनाशिता, व्यवहारदशायामपि ध्वंसोत्पत्त्योः प्रकाशमानतया तदभिन्नयोः प्रकाशान्तर्विश्रान्त्या उपचर्यमाणत्वम् इत्यर्थः ।

१३८ ग्राह्यग्राहकभावभिन्नयोः भोग्यभोक्तृतयोः मध्ये भोग्यात्ममायाप्रपञ्चो भेदनिष्ठो विलीयते उदयते च, भोक्तुः पुनः चिन्मयस्य अकालकलिततया न कथंचित् विलयोदयशङ्का ।

'कार्योन्मुखः प्रयत्नो यः केवलं सोऽत्र लुप्यते ।
तस्मिँल्लुप्ते विलुप्तोऽस्मीत्यबुधः प्रतिपद्यते ॥
न तु योऽन्तर्मुखो भावः सर्वज्ञत्वगुणास्पदम् ।
तस्य लोपः कदाचित्स्यादन्यस्यानुपलम्भनात्' ॥'

इत्यनेनोक्तम् ॥ ३२ ॥

अस्य योगिनः—

## सुखदुःखयोर्बहिर्मननम् ॥ ३३ ॥

वेद्यस्पर्शजातयोः सुखदुःखयोर्बहिरिव नीलादिवत् इदन्ताभासतया मननं संवेदनं, न तु लौकिकवत् अहन्तास्पर्शनेन; अस्य हि 'स्वशक्तिप्रचयोऽस्य विश्वम्' (३–३०) इत्युक्तसूत्रार्थनीत्या सर्वम् अहन्ताच्छादितत्वेन स्फुरति, न तु नियतं सुखदुःखाद्येव, इत्येवंपरमेतत् । योगी हि प्रशान्तपुर्यष्टकप्रमातृभावः कथं

---

१३९ यथा कश्चित् देवदत्तो गृहाद्यवस्थितः येनापि आहूतो भोः देवदत्त ! इति, स आत्मानमपह्नोतुकामः प्रत्याह नाहमस्मि इति । एवमुक्ते प्रत्युत स्थितोऽहमस्मीति प्रतिपादितं भवति न तु असंनिधानम्, इत्येव प्रकारोऽप्रबुद्धविषये, तस्मात् अभावसमाध्यवस्थासु कार्याभावात् करणव्यापारविरतिमात्रेण आत्माभावप्रत्ययो भ्रान्तिरेव इत्याशयः।

१४० अन्तर्मुखमहत्परिनाधिगतायां विश्वमनीलनूकमायं स्यादित्यर्थः ।

## तत्प्रवृत्तावप्यनिरासः संवे-
## त्तृभावात् ॥ ३२ ॥

तेषां सृष्ट्यादीनां प्रवृत्तावपि उन्मज्जनेऽपि, नास्य योगिनः संवेत्तृभावात् तुर्यचमत्कारात्मकविमर्शमयात् उपलब्धृत्वात्, निरासश्चलनम्; तन्निरासे कस्यचिदप्यप्रकाशनात् । यदुक्तं तत्रैव

[137]'नाशेऽविद्याप्रपञ्चस्य स्वभावो न विनश्यति ।
उत्पत्तिध्वंसविरहात्तस्मान्नाशो न वास्तवः ॥
यतोऽविद्या समुत्पत्तिध्वंसाभ्यामुपचर्यते ।
यत्स्वभावेन नष्टं न तन्नष्टं कथमुच्यते ॥'

इति । एतदेव स्पन्दे

[138]'अवस्थायुगलं चात्र कार्यकर्तृत्वशब्दितम् ।
कार्यता क्षयिणी तत्र कर्तृत्वं पुनरक्षयम् ॥'

तथा ।

---

१३७ मायोल्लासितदेहाक्षतत्त्वभुवनादिविलयेऽपि सदोदितस्फुरणधर्मिणः संवित्स्वभावस्य उदयास्तमयाभावात् अविनाशिता, व्यवहारदशायामपि ध्वंसोत्पत्त्योः *प्रकाश्यमानतया तदभिन्नयोः प्रकाशान्तर्विश्रान्त्या* उपचर्यमाणत्वम् इत्यर्थः ।

१३८ ग्राह्यग्राहकभावभिन्नयोः भोग्यभोक्तृतयोः मध्ये भोग्यात्म-*मायाप्रपञ्चो भेदनिष्ठो विलीयते* उदयते च, भोक्तुः पुनः *चिन्मयस्य* अकालकलिततया न कथंचित् विलयोदयशङ्का ।

'कार्योन्मुखः प्रयत्नो यः केवलं सोऽत्र लुप्यते ।
तस्मिँल्लुप्ते विलुप्तोऽस्मीत्यबुधः मतिपद्यते ॥
न तु योऽन्तर्मुखो भावः सर्वज्ञत्वगुणास्पदम् ।
तस्य लोपः कदाचित्स्यादन्यस्यानुपलम्भनात् ॥'

इत्यनेनोक्तम् ॥ ३२ ॥

अस्य योगिनः—

## सुखदुःखयोर्बहिर्मननम् ॥३३॥

वेद्यस्पर्शजातयोः सुखदुःखयोर्बहिरिव नीलादिवत् इदन्ताभासतया मननं संवेदनं, न तु लौकिकवत् अहन्तास्पर्शनेन; अस्य हि 'स्वशक्तिप्रचयोऽस्य विश्वम्' (३-३०) इत्युक्तसूत्रार्थनीत्या सर्वम् अहन्ताच्छादितत्वेन स्फुरति, न तु नियतं सुखदुःखाद्येव, इत्येवंपरमेतत्। योगी हि प्रशान्तपुर्यष्टकप्रमातृभावः कथं

१३९ यथा कश्चित् देवदत्तो गृहाद्बहिःस्थितः केनापि आहूतो भोः देवदत्त ! इति, स आत्मानमपह्नोतुकामः ब्रूयात् नाहमस्मि इति । एवमुक्ते अत्रैव स्थितोऽहमस्मीति प्रतिपादितं भवति न तु असंनिधानम्, इत्येवं प्रकारोऽत्रानुद्भविष्यते, तस्मात् अभानप्रमाणत्वव्याप्त्या कार्याभावात् कारणाभावानुमितिमात्रेण आत्माभानप्रमये भ्रान्तिरेव इत्याशयः।

१४० अन्तर्मुखस्वरूपविमर्शविधायां विश्रमणीलक्षणभावं स्यादित्यर्थः ।

## तत्प्रवृत्तावप्यनिरासः संवेत्तृभावात् ॥ ३२ ॥

तेषां सृष्ट्यादीनां प्रवृत्तावपि उन्मज्जनेऽपि, नास्य योगिनः संवेत्तृभावात् तुर्यचमत्कारात्मकविमर्शमयात् उपलब्धृत्वात्, निरासश्चलनम्; तन्निरासे कस्यचिदप्यप्रकाशनात् । यदुक्तं तत्रैव

[137]‘नाशेऽविद्याप्रपञ्चस्य स्वभावो न विनश्यति ।
उत्पत्तिध्वंसविरहात्तस्यान्नाशो न वास्तवः ॥
यतोऽविद्या समुत्पत्तिध्वंसाभ्यामुपचर्यते ।
यत्स्वभावेन नष्टं न तन्नष्टं कथमुच्यते ॥’

इति । एतदेव स्पन्दे

‘अवस्थायुगलं[138] चात्र कार्यकर्तृत्वशब्दितम् ।
कार्यता क्षयिणी तत्र कर्तृत्वं पुनरक्षयम् ॥’

तथा ।

---

१३७ मायोद्भासितदेहाक्षतत्त्वभुवनादिविलयेऽपि सदोदितस्फुरणधर्मिणः संवित्स्वभावस्य उदयास्तमयाभावात् अविनाशिता, व्यवहारदशायामपि ध्वंसोत्पत्त्योः प्रकाशमानतया तदभिन्नयोः प्रकाशान्तर्विश्रान्त्या उपचर्यमाणत्वम् इत्यर्थः ।

१३८ ग्राह्यग्राहकभावभिन्नयोः भोग्यभोक्तृतयोः मध्ये भोग्यात्ममायाप्रपञ्चो भेदनिष्ठो विलीयते उदयते च, भोक्तुः पुनः चिन्मयस्य अकालकलिततया न कथंचित् विलयोदयशङ्का ।

'कार्योन्मुखः प्रयत्नो यः केवलं सोऽत्र लुप्यते ।
तस्मिँल्लुप्ते विलुप्तोऽस्मीत्यबुधः प्रतिपद्यते[139] ॥
न तु योऽन्तर्मुखो भावः सर्वज्ञत्वगुणास्पदम् ।
तस्य लोपः कदाचित्स्यादन्यस्यानुपलम्भनात्[140] ॥'

इत्यनेनोक्तम् ॥ ३२ ॥

अस्य योगिनः—

## सुखदुःखयोर्बहिर्मननम् ॥३३॥

वेद्यस्पर्शजातयोः सुखदुःखयोर्बहिरिव नीलादिवत् इदन्ताभासतया मननं संवेदनं, न तु लौकिकवत् अहन्तास्पर्शनेन; अस्य हि 'स्वशक्तिप्रचयोऽस्य विश्वम्' (३–३०) इत्युक्तसूत्रार्थनीत्या सर्वम् अहन्ताच्छादितत्वेन स्फुरति, न तु नियतं सुखदुःखाद्येव, इत्येवंपरमेतत् । योगी हि प्रशान्तपुर्यष्टकप्रमातृभावः कथं

१३९ यथा कश्चित् देवदत्तो गृहाद्यवस्थित येनापि आहूतो भो देवदत्त ! इति, स आत्मानमपह्नोतुकाम प्रत्याह नाहमस्मि इति । एवमुक्ते प्रत्युत स्थितोऽहमस्मीति प्रतिपादित भवति न तु असन्निधानम्, इत्येव प्रकारोऽप्रबुद्धविषये, तस्मात् अभावसमाध्यवस्थासु कार्याभावात् करणव्यापारनिरतिमात्रेण आत्माभावप्रत्ययो भ्रान्तिरेव इत्याशय ।

१४० अन्तर्मुखस्वरूपविमर्शिततया निधमनीलन्यूकप्राय स्यादित्यर्थं ।

सुखदुःखाभ्यां स्पृश्यते । तथा च श्रीप्रत्यभिज्ञासूत्रविमर्शिन्याम् ।

'ग्राहकभूमिकोत्तीर्णानां वास्तवप्रमातृदशाप्रपन्नानां तत्तत्स्वहेतूपस्थापितसुखदुःखसाक्षात्कारेऽपि न तेषां सुखदुःखादि, नोत्पद्यत एव वा सुखादि हेतुवैकल्यात्[141] सहजानन्दाविर्भावस्तु तदा स्यात् ॥[142]'

इत्युक्तम् । अत एव

'न दुःखं न सुखं यत्र न ग्राह्यं ग्राहको न च ।
न चास्ति मूढभावोऽपि तदस्ति परमार्थतः ॥[143]'

इति स्पन्दे निरूपितम् ॥ ३३ ॥

यतश्च उत्तीर्णपुर्यष्टकप्रमातृभावस्य योगिनो नान्तः सुखदुःखसंस्पर्शः, अत एवासौ—

## तद्विमुक्तस्तु केवली ॥ ३४ ॥

ताभ्यां सुखदुःखाभ्यां विशेषेण मुक्तः संस्कारमात्रेणापि अन्तर् असंस्पृष्टः, केवली,

---

१४१ विचित्रस्रक्चन्दनवनितादयः सुखहेतुः, द्वेष्योपगमो दुःखहेतुः ।

१४२ सुखादिहेतूनां चित्प्रकाशान्तर्मुद्रिततया चमत्करणात् तदभावः।

१४३ सुखदुःखाद्याश्रयावस्थाद्वयेन विनश्वरस्वभावेन अस्पृष्टस्य संविद्रूपस्य तदनाकलितत्वात्, यौगपद्यस्यापि संवेद्यत्वात् संवेदकसत्ता तत्र अभ्युपगम्यते, अन्यथा तदीयत्कालिकस्मृत्यनुपपत्तेः ।

केवलं चिन्मात्रप्रमातृतारूपं यस्य । तदुक्तं श्रीकालिकाक्रमे

> 'सुखदुःखादिविज्ञानविकल्पाबुल्पकल्पितम् ।
> भित्त्वा द्वैतमहामोहं योगी योगफलं लभेत् ॥'

इति । तु-शब्दो वक्ष्यमाणापेक्षया विशेषद्योतकः, एवमुत्तरसूत्रगतोऽपि एतत्सूत्रापेक्षया ॥ ३४ ॥

यदाह—

**मोहप्रतिसंहतस्तु कर्मात्मा ॥३५॥**

मोहेन अज्ञानेन, प्रतिसंहतः तदेकघनः, तत एव सुखदुःखाश्रयो यः, स पुनः कर्मात्मा नित्यं शुभाशुभकलङ्कितः । तदुक्तं तत्रैव

> 'यदविद्यादततया विकल्पविधियोगतः ।
> शिवादीनैव झटिति समुद्भावयतेऽखिलान् ॥
> ततः शुभाशुभा भावा लक्ष्यन्ते तद्वशात्ततः ।
> अशुभेभ्यश्च भावेभ्यः परं दुःखं प्रजायते ॥'

इति ॥ ३५ ॥

---

१४४ अञ्जनस्य घटपटादिविविधविकल्पजालकल्पनामासितस्य शिवादितत्त्वानाम् अनुचरचिह्नत्वभानतया आरामर्शनात् मायीयमल-मलिनतां प्राप्य शुभाशुभकर्मनत्पथनुपदुःखानुभवः ।' तज्ज्ञस्य तु विश्वस्य भावस्तोके 'स्वात्मविमर्शितमिदम्' इति प्रतिविधानस्य सहजमुखा-सिमांष इत्यर्थः ।

एवमीदृशस्यापि कर्मात्मनो यदा अनर्गलमाहेशशक्तिपातवशोन्मिषितसहजस्वातन्त्र्ययोगो भवति, तदा अस्य—

## भेदतिरस्कारे सर्गान्तरकर्मत्वम् ॥ ३६ ॥

शरीरप्राणाद्यहन्ताभिमानात्मनः सकलप्रलयाकलादिप्रमातृ[145]उचितस्य भेदस्य, तिरस्कारे स्थितस्यापि चिद्घनस्वभावोन्मज्जनाद् अपहस्तने सति, क्रमेण मन्त्र-मन्त्रेश्वर-मन्त्रमहेश्वरात्मकस्वमाहात्म्यावाप्तौ, सर्गान्तरकर्मत्वं यथाभिलषितनिर्मेयनिर्मातृत्वं भवति । तथा च श्रीस्वच्छन्दे

'त्रि[146]गुणेन तु जप्तेन स्वच्छन्दसदृशो भवेत् ।'

इति स्वच्छन्दसादृश्येन भेदतिरस्कारमस्य उक्त्वा

---

१४५ मायापदे शून्यप्रमातृरूपाः प्रलयाकलाः, तेषां प्रलीनकल्पं विश्वं प्रमेयम् स्वौचित्यात्; सकला ब्रह्मादिकीटान्ताः क्षेत्रज्ञा भिन्नभिन्नप्रायं विश्वं पश्यन्त', तेषां तथाभूतमेव सर्वतो भिन्नं परिमितं प्रमेयम् । इत्थं प्रमातॄणां यथा-स्वस्वभाव भेदाभास इत्यर्थः ।

१४६ त्रैगुण्यमनेकगुणतोपलक्षणम् । महामन्त्रात्मकपरिपूर्णाहंभावेन स्वस्वभावपरामर्शने अप्रहितत्वात् स्वच्छन्दसादृश्यम् ।

'ब्रह्मविष्ण्विन्द्रदेवानां सिद्धदैत्योरगेशिनाम्[147] ॥
भयदाता च हर्ता च शापानुग्रहकृद्भवेत् ।
दर्पं हरति कालस्य पातयेद्भूधरानपि ॥'

इत्युक्तम् ॥ ३६ ॥

न च एतदस्य असंभाव्यम्, यतः—

## करणशक्तिः स्वतोऽनुभवात् ॥ ३७ ॥

स्वतः स्वस्मादेवानुभवात् संकल्पस्वप्नादौ, करणशक्तिः[148] तत्तदसाधारणार्थनिर्मातृत्वम् आत्मनः सिद्धमेव। अनेनैव आशयेन श्रीप्रत्यभिज्ञायाम्

.'अत एव यथाभीष्टसमुल्लेखावभासनात्[149] ।
ज्ञानक्रिये स्फुटे एव सिद्धे सर्वस्य जीवतः ॥'

इत्युक्तम् । तथासंभवात् यदि चैतत् गाढा-

---

१४७ उरगानामीशते वश्चीला इति उरगेशिनः शेषादयः, शापानुग्रहादिकृत्त्वात् सिद्धादीन् प्रति अस्य भयदातृभयहर्तृत्वम् ।

१४८ विश्ववैचित्र्यनिर्माणशक्तिः ।

१४९ यथाभिमतवस्तूनां बहिरसत्त्वात् अननुभूतानामपि सम्यगुल्लेखनात् प्रकाशनाच्च हेतोः यस्य कस्यचित् ब्रह्मादिकीटान्तस्य प्राणिनः उल्लेखनात्मिका क्रियाशक्तिः अवभासनात्मिका ज्ञानशक्तिश्च स्वाभाविकी इति सिध्यति, तस्मात् कल्पितप्रमातृभूमिकायामपि व्यतिरिक्तेश्वरोपकृतसाध्यप्रतिष्ठितमनुष्यजीवस्य यथाभिमतोल्लेखनादिव्यापारसंभावनाभावात् ज्ञानक्रियाख्यापारैश्वर्यस्यैव स्फुटं सम्यगभिव्यक्ततायाः संभवः ।

भिनिवेशेन विमृशति, तदा सर्वसाधारणीं[१५०] अभीष्टार्थनिर्मातृतापि भवति। तदुक्तं तत्त्वगर्भे

'यदा[१५१] तु तेऽपि सुव्यक्तस्वसामर्थ्यगुणोज्ज्वलाः।
भवेद्दृढतरादूरदारिता दार्ढ्यदीनता ।
तदा च तेषां संकल्पः कल्पपादपतां व्रजेत् ॥'

इति ॥ ३७ ॥

यतश्च करणशक्तिशब्दोक्त्या तुर्यात्मा स्वातन्त्र्यशक्तिरेव बोधरूपस्य प्रमातुः सारम्[१५२], अतो मायाशक्त्यपहस्तिततत्स्वरूपोत्तेजनाय—

## त्रिपदाद्यनुप्राणनम् ॥३८॥

त्रयाणां भावौन्मुख्यतदभिष्वङ्गतदन्तर्मुखीभावनामयानां सृष्टिस्थितिलयशब्दोक्तानां प-

---

१५० विमर्शातिशयवशात् सर्वजनै तन्निर्मितिं द्रष्टुं शक्यते, प्रसिद्ध-विश्वामित्रादिमुनिरचितनूतनस्वर्गसृष्टिगाथावत् इत्यर्थः ।

१५१ यदा ते योगिन सुस्फुट स्वकीयज्ञानक्रियाशक्तिशालिनः, तदा तेषां अभीष्टपदार्थनिर्मिते दार्ढ्यदीनता अस्थैर्यं दृढतरं यथा, तथा अदूरमचिराय दारिता खण्डिता भवति, तत्संकल्पस्य च कल्पतरुवत् चिन्तितार्थदायित्वात् इत्यर्थः ।

१५२ अन्यथा स्वातन्त्र्यसारताविरहे निर्विमर्शस्य संवित्प्रकाशस्य तत्तद्भावजातप्रतिफलिततायामपि स्फटिकादिवत् जाड्यापत्तेः विश्वव्यवहार-विप्रलोप स्यादित्यर्थः ।

दानामवस्थानां, यद् आदि प्रधानं त्रिचमत्कृति-त्वेन आनन्दघनं तुर्याख्यं पदं मायाशक्त्याच्छादितमपि तत्तद्विषयोपभोगाद्यवसरेषु विद्युद्वदाभासमानं, तेन तत्तदवसरेषु क्षणमात्रोदितेनापि, अनुप्राणनम् अन्तर्मुखतद्विमर्शावस्थितितारतम्येन अनुगततया प्राणनम्, आत्मनस्तेनैव जीवितेनापि जीवितस्य उत्तेजनं कुर्यात्[१५३] । तदुक्तं श्रीविज्ञानभैरवे

'अन्तः स्वानुभवानन्दा[१५४] विकल्पोन्मुक्तगोचरा ।
यावस्था भरिताकारा भैरवी भैरवात्मनः ॥
तद्वपुस्तत्त्वतो ज्ञेयं विमलं विश्वपूरणम् ।'

इत्याद्युपक्रम्य

---

१५३ वनितादिविषयोपभोगेषु विगलितवेद्यान्तरसंवेदनं तुर्यपदमुदयदपि पशुजने प्रत्यक्षरूपादिविषयव्यवहितं संवेद्यते, निरावरणं तु तदवहितैः, एतेन जीवितात्मतुर्यपदेन जीवत्स्वरूपस्य आत्मनः तस्मिन् एव अवहितीकरणमुत्तेजनम् इत्यर्थः ।

१५४ अन्तः पूर्णाहन्तायां स्वानुभवः स्वप्रकाशः आनन्द एव रूपं यस्याः सा अकिंचिच्चिन्तनमयी, अवस्थानु भैरवरूपस्य आत्मनो मम अव्यतिरिक्ता यावत्रवस्था, भरितोऽशेषविश्वाभेदचमत्कारमय आकारः स्वरूपं यस्याः सा तादृशी, तदेव च तत्त्वतः परमार्थतो विमलं, स्वमित्यामायिकजगदनाच्छादितं विश्वपूरणमशेषाकारभाग्रूपं वपुः स्वरूपं ज्ञेयम् न तु भूतमयम् ।

भिनिवेशेन विमृशति, तदा सर्वसाधारणाम्[150] अभीष्टार्थनिर्मातृतापि भवति। तदुक्तं तत्त्वगर्भे

'यदा तु तेऽपि सुव्यक्तस्वसामर्थ्यगुणोज्ज्वलाः ।
भवेद्दृढतरादूरदारिता दार्ढ्यदीनता ।
तदा च तेषां संकल्पः कल्पपादपतां व्रजेत् ॥'[151]

इति ॥ ३७ ॥

यतश्च करणशक्तिशब्दोक्त्या तुर्यात्मा स्वातन्त्र्यशक्तिरेव बोधरूपस्य प्रमातुः सारम्[152], अतो मायाशक्त्यपहस्तिततत्स्वरूपोत्तेजनाय—

## त्रिपदाद्यनुप्राणनम् ॥३८॥

त्रयाणां भावौन्मुख्यतदभिष्वङ्गतदन्तर्मुखीभावनामयानां सृष्टिस्थितिलयशब्दोक्तानां प-

---

१५० विमर्शातिशयवशात् सर्वजनै. तन्निर्मितिः द्रष्टु शक्यते, प्रसिद्ध-विश्वामित्रादिमुनिरचितनूतनस्वर्गसृष्टिगाथावत् इत्यर्थः ।

१५१ यदा ते योगिन. सुस्फुट स्वकीयज्ञानक्रियाशक्तिशालिनः, तदा तेषा अभीष्टपदार्थनिर्मितेः दार्ढ्यदीनता अस्थैर्यं दृढतर यथा, तथा अदूरमचिराय दारिता खण्डिता भवति, तत्संकल्पस्य च कल्पतरुवत् चिन्तितार्थप्रदायित्वात् इत्यर्थ. ।

१५२ अन्यथा स्वातन्त्र्यसारताविरहे निर्विमर्शस्य संविन्प्रकाशस्य तत्तद्भावजातप्रतिफलितताायामपि स्फटिकादिवत् जाड्यापत्तेः विश्वव्यवहारविप्रलोप. स्यादित्यर्थः ।

[158] गीतादिविषयास्वादासमसौख्यैकतात्मनः ।
योगिनस्तन्मयत्वेन मनोरूढेस्तदात्मता ॥'

इत्यादिना उपायप्रदर्शनेन प्रपञ्चितम् । एतच्च

'अतिक्रुद्ध[159]ः प्रहृष्टो वा किं करोमीति वा मृशन् ।
धावन्वा यत्पदं गच्छेत्तत्र स्पन्दः प्रतिष्ठितः ॥'

इत्यादिना

'......................प्रबुद्धः स्यादनावृतः ॥'

इत्यन्तेन प्रदर्शितम् । एतत् स्पन्दनिर्णये निराकाङ्क्षं[160] मयैव निर्णीतम् । 'त्रिषु चतुर्थम् ...' (३–२०) इति सूत्रेण जागरादौ तुर्यानुप्राणनमुक्तम् । अनेन सर्वदशानुगतादिमध्यान्तेषु सृष्टिस्थितिसंहारनिरूपितया भङ्ग्या निरूपितेषु इति विशेषः[161] ॥ ३८ ॥

---

१५८ गीतमादि येषा वशवीणाकलरवादीना विषयाणा चमत्करणेन उपजनितानुपमसुखे समाहितचित्तस्य शाक्तस्पर्शविशेन ब्रह्मसुखावाप्ति ।

१५९ अतिक्रोधादिना प्रकारनयेण दु खसुखमोहात्मविषयग्रहणरूपान्तःकरणव्यापारमयेन, तथा धावच्छब्दोपलक्षितेन कर्मेन्द्रियव्यापारेण च, जाग्रदवस्थाविषयाणि अन्यानि एव विधानि प्रकारान्तराणि संग्राह्याणि। इत्थ विचित्रावस्थासु निरालम्बनचित्तवृत्ति या भूमिकामधितिष्ठेत् तन्पदे स्वभावमात्राधारस्य प्रत्यस्तमितसमस्तविशेषशक्तिचक्रपरमात्मधर्मस्य प्रतिष्ठितस्पन्दस्य उपलब्धिरित्यर्थ. ।

१६० असदेहनिर्णयात् प्रबुद्धविषयजिज्ञासाया असभवात् इत्यर्थ ।

१६१ पौर्वापर्येण प्रोक्तयोरनयो सूत्रयो अर्थैक्यतास्वीकरणेपि सामान्यविधिविशेषार्थरूपरचनासद्भावात् पौनरुक्त्यविरोधपरिहार ।

१५५
'शक्तिसंगमसंक्षुब्धशक्त्यावेशावसानिकम् ।
यत्सुखं ब्रह्मतत्त्वस्य तत्सुखं स्वाक्यमुच्यते ॥
१५६
लेहनामन्थनाकोटैः स्त्रीसुखस्य भरात्स्मृतेः ।
शक्त्यभावेऽपि देवेशि भवेदानन्दसंप्लवः ॥
आनन्दे महति प्राप्ते दृष्टे वा बान्धवे चिरात् ।
आनन्दमुद्गतं ध्यात्वा तन्मयस्तल्लयीभवेत् ॥
जग्धिपानकृतोल्लासरसानन्दविजृम्भणात् ।
भावयेद्भरितं भावं महानन्दमयो भवेत् ॥

---

१५५ व्यक्तस्त्रीसंगमं विना तत्संगमोपजनितानन्दस्मृतिस्मरणेनैव य आनन्दोद्गमः स स्वीयो ब्रह्मानन्दोऽवसेयः । यदुक्तम्

'जायया संपरिष्वक्तो न बाह्यं वेद नान्तरम् ।
निदर्शनं श्रुतिः प्राह मूर्खस्तं मन्यते विधिम् ॥
न सृष्टिर्जायते लिङ्गात् भगांशापरितश्च ।
आनन्दोच्छलिता शक्तिः सृजत्यात्मानमात्मना ॥'

इत्याद्युक्त्या स्त्रीसंगानन्दाविर्भूतायाम् आनन्दशक्तौ समावेशस्य, अन्ते व्याप्तिसंप्रदायभावेन स्वात्ममात्रनिष्ठ ब्रह्मतत्त्वस्यैव भावनीयम्, यद्वा विषयसुखवशात्संगमसंक्षुब्धायां चिच्छक्तौ य आवेशः तस्य अवसाने भवं सुखं स्वरूपस्यैव ।

१५६ लेहनम् परागरसास्वादनम्, आमन्थनं प्रधानाङ्गविलोडनम् आलिङ्गनं वा, आकोटनमाघातः; नखक्षतादि वा, इत्याद्युक्तनारीरति-भावैर्दीपितस्य आनन्दस्य अतिशयस्मरणात् उत्पन्नानन्दमयः स्वात्मैव विभाव्यः ।

१५७ विशदमोदकघृतलेहनादिरसास्वादनात् विजृम्भितानन्दोत्कर्षेण आनन्दभरितावस्था [illegible] अनुपरगुणानाशित्व

[१५८] गीतादिविषयास्वादासमसौख्यैकतात्मनः ।
योगिनस्तन्मयत्वेन मनोरूढेस्तदात्मता ॥'

इत्यादिना उपायप्रदर्शनेन प्रपञ्चितम् । एतच्च

'अतिक्रुद्धः[१५९] प्रहृष्टो वा किं करोमीति वा मृशन् ।
धावन्वा यत्पदं गच्छेत्तत्र स्पन्दः प्रतिष्ठितः ॥'

इत्यादिना

'.............................प्रबुद्धः स्यादनावृतः ॥'

इत्यन्तेन प्रदर्शितम् । एतत् स्पन्दनिर्णये निराकाङ्क्षं[१६०] मयैव निर्णीतम् । 'त्रिषु चतुर्थम् ...' (३–२०) इति सूत्रेण जागरादौ तुर्यानुप्राणनमुक्तम् । अनेन सर्वदशानुगतादिमध्यान्तेषु सृष्टिस्थितिसंहारनिरूपितया भङ्ग्या निरूपितेषु इति विशेषः[१६१] ॥ ३८ ॥

---

१५८ गीतमादि येषा यद्यावीणाकलरवादीना विषयाणा चमत्करणेन उपजनितानुपमसुखे समाहितचित्तस्य शाक्तस्पर्शविशेन ब्रह्मसुखावाप्ति ।

१५९ अतिक्रोधादिना प्रकारनयेण दुःखसुखमोहात्मविषयग्रहणरूपान्तःकरणव्यापारमयेन, तथा धावच्छब्दोपलक्षितेन कर्मेन्द्रियव्यापारेण च, जाग्रदवस्थाविषयाणि अन्यानि एव विधानि प्रकारान्तराणि संग्राह्याणि। इत्थ विचित्रावस्थासु निरालम्बनचित्तवृत्ति या भूमिकामधितिष्ठेत् तत्र -पदे स्वभावमात्राधारस्य प्रत्यस्तमितसमस्तविशेषशक्तिचक्रपरमात्मधर्मस्य प्रतिष्ठितस्पन्दस्य उपलब्धिरित्यर्थं ।

१६० असदेहनिर्णयात् प्रबुद्धविषयजिज्ञासाया असम्भवात् इत्यर्थ ।

१६१ पौर्वापर्येण प्रोक्तयोरनयो सूत्रयो अर्थैक्यतास्वीकरणेपि सामान्यविशिष्टार्थरूपरचनासद्भावात् पौनरुक्त्यविरोधपरिहार ।

एतच्च त्रिपदाद्यनुप्राणनमन्तर्मुखत्वावष्टम्भत्वदशायामेवासाद्य न संतुष्येत्, अपि तु—

चित्तस्थितिवच्छरीरकरण-
बाह्येषु ॥ ३९ ॥

'त्रिपदाद्यनुप्राणनम्' इत्येव। यथा अन्तर्मुखरूपायां चित्तस्थितौ तुर्येणानुप्राणनं कुर्यात्, तथा शरीरकरणबाह्याभासात्मिकायां बहिर्मुखतायामपि आन्तरविमर्शावष्टम्भबलात् क्रमाक्रमं तारतम्यभाजा तेन अनुप्राणनं कुर्यात्[१६२]। यदुक्तं श्रीविज्ञानभैरवे

> 'सर्वं जगत्स्वदेहं वा स्वानन्दभरितं स्मरेत्।
> युगपत्स्वामृतेनैव परानन्दमयो भवेत्[१६३] ॥'

इति। एवं हि आनन्दात्मा स्वातन्त्र्यशक्तिः सर्वदशासु स्फुटीभूता सती यथेष्टनिर्माणकारिणी भवति ॥ ३९ ॥

---

१६२ कादाचित्कस्वरूपविश्रान्त्यात्मिकाया दशाया, विद्युत्प्रकाशमिव क्षणमात्रस्थायिन तुर्यचमत्कारमासाद्य, आनन्दभरिततया यथा संतोष, एव बहिरौन्मुख्येऽपि संततमानन्दमयपरमार्थामृतरसपर्यवसेकात्, तद्विमर्शानन्दविकस्वितत्वम् इति तात्पर्यम्।

१६३ सर्वत्र बहिरभिमते वस्तुजाते चिदानन्दघनरसकणिकाच्छुरिततया परिपूर्णां शिवतां विभावयतो जायते अनुत्तरानन्दमयस्वरूपसमापत्त इत्यर्थः।

यदा तु अयमेव आन्तरीं तुर्यदशाम्[164] आत्मत्वेन न विमृशति, तदा देहादिप्रमातृताभावाद् अपूर्णमन्यतात्मकाणवमलरूपात्—

## अभिलाषाद्बहिर्गतिः संवाह्यस्य ॥ ४० ॥

शक्तिचक्राधिष्ठितैः कञ्चुकान्तःकरणबहिष्करणतन्मात्रभूतैः[165] सह, संवाह्यते योनेर्योन्यन्तरं नीयते इति संवाह्यः, कर्मात्मरूपः पशुः तस्य

'......................अभिर्लापो मलोऽत्र तु ।'[166]

इति श्रीस्वच्छन्दोक्तनीत्या अपूर्णमन्यतात्मकाविद्याख्याणवमलरूपाद् अभिलाषाद्धेतोर्बहिर्गतिः, विषयोन्मुखत्वमेव भवति; न तु अन्तर्मुखरूपावहितत्वं जातुचित् । यदुक्तं कालिकाक्रमे

---

१६४ अनुत्तरानन्दमयीमवस्थामित्यर्थः ।

१६५ कञ्चुकैः मायासहितैः कलाविद्यादिभिः ।

१६६ अभिलाष अपूर्णम्मन्यतात्मा लौकिकास्य, न तु किंचित् मे स्यात् इति ईदृक्, रागतत्त्वस्य एवमात्मकत्वात् । अत्र तु एतस्मिन् आणवे मले निमित्तभूते अन्यत् मलद्वयमाधेयमस्ति इत्यर्थः ।

'यदविद्यावृततया विकल्पविधियोगतः।
शिवादीनैव झटिति समुद्भावयतेखिलान् ॥
ततः शुभाशुभा भावा लक्ष्यन्ते तद्वशत्वतः।
अशुभेभ्यश्च भावेभ्यः परं दुःखं प्रजायते ॥
अतथ्यां कल्पनां कृत्वा पच्यन्ते नरकादिषु।
स्वोत्थैर्दोषैश्च दह्यन्ते वेणवो वह्निना यथा ॥
मायामयैः सदा भावैरविद्यां परिभुञ्जते।
मायामयीं तनुं यान्ति ते जनाः क्लेशभाजनम्[168] ॥'

इति ॥ ४० ॥

यदा तु पारमेशशक्तिपातवशोन्मिषितं स्वं स्वभावमेव विमृशति, तदा अभिलाषाभावाद् न अस्य बहिर्गतिः, अपि तु आत्मारामतैव[169] नित्यमित्याह—

१६७ अविद्यावृतस्य पशोः संततप्रसरत्स्वारसिकविकल्पक्षुब्धतया चित्तरसपरामृष्टतः पुण्यापुण्यकलङ्कस्पृष्टत्वात् तत्तन्निकृष्टदुष्फलपरिणामः।

१६८ मिथ्याकल्पनोपक्षिप्तिपूर्वं स्वसंघट्टजाभिदग्धवेणुवत् स्वोत्पन्नकामादिदोषैः निरयव्यथानुभवनानन्तरम् अवस्तुकल्पभोग्यसंभोगाय भोगायतनपरिग्रहः, पुनरप्येवम्, इत्थं क्लेशात् क्लेशान्तरगतिरविरता भवति आ अनुत्तरशिवज्ञानावाप्तेः इत्यादयः।

१६९ अपूर्णमन्यतामलकार्मणमलरूपाभिलाषविलापनात्, बहिरन्तरं स्व चिदानन्दघनस्वरूपं पश्यतः, चिन्मात्रान्तरस्फुरणचमत्कृतिकल्पं स्वात्मारमणम्।

## तदारूढप्रमितेस्तत्क्षयाज्जीवसंक्षयः ॥ ४१ ॥

तदिति पूर्वनिर्दिष्टसंवेद्यात्मनि तुर्यपदे, आरूढा तद्विमर्शनपरा, प्रमितिः संवित् यस्य योगिनस्तस्य। तदिति अभिलापक्षयात्, जीवस्य संवाह्यात्मनः पुर्यष्टकप्रमातृभावस्य, क्षयः प्रशमः; चित्प्रमातृतयैव स्फुरति इत्यर्थः। यदुक्तं तत्रैव

'यथा स्वप्नानुभूतार्थान्प्रबुद्धो नैव पश्यति ।
तथा भावनया योगी संसारं नैव पश्यति ॥'

इति । तथा

'निरस्य सदसद्वृत्तीः संश्रित्य पदमान्तरम् ।
विहाय कल्पनाजालमद्वैतेन परापरम् ॥

१७० यथा स्वापावस्थायां हरि अन्तःस्वप्नदेशे अनुभूयमाना[illegible] विविधैश्वर्यनदीसमुद्रपुरादीनि वस्तुतोऽसन्ति तदात्वप्रकाशनानि प्रबुद्धो जन [illegible] स्वाप्नविलसितमभिमन्यते, एवं जागरायां [illegible] चिदनुसारिणतया अनवभासनात् चिदभिन्न [illegible] [illegible] [illegible] पर्यालोचयतो योगिन [illegible] [illegible] । [illegible] [illegible] [illegible] माहेश्वराभिन्न [illegible], इति [illegible] [illegible] [illegible] [illegible] [illegible] पुन [illegible] [illegible] ।

य: स्वात्मनिरतो नित्यं कालग्रासैकतत्परः।
कैवल्यपदभाग्योगी स निर्वाणपदं लभेत्[१७१] ॥'

इति । कैवल्यपदभागिति इन्द्रियतन्मात्राभिरसंग्राह्यः ॥ ४१ ॥

नन्वेवं जीवसंक्षये सति अस्य देहपातः प्राप्तः, न च असौ सुप्रबुद्धस्यापि देहिनः सद्य एव दृश्यते, तत्कथमयं तदारूढप्रमितिः[१७२]? इत्याशङ्क्याह—

## भूतकञ्चुकी तदा विमुक्तो भूयः पतिसमः परः ॥ ४२ ॥

तदेति अभिलापक्षयात्, जीवसंक्षये पुर्यष्टकप्रमातृताभिमानविगलने सति, अयं भूतकञ्चुकी, शरीरारम्भीणि भूतानि कञ्चुकमिव व्यतिरिक्तं प्रावरणमिव, न तु अहन्तापदस्प-

---

१७१ नीलसुखाद्यात्मसदसद्वृत्तीनाम् अविकल्पपरामर्शेन परापरकल्पनानां च प्रसरनिरसनपुरःसरं पूर्णाहन्तापदमवष्टभ्य स्वात्मनिमालनपरत्वेन, कालग्रासो 'ग्रसामि' इति कलनात्मनः शिवस्वरूपाति-रिक्तस्य स्थूलस्य कालस्य नैरन्तर्येण ग्रसनप्रवणत्वात् निर्वाणपदलब्धिः इत्यर्थः।

१७२ देहपातेऽपि तुर्यपदारूढिविशेषापरिस्पर्शः।

शीनि[१७३] यस्य, तथाभूतः सन् विमुक्तो निर्वाणभाक्; यतो भूयो बाहुल्येन पतिसमः चिद्घनपारमेश्वरस्वरूपाविष्टः, तत एव परः पूर्णः, 'शरीरवृत्तिर्व्रतम्' (३—२६) इत्युक्तसूत्रार्थनीत्या दलकल्पे[१७४] देहादौ स्थितोऽपि, न तत्प्रमातृतासंस्कारेणापि स्पृष्टः । तदुक्तं श्रीकुलरत्नमालायां

'यदा गुरुवरः सम्यक् कथयेत्तन्न संशयः ।
मुक्तस्तेनैव कालेन यन्त्रस्तिष्ठति केवलम् ॥
किं पुनर्यैकतानस्तु[१७५] परे ब्रह्मणि यः सुधीः ।
क्षणमात्रस्थितो योगी स मुक्तो मोचयेत्प्रजाः ॥'

इति । श्रीमृत्युजित्यपि

'निमेषोन्मेषमात्रं तु तत्त्वं यद्युपलभ्यते ।
तदैव किल मुक्तोऽसौ न पुनर्जन्म चाप्नुयात् ॥'

इति । कुलसारेऽपि

---

१७३ कल्पितपुर्यष्टकादिशरीरे पशुजनवत् परिमिताहम्भावविगलनादित्यर्थ. ।

१७४ दल जीर्णनिर्मोकः । इद तात्पर्यम्, यथा मुक्तायां त्वचि सर्पस्य अहन्ताभिमानाग्रहणम्, एव शिवज्ञानाभ्यसनेन पृथक्तया परामृष्टे देहादौ प्रमातृताभिमानाभाव । यद्वा दल. खड्गपिधानम् यथा खड्गाद्व्यतिरिक्त, तथा व्यतिरिक्ते देहे तत्प्रमातृभावेन नाय स्फुरयते ।

१७५ एकतानोऽनन्यवृत्तिरित्यर्थ ।

'अहो तत्त्वस्य माहात्म्यं ज्ञातमात्रस्य सुन्दरि ।
श्रोत्रान्तरं तु संप्राप्ते तत्क्षणादेव मुच्यते ॥'

इति ॥ ४२ ॥

ननु भूतकञ्चुकित्वमपि अस्य कस्मात् तदैव न निवर्तते ! इत्याह—

**नैसर्गिकः प्राणसंबन्धः ॥ ४३ ॥**

निसर्गात् स्वातन्त्र्यात्मनः स्वभावात् आयातो नैसर्गिकः, प्राणसंबन्धः, संवित् किल भगवती विश्ववैचित्र्यम् अवविभासयिषुः संकोचावभासपूर्वकं संकुचदशेषविश्वस्फुरत्तात्मकप्राणनारूपग्राहकभूमिकां श्रित्वा ग्राह्यरूपजगदाभासात्मना स्फुरतीति नैसर्गिकः, स्वातन्त्र्यात् प्रथममुद्भासितोऽस्याः प्राणसंबन्धः[१७६]। तथा च श्रीवाजसनेयायाम्

'या सा शक्तिः परा सूक्ष्मा व्यापिनी निर्मला शिवा ।
शक्तिचक्रस्य जननी परानन्दामृतात्मिका ॥

---

१७६ नैसर्गिकप्राणसंबन्धात् तदवस्थित्यवधिः कञ्चुकावस्थितिः, तयोः साहचर्यं मितप्रमातृनिष्पादितकार्मपाशाधीनम्। अतश्च प्राक्तनसंचितमिश्रकर्मोत्पन्न भोगायतनं प्रारब्धोपनतभोग्यभोगादेव क्षीयते नान्यथा, तस्मात् तत्त्वविदो वपुषः चक्रभ्रमिवत् अवस्थानमारब्धभोगातिवाहनप्रयोजनम् इत्यर्थः ।

महाघोरेश्वरी चण्डा सृष्टिसंहारकारिका ।
त्रिवहं त्रिविधं त्रिस्थं बलात्कालं प्रकर्षयति[१७७] ॥'

इति संविद एव भगवत्याः प्राणक्रमेण नाडित्रयवाहिसोमसूर्यवह्न्यात्मावस्थितातीतानागतवर्तमानरूपबाह्यकालोल्लासन[१७८]विलापनकारित्वमुक्तम् । तदुक्तं स्वच्छन्देऽपि

'प्राणः[१७९] प्राणमयः प्राणो विसर्गापूरणं प्रति ।
नित्यमापूरयत्येष प्राणिनामुरसि स्थितः ॥'

इति । प्राणस्य

---

१७७ प्राणपरिणता जीवनरूपा परा शक्ति. घोरातिघोरादिशक्तिचक्रजननात् तदीशिनी स्वरूपगोपनोन्मुखत्वात् चण्डरूपा, तस्या एव त्रुट्यादिशक्तिकालपरिमितिपर्यन्त कालकर्षणात् तत्सृष्टिसंहर्तृत्वम् । त्रिवहमिति, त्रिषु इडापिङ्गलासुषुम्नामार्गेषु वहति इति; त्रिविध, सोमसूर्याग्निरूपम्; त्रिस्थम्, अतीतादिषु स्थितम् ।

१७८ उल्लासन बहि.सृष्टिः, विलापनम् अन्त. संहरणम् ।

१७९ हकारस्तु स्मृत प्राण इति योऽशेषवाच्यवाचकाविभागविमर्शमयो हलाकृतिः प्राण उक्त , स एव, स्वातन्त्र्यावभासितसंकोचपुर सरमवरोहणक्रमेण,प्रकृतं रूप यस्य प्राणनरूपसामान्यप्राणस्य, स विसर्गापूरण प्रति, सर्वैरेव सुषिरभागै. बहि तत्तद्भावावभाससृष्टिरूपविसर्गार्थं, तदवभासपुर.सर प्रवेशयुक्त्या तदाहरणेन अन्तः आपूरणार्थं प्रकर्षेण अननात् ध्वननात् अर्थजिघृक्षाग्रहणविश्रान्तिदशोचितात् विमर्शात् प्राण इत्यर्थ. । एतदेव स्फुटयति नित्यमिति । सर्वदेहगतोऽपि अय प्राणिनामुरसि स्फुटमुपलभ्यमानत्वेन अवस्थितो नित्यमापूरयन्, अर्थात् प्राणिनोऽर्थान् च, प्रवेशनिर्गमाभ्या विमर्शमय जीवन कुरुते इत्युत्तरेण संबन्ध ।

'हकारस्तु स्मृतः प्राणः स्वप्रवृत्तो हलाकृतिः ।'

त्युक्तनीत्या श्रीस्वच्छन्दभट्टारकरूपप्राणमय-
ात् विसर्गापूरतया सृष्टिसंहारकारित्वमभिहि-
म् इति युक्तमुक्तम् 'नैसर्गिकः प्राणसंबन्धः'
ति । अत एव श्रीभट्टकल्लटेन प्राणाख्यनि-
मेत्तदार्ढ्यम्

'प्राक् संवित् प्राणे परिणता ।'

ति तत्त्वार्थचिन्तामणावुक्तम् ॥ ४३ ॥

अतश्च स्थितेऽपि नैसर्गिके प्राणसंबन्धे
स्तदारूढे[181] आन्तरीं कलां विमृशन्नास्ते स
ोकोत्तर एव इत्याह—

---

१८० योऽयं, हल् आकृतिः यस्य स अनच्कोऽनाहतध्वन्यात्मा

'स्वयमुच्चरते देवि प्राणिनामुरसि स्थितः ।'

ते नीत्या स्वप्रवृत्तः.

'नादाख्यं यत्परं बीजम् . ................

इति तन्त्रान्तरोक्तस्थित्या सर्वस्य स्वतः स्फुरन्, स एष प्राण
णनापरपर्यायो जीवः स्मृतो, गुरुपारपर्येण अविच्छेदेन अधीतः ।
अथ च धूलिभेदानुसारेण हलाकृतिः अशेषं विश्वं गर्भीकृत्य कुण्ड
न्याकारं प्रसुप्तभुजगरूपः स्वप्रवृत्तः. स्वयमेव नादामर्शरूपतां निमज्ज्य
णात्मकं रूपमाविश्य स्थितः, यतः पारमेशी बोधाख्या शक्तिः विश्वं
र्भीकृत्य परा कुण्डलिका सती विमर्शरूपतया नादात्मवर्णकुण्डलिकात्म
या भाति इत्याम्नायः ।एवं च व्याख्यातरूपः प्राण एव हंसः, ऊर्ध्वमधश्च
रसेन वहन् दानसमादानधर्मकहकारसकारविमर्शरूपतया स्फुरणात् ।
१८१ तदारूढ इति, प्राणनारूपमाहकभूमिकामाश्रित इत्यर्थः ।

## नासिकान्तर्मध्यसंयमात् किमत्र सव्यापसव्यसौषुम्नेषु ॥४४॥

सर्वनाडीचक्रप्रधानरूपेषु सव्यापसव्यसौषुम्नेषु दक्षिणवाममध्यनाडीपदेषु, या नासिका, नसते कौटिल्येन वहति इति कृत्वा, कुटिलवाहिनी प्राणशक्तिः, तस्याः अन्तरिति आन्तरी संवित्, तस्याः अपि मध्यं सर्वान्तरतमतया प्रधानम् ।

'तस्य देवातिदेवस्य परबोधस्वरूपिणः ।
विमर्शः परमा शक्तिः सर्वज्ञा ज्ञानशालिनी ॥'

इति श्रीकालिकाक्रमोक्तनीत्या यत् विमर्शमयं रूपं तत्संयमात् अन्तर्निमीलनप्रकर्षात्[१८२]; किमत्र उच्यते, अयं हि सर्वदशासु देदीप्यमानो निर्व्युत्थानः परः समाधिः । तदुक्तं श्रीविज्ञानभैरवे

'ग्राह्यग्राहकसंवित्तिः सामान्या सर्वदेहिनाम् ।
योगिनां तु विशेषोऽयं संबन्धे सावधानता ॥'

इति ॥ ४४ ॥

---

१८२ भूयोभूय अन्तर्मुखस्वरूपे दार्ढ्येन अवहितत्वात् चित्तधारणं निभालनम्, 'भल' धारणे इति धात्वर्थात् ।

१८३ प्राणापानमय्यात्मग्राह्यग्राहकविज्ञानं सर्वप्रमातृसाधारणम्, योगिना तु तत्संचारे परप्रमात्रावेशावहितत्वम् ।

एवमीदृशस्य योगफलं दर्शयन् प्रकरणमुपसंहरति—

## भूयः[१८४] स्यात्प्रतिमीलनम् ॥४५॥

चैतन्यात्मनः स्वरूपात् उदितस्य अस्य विश्वस्य भूयः पुनः, विगलितभेदसंस्कारात्मना बाहुल्येन च प्रतिमीलनम्, चैतन्याभिमुख्येन निमीलनं, पुनरपि चैतन्यात्मस्वस्वरूपोन्मीलनरूपं परयोगाभिनिविष्टस्य योगिनो भवति। तदुक्तं श्रीस्वच्छन्दे

'उन्मनापरतो[१८५] देवि तत्रात्मानं नियोजयेत् ।
तस्मिन्युक्तस्ततो ह्यात्मा तन्मयश्च प्रजायते ॥'

इति । तथा च

'उद्बोधितो यथा वह्निर्निर्मलोऽतीव भास्वरः।
न भूयः प्रविशेत्काष्ठे तथात्माध्वनि[१८६] उद्धृतः ॥
मलकर्मकलाद्यैस्तु निर्मलो विगतक्रमः ।
तत्रस्थोऽपि न बाध्येत यतोऽतीव सुनिर्मलः ॥'

---

१८४ भूयःशब्दस्य बाहुल्यपुनरत्वरूपद्वैयर्थ्यम् ।

१८५ समनाशक्तेः परतो य आत्मन उन्मनाशक्तियोगः स तादात्म्यरूप, तत्र औन्मनसे परमशिवधाम्नि निर्विकल्पविमर्शोऽपि नास्ति वेद्यत्वाभावात् । वेद्यताया समनान्तःपाशजालमयतया सविकल्परूपत्वात् ।

१८६ षडध्वात्मनः पाशजालादित्यर्थ. ।

इति । भूयः स्यादित्यभिदधतोऽयमाशयः, यत् शिवत्वमस्य योगिनो न अपूर्वम्, अपि तु स्वभाव एव, केवलं मायाशक्त्युत्थापितस्वविकल्पदौरात्म्यात् भासमानमपि तत् नायं प्रत्यवम्रष्टुं क्षमः, इत्यस्य उक्तोपायप्रदर्शनक्रमेण तदेव अभिव्यज्यते इति शिवम् ॥ ४५ ॥

सेयमागमसंवादस्पन्दसंगतिसुन्दरा ।
वृत्तिः शैवरहस्यार्थे शिवसूत्रेषु दर्शिता ॥ १ ॥

शिवरहस्यनिदर्शनसंस्रवन्-
नवनवामृतसाररसोल्बणाम् ।
सुकृतिनो रसयन्तु भवच्छिदे
स्फुटमिमां शिवसूत्रविमर्शिनीम् ॥ २ ॥

इयमरोचकिनां रुचिवर्धिनी
परिणतिं तनुते परमां मतेः ।
रसनमात्रत एव सुधौघवत्-
मृतिजराजननादिभयापहृत् ॥ ३ ॥

देहप्राणसुखादिभिः परिमिताहन्तास्पदैः संवृत-
श्चैतन्यं चिनुते निजं न सुमहन्माहेश्वरं स्वं जनः ।
मध्ये बोधसुधाब्धि विश्वमभितस्तत्फेनपिण्डोपमं
यः पश्येदुपदेशतस्तु कथितः साक्षात्स एकः शिवः ॥ ४ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवप्रोक्तं सूत्रं रहस्यसमुज्ज्वलं
प्रसभविलसत्सद्युक्त्यान्तः समुत्प्लवदायि तत् ॥५॥

इति श्रीमन्महामाहेश्वराचार्यवर्याभिनवगुप्तपादपद्मोपजीविश्रीक्षेमराजविरचितायां शिवसूत्रविमर्शिन्यामाणवोपायप्रकाशनं नाम तृतीय उन्मेषः ॥ ३ ॥

समाप्ता चेयं शिवसूत्रविमर्शिनी ॥

कृतिः श्रीक्षेमराजस्य क्षेमायास्तु विमर्शिनाम् ।
शिवस्यात्मैक्यबोधार्था शिवसूत्रविमर्शिनी ॥

अथ

# शिवसूत्रविमर्शिन्यां परिशिष्टभागः ।

## तत्र प्रथमपरिशिष्टम् ।

# अकारादिक्रमेण शिवसूत्राणां सूची ।



| | उ. | सू.सं. | पृ. |
|---|---|---|---|
| अभिलाषाद्बहिर्गतिः संवाह्यस्य | ३ | ४० | १३१ |
| अविवेको मायासौषुप्तम् | १ | १० | २४ |
| आत्मा चित्तम् | ३ | १ | ७३ |
| आसनस्थः सुखं ह्रदे निमज्जति | ३ | १६ | ९४ |
| इच्छा शक्तिरुमा कुमारी | १ | १३ | ३० |
| उद्यमो भैरवः | १ | ५ | १८ |
| कथा जपः | ३ | २७ | ११३ |
| करणशक्तिः स्वतोऽनुभवात् | ३ | ३७ | १२५ |
| कलादीनां तत्त्वानामविवेको माया | ३ | ३ | ७६ |
| कवर्गादिषु माहेश्वर्याद्याः पशुमातरः | ३ | १९ | १०० |
| गर्भे चित्तविकासोऽविशिष्टविद्यास्वप्नः | २ | ४ | ५६ |
| गुरुरुपायः | २ | ६ | ५९ |
| चित्तं मन्त्रः | २ | १ | ४७ |
| चित्तस्थितिवच्छरीरकरणबाह्येषु | ३ | ३९ | १३० |
| चैतन्यमात्मा | १ | १ | ४ |
| जाग्रत्स्वप्नसुषुप्तभेदे तुर्याभोगसंभवः | १ | ७ | २३ |
| जाग्रद्द्वितीयकरः | ३ | ८ | ८८ |
| ज्ञानं जाग्रत् | १ | ८ | २४ |

| | उ. | सू.सं. | पृ. |
|---|---|---|---|
| ज्ञानमन्नम् | २ | ९ | ६९ |
| ज्ञानं बन्धः | १ | २ | ११ |
| ज्ञानं बन्धः | ३ | २ | ७४ |
| ज्ञानाधिष्ठानं मातृका | १ | ४ | १६ |
| तत्प्रवृत्तावपि अनिरासः संवेत्तृभावात् | ३ | ३२ | १२० |
| तदारूढप्रमितेस्तत्क्षयाज्जीवसंक्षयः | ३ | ४१ | १३३ |
| तद्विमुक्तस्तु केवली | ३ | ३४ | १२२ |
| त्रितयभोक्ता वीरेशः | १ | ११ | २६ |
| त्रिपदाद्यनुप्राणनम् | ३ | ३८ | १२६ |
| त्रिषु चतुर्थं तैलवदासेच्यम् | ३ | २० | १०३ |
| दानमात्मज्ञानम् | ३ | २८ | ११४ |
| दृश्यं शरीरम् | १ | १४ | ३२ |
| धीवशात् सत्त्वसिद्धिः | ३ | १२ | ९१ |
| नर्तक आत्मा | ३ | ९ | ८९ |
| नाडीसंहार-भूतजय-भूतकैवल्य-भूतपृथक्त्वानि | ३ | ५ | ८० |
| नासिकान्तर्मध्यसंयमात् किमत्र सव्यापसव्य-सौषुम्नेषु | ३ | ४४ | १३९ |
| नैसर्गिकः प्राणसंबन्धः | ३ | ४३ | १३६ |
| प्रयत्नः साधकः | २ | २ | ४८ |
| प्राणसमाचारे समदर्शनम् | ३ | २२ | १०६ |
| प्रेक्षकाणीन्द्रियाणि | ३ | ११ | ९१ |
| बीजावधानम् | ३ | १५ | ९४ |
| भूतकञ्चुकी तदा विमुक्तो भूयः पतिसमः परः | ३ | ४२ | १३४ |
| भूतसंधान-भूतपृथक्त्व-विश्वसंघट्टाः | १ | २० | ४० |

| | उ. | सू सं. | पृ. |
|---|---|---|---|
| भूयः स्यात् प्रतिमीलनम् | ३ | ४५ | १४० |
| भेदतिरस्कारे सर्गान्तरकर्मत्वम् | ३ | ३६ | १२४ |
| मग्नः स्वचित्तेन प्रविशेत् | ३ | २१ | १०४ |
| मध्येऽवरप्रसवः | ३ | २३ | १०७ |
| महाह्रदानुसंधानान्मन्त्रवीर्यानुभवः | १ | २२ | ४४ |
| मातृकाचक्रसंबोधः | २ | ७ | ६० |
| मात्रास्वप्रत्ययसंधाने नष्टस्य पुनरुत्थानम् | ३ | २४ | १०८ |
| मोहजयादनन्ताभोगात् सहजविद्याजयः | ३ | ७ | ८६ |
| मोहप्रतिसंहतस्तु कर्मात्मा | ३ | ३५ | १२३ |
| मोहावरणात् सिद्धिः | ३ | ६ | ८३ |
| यथा तत्र तथान्यत्र· | ३ | १४ | ९३ |
| योनिवर्गः कलाशरीरम् | १ | ३ | १३ |
| योऽविपस्थो ज्ञाहेतुश्च | ३ | २९ | ११५ |
| रङ्गोऽन्तरात्मा | ३ | १० | ९० |
| लोकानन्दः समाधिसुखम् | १ | १८ | ३७ |
| वितर्क आत्मज्ञानम् | १ | १७ | ३६ |
| विद्याऽविनाशे जन्मविनाशः | ३ | १८ | ९९ |
| विद्याशरीरसत्ता मन्त्ररहस्यम् | २ | ३ | ५० |
| विद्यासंहारे तदुत्थस्वप्नदर्शनम् | २ | १० | ७० |
| विद्यासमुत्थाने स्वाभाविके खेचरी शिवावस्था | २ | ५ | ५७ |
| विस्मयो योगभूमिकाः | १ | १२ | २९ |
| शक्तिचक्रसंधाने विश्वसंहारः | १ | ६ | २० |
| शक्तिसंधाने शरीरोत्पत्तिः | १ | १९ | ३८ |
| शरीरं हविः | २ | ८ | ६८ |

| | उ. | सू.सं. | पृः |
|---|---|---|---|
| शरीरवृत्तिर्व्रतम् | ३ | २६ | १११ |
| शरीरे संहारः कलानाम् | ३ | ४ | ७८ |
| शिवतुल्यो जायते | ३ | २५ | ११० |
| शुद्धतत्त्वसंधानाद्वाऽपशुशक्तिः | १ | १६ | ३५ |
| शुद्धविद्योदयाच्चक्रेशत्वसिद्धिः | १ | २१ | ४२ |
| सिद्धः स्वतन्त्रभावः | ३ | १३ | ९२ |
| सुखदुःखयोर्बहिर्मननम् | ३ | ३३ | १२१ |
| स्थितिलयौ | ३ | ३१ | ११८ |
| स्वमात्रानिर्माणमापादयति | ३ | १७ | ९७ |
| स्वप्नो विकल्पाः | १ | ९ | २४ |
| स्वशक्तिप्रचयोऽस्य विश्वम् | ३ | ३० | ११७ |
| हृदये चित्तसंघट्टाद् दृश्यस्वापदर्शनम् | १ | १५ | ३३ |


इति शिवसूत्रविमर्शिनीस्थसूत्राणामकारादिक्रमसूची समाप्ता ॥

अथ

# द्वितीयपरिशिष्टम् ।

## शिवसूत्रविमर्शिन्यां संवादितप्रमाणवाक्यानामकाराद्यनुक्रमणिका ।

| प्रमाणप्रतीकं | पृष्ठाङ्कः | ग्रन्थाङ्कः |
|---|---|---|
| अकिंचिच्चिन्तकस्यैव (२अधि०२३श्लो०) | १९ | मालिनीविजयः |
| अगाधसंशयाम्भोधि (३नि०२०का०) | ५९ | स्पन्दः |
| अज्ञानाद्बध्यते लोकः | ११ | सर्वाचारः |
| अत एव यथाभीष्ट (१अ०६आ०१०का०) | १२५ | प्रत्यभिज्ञा |
| अतः सततमुद्युक्तः (१नि० २१ का०) | ७२ | स्पन्दः |
| अतिक्रुद्ध· प्रहृष्टो वा (१नि०२२का०) | १२९ | स्पन्दः |
| अतो विन्दुरतो नादः (३नि०२०का० ) | ५७ | स्पन्दः |
| अत्रैकतमयुक्तिस्थे ( १४८ श्लो० ) | ७० | विज्ञानभैरवः |
| अन्त. स्वानुभवानन्द (१५शात् सार्ध१६शान्तं) | १२७ | विज्ञानभैरवः |
| अन्यथा तु स्वतन्त्रा स्यात् (३नि०३का०) | ७१ | स्पन्दः |
| अपसव्येन रेचयेत (७ प० २९१ तमात् २९३ तमान्तम्) | ८० | स्वच्छन्दः |
| अप्रबुद्धधियस्त्वेते (१ नि० २० का०) | ७७ | स्पन्दः |
| अबुद्धं बुद्धमेव च (२ अ० ४३ श्लो०) | २६ | पूर्वशास्त्रम् ( मालिनीविजयः ) |
| अभिलापो मलोऽत्र तु (४प०१०४श्लोकोत्त०) | १३१ | स्वच्छन्दः |
| अयमेवात्मनो ग्रहः (२नि०७कारिकोत्तरा०) | ३६ | स्पन्द. |
| अयमेवोदयस्तस्य (२नि० ६ का०) | ५० | स्पन्दः |

| प्रमाणप्रती० | पृष्ठाङ्कः ग्रन्थाङ्कः |
|---|---|
| अवस्थायुगलं चात्र (१ नि० १४ का०) | १२० स्पन्दः |
| अव्यक्तलिङ्गिनं दृष्ट्वा | ११२ कुलपञ्चाशिका |
| अस्ति-नास्तिविभागेन | ११९ कालिकाक्रमः |
| अहमेव परो हंसः (४ प० ३९५ श्लो०) | ११३ स्वच्छन्दः |
| अहो तत्त्वस्य माहात्म्यं | १३६ कुलसारः |
| आत्मतत्त्वं ततस्त्यक्त्वा (४ प० ३८९ तमात् सार्ध ३९२ तमान्तम् ) | ८७ स्वच्छन्दः |
| आत्मनो भैरवं रूपं (२ प० १३७ श्लो०) | २० स्वच्छन्दः |
| आत्मा चैवात्मना ज्ञातो | ३० कुलयुक्तिः |
| आत्मानमत एवायं (१अ०५आ०१५का०) | ९८ प्रत्यभिज्ञा |
| आमिषं तु यथा खस्थः | ४९ तन्त्रसद्भावः |
| इति वा यस्य संवित्तिः (२नि०५का०) | ३६-९८ स्पन्दः |
| इयमेवामृतप्राप्तिः (२ नि० ७ का०) | ३८ स्पन्दः |
| उच्चारकरणध्यान (२ अ० २१ श्लो०) | ७९ पूर्वशास्त्रम् (मालिनीवि०) |
| उच्चाररहितं वस्तु (२ अ० २२ श्लो०) | २२-७२ मालिनीविजयः |
| उच्चार्यमाणा ये मन्त्रा (१६-१७ शयोः उत्तरपूर्वार्धात्म) | ४८ सर्वज्ञानोत्तरम् |
| उत्सृज्य लौकिकाचारं | १०७ आनन्दभैरवः |
| उद्बोधितो यथा वह्निः (१० प० २६८-२६९ श्लो०) | १४० स्वच्छन्दः |
| उन्मनापरतो देवि (४ प० ३२९ श्लो०) | १४० स्वच्छन्दः |
| एकं सृष्टिमयं बीजं | ५८ कुलचूडामणिः |
| एकचिन्ताप्रसक्तस्य (३नि०९का०) | २० स्पन्दः |

| प्रमाणप्रतीक | पृष्ठाङ्कः | ग्रन्थाङ्कः |
|---|---|---|
| करन्धचितिमध्यस्था | १७-१०२ | तिमिरोद्घाटः |
| फलोद्दलितचैतन्यं | ७७ | तन्त्रसद्भावः |
| कश्चिद्वीर भत्यगा (२ अ० ४ व० १ म०) | ९१ | कठोपनिषत् |
| कार्योन्मुखः प्रयत्नो य. ( १ नि० २ यात् ३ यकारिकान्तम्) | १२१ | स्पन्द. |
| कालामिना कालपदा (५२ श्लो०) | ७९ | विज्ञानभैरवः |
| गुरोर्गुरुतरा शक्तिः | ६० | त्रिशिरोभैरवः |
| ग्राहकभूमिकोत्तीर्णा० | १३९ | प्रत्यभिज्ञासूत्र-विमर्शिनी |
| ग्राह्यग्राहकसंवित्तिः (१०६ श्लो०) | ३७-१३९ | विज्ञानभैरवः |
| ग्लानिर्विलुण्ठिका देहे (३नि०८का०) | ४१ | स्पन्दः |
| चक्षुषा यच्च सधानं (१२ प० १६०-१६१ श्लो०) | १०८ | स्वच्छन्दः |
| चिद्धर्मा सर्वदेहेषु (१०० श्लो०) | ८ | विज्ञानभैरव· |
| चैतन्यमेक एवात्मा | ६ | ........(?) |
| जलं हिम च यो वेद | ९८ | आगमः |
| जलस्येवोर्मयो वह्ने. (११० श्लो०) | ३३ | विज्ञानभैरवः |
| जागरादिविभेदेऽपि (१ नि० ३ का०) | २४ | स्पन्द |
| ज्ञानं प्रकाशकं लोके (१३७ श्लो०) | ७६ | विज्ञानभैरवः |
| तत्र प्रवर्तते शक्ति (७अ०३६श्लो०) | ३९ | मृत्युजिद्भट्टारकः |
| तदप्रूपनया ज्ञान | ११८ | कालिकाक्रमः |
| तत्त्वत्रयविनिर्मुक्त ( ८ अ० २६ उत्तरार्ध २७ पूर्वार्धान्त) | १०० | मृत्युजित् |
| यथा रसेऽप्यभीष्टार्थान् (३ नि० २ का०) | ४० | स्पन्दः |

| प्रमाणप्रतीकं | पृष्ठाङ्कः | ग्रन्थाङ्कः |
|---|---|---|
| तथा स्वात्मन्यधिष्ठाना (२ नि० ७ का० उत्तरार्धम्) | ३५ | स्पन्दः |
| तदाक्रम्य बलं मन्त्राः (२ नि० १ का०) | ४५-५५ | स्पन्दः |
| तदेव भवति स्थूलं (४ प० २९३ श्लो०) | ९७ | स्वच्छन्दः |
| तद्ग्रहो मन्त्रसद्भावः | ४९ | ........(?) |
| तन्मात्रोदयरूपेण (३ नि० १७-१८ का०) | ७४ | स्पन्दः |
| तमधिष्ठातृभावेन (१ नि० ११ का०) | ३० | स्पन्दः |
| तस्मात् सा तु परा विद्या (४ प० ३९१ श्लो०) | ४२ | स्वच्छन्दः |
| तस्मात्र तेषु संसक्ति | ७२ | पूर्वशास्त्रम् (मालिनीवि०) |
| तस्मान्नित्यमसंदिग्धं | १११ | कालिकाक्रमः |
| तस्य देवातिदेवस्य | ११३-१३९ | कालिकाक्र० |
| तस्योपलब्धिः सततं (१ नि० १७ का०) | २८ | स्पन्दः |
| ते समाधावुपसर्गा (३ पाद ३७ सू०) | ५६ | पातञ्जलम् |
| त्रिगुणेन तु जप्तेन (६ प० ५४ श्लो०) | १२४ | स्वच्छन्दः |
| त्रिषु धामसु यद्भोग्यं | २७ | ........(?) |
| त्वमेकांशेनान्तरात्मा | ८९ | नैश्वासतन्त्रम् |
| दर्शनात् स्पर्शनाद्वापि | ११५ | ........(?) |
| दिदृक्षयेव सर्वार्थान् (३ नि० ११ का०) | ४३ | स्पन्दः |
| दीक्षासिद्धौ तु ये प्रोक्ताः | ३५ | लक्ष्मीकौलार्णवः |
| दुर्बलोऽपि तदाक्रम्य (२ नि० ६ का०) | ४१ | स्पन्दः |
| देहोत्थिताभिर्मुद्राभि | ११२ | त्रिकसारः |
| धर्माधर्मात्मकं कर्म (१ अ० २४ श्लो०) | १५ | मालिनीविजयः |
| न चैतदप्रसन्नेन | ७१ | मालिनीविजयः |
| न जानन्ति गुरुं देवं | ५१ | तन्त्रसद्भावः |

| प्रमाणप्रतीकं | पृष्ठाङ्कः | ग्रन्थाङ्कः |
|---|---|---|
| न दुःखं न सुखं यत्र (१ नि० ५ का०) | १२२ | स्पन्दः |
| न विद्या मातृकापरा (१प० १९७ श्लो०) | ६३ | सच्छन्दः |
| न संधानं विना दीक्षा | ३९ | लक्ष्मीकौलार्णवः |
| नहीच्छानोदनस्यायं (१ नि० ८ का०) | ३२ | स्पन्दः |
| नाभ्यां हृदयसंचारात् (७ प० २९४ श्लो०) | ८२ | सच्छन्दः |
| नाशोऽविद्याप्रपञ्चस्य | १२० | कालिकाक्रमः |
| निजाशुद्ध्यासमर्थस्य (१ नि० ९ का०) | १२ | स्पन्दः |
| निमेषोन्मेषमात्रं तु (८ अ० ८ श्लो०) | १३५ | मृत्युजित् |
| निरस्य सदसद्वृत्तीः | १३३ | कालिकाक्रमः |
| नोर्ध्वे ध्यानं प्रयुञ्जीत (८ अ० ३९ शततमात् ४४ शततमान्तम्) | ९५ | मृत्युजिद्भट्टारकः |
| परमात्मस्वरूपं तु (८ अ० २८ श्लो०) | ७ | मृत्युजिद्भट्टारकः |
| परामृतरसापायः (३ नि० १४ का०) | १३ | स्पन्दः |
| पाशावलोकनं त्यक्त्वा (४प०४२९श्लो०) | ८७ | सच्छन्दः |
| पुर्यष्टकसमावेशात् (११ प० ८६ श्लो०) | ९१ | सच्छन्दः |
| पृथङ्मन्त्राः पृथङ्मन्त्री | ४८ | श्रीकण्ठीयसंहिता |
| प्रकाशस्यात्मविश्रान्तिः (२२ उत्तरा० २३) | ६३ | अजडप्रमातृसिद्धिः |
| प्रबुद्धः सर्वदा तिष्ठेत् (३ नि० १२ का०) | ७० | स्पन्दः |
| प्रमत्त चपलीत्येव (४ प० ३०८ तमात् ३११ तमान्तम्) | १०९ | स्वच्छन्दः |
| प्रारम्भं निर्वाणे परिणता | १३८ | तत्त्वार्थचिन्तामणिः |
| प्राणः प्राणमयः प्राणः (७ प० २५ श्लो०) | १३७ | स्वच्छन्दः |
| प्राणादिस्थूलभावं तु (८ अ० १२ श्लो०) | १०४ | मृत्युजिद्भट्टारकः |
| प्रह्वा प्रयागतं योगी | ५८ | तन्त्रसद्भावः |

| प्रमाणप्रतीकं | पृष्ठाङ्कः | ग्रन्थाङ्कः |
|---|---|---|
| बुद्धिमाणप्रसरेऽपि | १०७ | प्रत्यभिज्ञाटीका |
| ब्रह्म-विष्ण्विन्द्रदेवानां (६ प० ५४-५५ पूर्वार्ध०) | १२५ | स्वच्छन्दः |
| भित्त्वा क्रमेण सर्वाणि (७प०३२४-३२५श्लो०) | ८२ | स्वच्छन्द |
| भिन्नवेद्यप्रथात्रैव (३ अ० २ आ० ५ का०) | १६ | प्रत्यभिज्ञा |
| भुवनाध्वादिरूपेण (५६ श्लो०) | ७९ | विज्ञानभैरव· |
| भूयो भूय· परे भावे (१४५ श्लो०) | ११३ | विज्ञानभैरव· |
| भोक्तैव भोग्यभावेन (३नि०·२ का०उ०) | ३३ | स्पन्दः |
| मध्यमं प्राणमाश्रित्य (८ अ० ११ शात् १८ शपर्यन्तम्) | ८४ | मृत्युजिद्भट्टारक· |
| मन्त्राणा जीवभूता तु | ४८ | तन्त्रसद्भावः |
| मलप्रध्वस्तचैतन्य (२ प० ३८ शतमात् ४० शतमान्तम्) | १५ | स्वच्छन्दः |
| मलमज्ञानमिच्छन्ति (१ अ० २३ श्लो०उ०) | ११ | मालिनीविजय |
| महाशून्यालये वह्नौ (१४९ श्लो०) | ६८ | विज्ञानभैरव· |
| मानस चेतना शक्ति (१३८श्लो०) | १०५ | विज्ञानभट्टारक· |
| मृत्युं च कालं च कला | २१-६९ | भर्गशिखा |
| य प्रियो य· सुहृद्बन्धु | ६८ | तिमिरोद्घाट· |
| यतः करणवर्गोऽयं (१ नि० ६ का०) | ८ | स्पन्द |
| यतो ज्ञानमयो देवः (९ अ० १० श्लो०) | ११७ | मृत्युजित् |
| यत्र यत्राक्षमार्गेण (११७ श्लो०) | ८८ | विज्ञानभैरवः |
| यत्र सर्वे लयं यान्ति | २२ | वीरावलिः |
| यत्र स्थितमिद सर्वं (१नि० २ का०) | १० | स्पन्द |
| यथा स्वमानुभूतार्थान् | १३३ | कालिकाक्रमः |

| प्रमाणप्रतीकं | पृष्ठाङ्कः | ग्रन्थाङ्कः |
|---|---|---|
| यथा ह्यर्थोऽस्फुटो दृष्टः (३ नि० ४-५ का०) | ४१ | स्पन्दः |
| यथेच्छाभ्यर्थितो धाता (३ नि० १ का०) | ४० | स्पन्दः |
| यथेन्दुः पुष्पसंकाशः | २३ | चन्द्रज्ञानम् |
| यदविद्यावृततया | १२३-१३२ | कालिकाक्रमः |
| यदा क्षोभः प्रलीयेत (१नि०९का०उ०) | ५९-६९ | स्पन्दः |
| यदा गुरुवरः सम्यक् | १३५ | कुलरत्नमाला |
| यदा तु तेपि सुव्यक्त | १२६ | तत्त्वगर्भः |
| यदा त्वेकत्र संरूढः (३ नि० १९ का०) | २३ | स्पन्दः |
| यस्मात् सर्वमयो जीवः (३ नि० ३ का०) | ९ | स्पन्दः |
| यस्य ज्ञेयमयो भावः (४ प० ३०९-३१०) | १०९ | स्वच्छन्दः |
| यस्योन्मेषनिमेषाभ्यां (१ नि० १ का०) | २३ | स्पन्दः |
| यावन्न वेदका एते | ८ | उच्छुष्मभैरवः |
| या सा तु मातृका देवि | ५१ | तन्त्रसद्भावः |
| या सा शक्तिः परा सूक्ष्मा | ५२ | तन्त्रसद्भावः |
| या सा शक्तिः परा सूक्ष्मा | १३६ | वाजसनेया |
| या सा शक्तिर्जगद्धातुः (३ अ० ५ मात् १३ शान्तम्) | ४४-१०० | मालिनीविजयः |
| योगी स्वच्छन्दयोगेन (७ प० २५७-२५८ श्लो०) | २८ | स्वच्छन्दः |
| लभते तत्प्रयत्नेन (१ नि० ७ का०) | ९३ | स्पन्दः |
| वायवी धारणा हृष्टे (७ प० २९६-२९७ श्लो० पू०) | ८१ | स्वच्छन्दः |
| वामनामाप्रभेऽपि | ७१-१०८ | मालिनीविजयः |
| विषयेषु च सर्वेषु (४ प० ३११ श्लो०) | ११० | स्वच्छन्दः |

| प्रमाणप्रतीकं | पृष्ठाङ्कः | ग्रन्थाङ्कः |
| --- | --- | --- |
| विसृष्टाशेषसद्बीज (५९ श्लो०) | ८९ | भट्टनारायणः (स्तवचिन्तामणिः) |
| विहाय सकलाः क्रिया | १०५ | ज्ञानगर्भस्तोत्रम् |
| वेदनादिधर्मस्य (४ प० ३९२ श्लो० १ पादः) | ८६ | स्वच्छन्दः |
| व्यापारं मानसं त्यक्त्वा(४प०४३२श्लो०) | १०५ | स्वच्छन्दः |
| शक्तयोऽस्य जगत् कृत्स्नं | ११७ | सर्वमङ्गला |
| शक्तिचक्रं तदेवोक्तं | ६० | मालिनीविजयः |
| शक्तिश्च शक्तिमांश्चैव | ८९ | सर्वमङ्गला |
| शक्तिसंगमसंक्षुब्ध (६९ तितमात् ७३ तितमान्तम्) | १२८ | विज्ञानभैरवः |
| शब्दराशिसमुत्थस्य (३ नि० १३ श्लो०) | १८ | स्पन्दः |
| श्रयेत्स्वातन्त्र्यशक्तिं स्वां | ९२ | ........(?) (श्रीनाथपादकृत) |
| षट्शतानि दिवा रात्रौ (१५६ श्लो०) | ११४ | विज्ञानभैरवः |
| संसारनाट्यप्रवर्तयिता | ९० | प्रत्यभिज्ञाटीका |
| सकारेण बहिर्याति (नेदं मूलपुस्तके लभ्यते) | ११४ | विज्ञानभैरवः(?) |
| स गुरुर्मत्समः प्रोक्त (२ अ० १० श्लो० उ०) | ५९ | मालिनीविजयः |
| स च सर्वेषु भूतेषु (४ प० ३०७-३०८ श्लो० पू०) | ३४ | स्वच्छन्दः |
| सत्त्वस्थो राजसस्थश्च | ७४ | तन्त्रसद्भावः |
| समपद्यं परित्यज्य | ९९ | श्रीकण्ठी |
| समनान्तं वरारोहे (४ प० ४२७ तमात् ४३१ तमान्तम्) | ८६ | स्वच्छन्दः |

| प्रमाणप्रतीकं | पृष्ठाङ्कः | ग्रन्थाङ्कः |
|---|---|---|
| सर्वं शुद्धं निरालम्बं | ११९ | कालिकाक्रमः |
| सर्वं जगत्स्वदेहं वा (६५ श्लो०) | ३७-१३० | विज्ञानभैरवः |
| सर्वज्ञः सर्वकर्ता च (१०९ श्लो०) | ३६ | विज्ञानभैरवः |
| सर्वतत्त्वानि भूतानि (७ प० २४२ श्लो०) | ९३ | स्वच्छन्दः |
| सर्वं देहं चिन्मयं हि (६३ श्लो०) | ३६ | विज्ञानभैरवः |
| सर्वाणीन्द्रियकर्माणि (४ अ० २७ श्लो०) | ६९ | भगवद्गीता |
| सर्वे वर्णात्मका मन्त्रा | ५१ | तन्त्रसद्भावः |
| सहाराधकचित्तेन (१ नि० २ का०) | ४८ | स्पन्दः |
| सात्र कुण्डलिनी बीज | ६५ | सिद्धामृतम् |
| सा देवी सर्वदेवीनां (१० प० ७२३-७२४ श्लो० पू०) | ३१ | स्वच्छन्दः |
| सा ममेच्छा परा शक्तिः (१ अ० २५-२६ श्लो० पू०) | ३१ | मृत्युञ्जयभट्टारकः |
| सा योनिः सर्वदेवानां (७ अ० ४० श्लो०) | ३९-९४ | मृत्युञ्जयभट्टारकः |
| सुखदुःखादिविज्ञान | १२२ | कालिकाक्रमः |
| सुप्रदीप्ते यथा वह्नौ (४ प० ३९४ श्लो०) | ११२ | स्वच्छन्दः |
| सेयं क्रियात्मिका शक्तिः (३ नि० १६ का०) | ६७ | स्पन्दः |
| स्वच्छन्दश्चैव स्वच्छन्दः (७ प० २५८ श्लो० उ०) | ९३ | स्वच्छन्दः |
| स्वनिर्वाणं परं शुद्धं (४ प० २३८ श्लो०) | ९९ | स्वच्छन्दः |
| स्वपदा स्वशिरश्छायां | ९ | त्रिकहृदयम् |
| स्वयंभूर्भगवान् देवो | ८३ | लक्ष्मीकौलार्णवः |

| प्रमाणप्रतीकं | पृष्ठाङ्कः | ग्रन्थाङ्कः |
|---|---|---|
| स्वरूपावरणे चास्य (३ नि० १५ श्लो०) | १८ | स्पन्दः |
| स्वातन्त्र्यहानिर्बोधस्य (३अ०२आ०४का०) | १३ | प्रत्यभिज्ञा |
| हकारस्तु स्मृतः प्राणः(४प०२५५श्लो०उ०) | १३८ | स्वच्छन्दः |
| हृद्याकाशे निलीनाक्षः (४९ श्लो०) | ३४ | विज्ञानभैरवः |


इति शिवसूत्रविमर्शिन्यां प्रमाणवाक्यानुक्रमणिका संपूर्णा ॥

## अथ तृतीयपरिशिष्टम् ।

# शिवसूत्रविमर्शिन्यां प्रामाणिकग्रन्थ-तत्प्रमाणानां यथाक्रमं समुच्चयनम् ।

[ अस्मिन् ३ ये परिशिष्टे टिप्पन्या 'मू० पा०' इति प्रतीकोत्तर मूलतत्तत्पुस्तके वर्तमानपाठभेदोपन्यास सज्ञातव्य. ]


अजडप्रमातृसिद्धौ ।

प्रकाशस्यात्मविश्रान्ति (२२ श्लो० उ० २३) ६३

आगमे ।

जलं हिमं च यो वेद ९८

आनन्दभैरवे ।

उत्सृज्य लौकिकाचार १०७

उच्छुष्मभैरवे ।

यावन्न वेदका एते ८

कठोपनिषदि ।

कश्चिद्धीरः प्रत्यगात्मान ( २ अं० ४ व० १ म० ) ९१

कालिकाक्रमे ।

अस्ति-नास्तिविभागेन ११९

तत्तद्रूपतया ज्ञानं ११८

तस्मान्नित्यमसंदिग्धं १११

तस्य देवातिदेवस्य ११२-१३९

नाशोऽविद्याप्रपञ्चस्य १२०

निरस्य सदसद्वृत्तीः १३३

यथा स्वमानुभूतार्थान् १३३

यदविद्यावृततया १२३

सर्वं शुद्धं निरालम्बं ११९

सुखदुःखादिविज्ञान १२३
कुलचूडामणौ ।
एकं सृष्टिमयं बीजं ५८
कुलपञ्चाशिकायाम् ।
अव्यक्तलिङ्गिनं दृष्ट्वा ११२
कुलयुक्तौ ।
आत्मा चैवात्मना ज्ञातो ३०
कुलरत्नमालायाम् ।
यदा गुरुवरः सम्यक् १३५
कुलसारे ।
अहो तत्त्वस्य माहात्म्यं १३६
चन्द्रज्ञाने ।
यथेन्दुः पुष्पसंकाशः २३
ज्ञानगर्भस्तोत्रे ।
विहाय सकलाः क्रिया १०५
तत्त्वगर्भे ।
यदा तु तेऽपि सुव्यक्त १२६
तत्त्वार्थचिन्तामणौ ।
प्राक् संवित्प्राणे परिणता १३८
तन्त्रसद्भावे ।
आमिषं तु यथा खस्थः ४९
कलोद्भूलितचैतन्यं ७७
गतिमेत्यर्थभावेन ५८
न जानन्ति गुरुं देवं ५१
बद्ध्वा पद्मासनं योगी ५८

मन्त्राणां जीवभूता तु ४८
या सा तु मातृका देवि ५१
या सा शक्तिः परा सूक्ष्मा ५२
सत्त्वस्थो राजसस्थश्च ७४
सर्वे वर्णात्मका मन्त्रा ५१

तिमिरोद्धाटे ।

करन्ध्रचितिमध्यस्था १७-१०२
यः प्रियो यः सुहृद्बन्धु ६८

त्रिकसारे ।

देहोत्थिताभिर्मुद्राभि ११२

त्रिकहृदये ।

स्वपदा स्वशिरश्छायां ९

त्रिशिरोभैरवे ।

गुरोर्गुरुतरा शक्ति ६०

नैश्वासतन्त्रे ।

त्वमेकांशेनान्तरात्मा ८९

पातञ्जले ।

ते समाधावुपसर्गा (३पा० ३७ सू०) ५६

प्रत्यभिज्ञाटीकायाम् ।

बुद्धिमाणप्रसरेऽपि
ससारनाट्यप्रवर्तयिता १०७

प्रत्यभिज्ञायाम् । ९०

अत एव यथाभीष्ट (१ अ० ६ आ० १० का०) १२५
आत्मानमत एवायं (१ अ० ५ आ० १५ का०) ९८
भिन्नवेद्यप्रथात्रैव (२ अ० २ आ० ५ का०) १६

स्वातन्त्र्यहानिर्बोधस्य (३ अ० २ आ० ४ का०) १३

अत्यभिज्ञासूत्रविमर्शिन्याम् ।

ग्राहकभूमिकोत्तीर्णानां १२२

भगवद्गीतासु ।

सर्वाणीन्द्रियकर्माणि (४ अ० २७ श्लो०) ६९

भट्टनारायणस्तोत्रे (स्तवचिन्तामणौ)।

विसृष्टाशेषसद्बीज (५९ श्लो०) (मू० पु० पाठभेदः) ८९

भर्गशिखायाम् ।

मृत्युं च कालं च कला २१

मालिनीविजये ।

अकिंचिच्चिन्तकस्यैव (२ अ० २३ श्लो०) १९

अबुद्धं बुद्धमेव च (पूर्वशास्त्रे २ अ० ४३ श्लो०) २६

उच्चारकरणध्यान (पूर्वशा० २ अ० २१ श्लो०) ७९

उच्चाररहितं वस्तु (२ अ० २२ श्लो०) २२-७२

तस्मान्न तेषु संसक्ति (पूर्वशा० ) ७२

धर्माधर्मात्मकं कर्म (१ अ० २४ श्लो०) १५

न चैतदप्रसन्नेन ७१

मलमज्ञानमिच्छन्ति (१ अ० २३ श्लो०) ११

या सा शक्तिर्जगद्धातुः (३ अ० ५ मा० १३ शान्तम्)
(मू० पु० पाठभेद) ४४-१००

---

(१) मू० पा० विश्वशेषकसद्बीज०

(२) मू० पा० एवमेषा द्विरूपा.................... ।
अर्घोत्पत्तिप्रदायि.................... ॥
तत्र शक्तिगणात्मा मातृभावं विभिन्नो ।
.................................... ॥

वासनामात्रलाभेऽपि ७१-१०८
शक्तिचक्रं तदेवोक्तं ६०
स गुरुर्मत्समः प्रोक्तः (२ अ० १० श्लो०) ५९
मृत्युजिद्भट्टारके ।
ततः प्रवर्तते शक्तिः (७ अ० ३६ श्लो०) (मू० पु० पाठभेद.) ३९
तत्त्वत्रयविनिर्मुक्तं (८ अ० २६ श्लो० उ० २७ पू०) १००
निमेषोन्मेषमात्रं तु (८ अ० ८ श्लो० उ० ९ पू०) (मू० पु० पाठभेदः) १३५

---

.....................द्विधा बीज स्वनामतः ।
................................... ॥
पृथग्वर्णविभेदेन शतार्धकिरणोज्वला ।
................................ ॥
वाचकत्वेन सर्वापि शंभोः शक्तिश्च शस्यते ।
वर्गाष्टकमिह ज्ञेयमघोराद्यमनुक्रमात् ॥
तदेव शक्तिभेदेन माहेश्वर्यादि चाष्टकम् ।
माहेशी ब्राह्मणी चैव कौमारी वैष्णवी तथा ॥
ऐन्द्री याम्या च चामुण्डा योगेशी चेति ता मताः ।
शतार्धभेदभिन्नानां तत्संख्यानां वरानने ॥
रुद्राणां वाचकत्वेन कल्पिताः परमेष्ठिना ।

(३) मू० पा० ततः प्रवर्तते.................. ।
इच्छामात्रविनिर्दिष्टा.................. ॥
सा योनिः........................ ।
....................तस्याः सर्वं प्रवर्तते ॥ (१४ पृ० च)

(४) मू० पा० निमेषोन्मेषमात्रेण यदि चेन्नोपलभ्यते ।
ततः प्रभृति मुक्तोऽसौ.................. ॥

नोर्ध्वे ध्यानं प्रयुञ्जीत (८ अ० ४० शत्तमात् ४४ शान्तं)
(मू० पु० पाठभेदः) ९५
परमात्मस्वरूपं तु (८ अ० २८ श्लो०) ७
प्राणादिस्थूलभावं तु (८ अ० १२ श्लो०) १०४
मध्यमं प्राणमाश्रित्य (८ अ० ११ शात् १८ शान्तम्)
(मू० पु० पाठभेदः) ८४

---

(५) मू० पा० नोर्ध्वे………………………… ।
………………किंचित्पार्श्वयोरुभयोरपि ॥
…………संस्थाने…………………… ।
………………………………………… ॥
न चाक्ष्णोर्मीलनं किंचिन्न………………… ।
……………………………न च भावयेत् ॥
…………………………शब्दस्पर्शरसादि यत् ।
सर्वं त्यक्त्वा……………केवलं तन्मयो भवेत् ॥
………………………परस्य परमात्मनः ।
………………………………………… ॥

(६) मू० पा० मध्यमं………………………… ।
………………………………………… ॥ ११ ॥
………………………………………… ।
………………………………………… ॥ १२ ॥
………स उद्दिष्टो……………………… ।
…………………………………………: ॥ १३ ॥
……प्रविरोदाम परमं…………………… ।
……………………………निकृन्तकः ॥ १४ ॥
……………………………चाव्ययं विभुम् ।
………………………………………… ॥ १५ ॥

यतो ज्ञानमयो देवः (९ अ० १० श्लो०) ११७
सा ममेच्छा परा शक्तिः (१ अ० २५ श्लो० २६ उ०)
(मू० पु० पाठभेदः) ३१
सा योनिः सर्वदेवानां (७ अ० ४० उ० ४१ पू०)
( मूलपु० पाठभेदः ) ३९-९४

लक्ष्मीकौलार्णवे ।
दीक्षासिद्धौ तु ये प्रोक्ता ३५
न संधानं विना दीक्षा ३९
स्वयंभूर्भगवान्देवो ८३

वाजसनेयायाम् ।
या सा शक्तिः परा सूक्ष्मा १३६

विज्ञानभैरवे ।
अत्रैकतमयुक्तिस्थे (१४८ श्लो०) (मूलपु० पाठभेदः) ७०

---

.................................................. ।
..............................भवबन्धविनाशिनी ॥ १६ ॥
समं सर्वेषु भूतेषु ध्यायानं चित्तनिग्रहः ।
समाधानमिति प्रोक्तमन्यथा लोकदाम्भिकम् ॥ १७ ॥
.................................................. ।
.................................................. ॥ १८ ॥

(७) मू० पा० सा ममेच्छा............शक्तियुक्ता स्वभावजा ।
.................................................. ॥
..............................स्वा शक्तिः............ ।

(८) मू० पा० सा योनिः.................................. ।
..............................तस्याः सर्वे........ ॥

(९) मू० पा० अत्रैकतम.................................. ।
भरिताकारता यात्र.............................. ॥

अन्तःस्वानुभवानन्दा (१५ श्लो०) १२७
कालाग्निना कालपदात् (५२ श्लो०) मू० पाठभेदः) ७९
ग्राह्यग्राहकसंवित्तिः (१०६ श्लो०) मू० पाठभेदः) ३७-१३९
चिद्धर्मा सर्वदेहेषु (१०० श्लो०) ८
जलस्येवोर्मयो वह्नेः (११० श्लो०) मू० पु० पाठभेदः) ३३
ज्ञानं प्रकाशकं लोके (१३७ श्लो०) मूलपु० पाठभेदः) ७६
भुवनाध्वादिरूपेण (५६ श्लो०) ७९
भूयो भूयः परे भावे (१४५ श्लो०) ११३
महाशून्यालये वह्नौ (१४९ श्लो०) ६८
मानसं चेतना शक्तिः (१३८ श्लो०) १०५
यत्र यत्राक्षमार्गेण (११७ श्लो०) ८८
शक्तिसंगमसंक्षुब्ध (६९ श्लो०) मूलपु० पाठभेदः) १२८

---

(१०) मू० पा०.......................................... ।
..............................शान्ताभासस्तदा भवेत् ॥

(११) मू० पा०.......................................... ।
योगिनां तु विशेषोऽस्ति.......................... ॥

(१२) मू० पा० जलस्येवो.............................. ।
..............................विश्वभङ्गयो विभेदिताः ॥

(१३) मू० पा० ज्ञानप्रकाशकं सर्वं सर्वेणात्मा प्रकाशकः
एकमेकस्वभावत्वाज्ज्ञानं ज्ञेयं विभाव्यते ॥

(१४) मू० पा० शक्तिसंगम.............................. ।
................................................ ॥
................................................ ।
................................................ ॥
................................................ ।
..............................तद्ब्रह्मस्तन्मना भवेत् ॥ ७१ ॥

षट्शतानि दिवारात्रौ (१५६ श्लो०) मूलपु० पाठभेदः) ११४
सर्वज्ञः सर्वकर्ता च ( १०९ श्लो०) मूलपु० पाठभेदः ) ३६
सर्वं जगत्स्वदेहं वा ( ६५ श्लो० ) ३७-१३०
सर्वं देहं चिन्मयं हि ( ६३ श्लो०) मू० पु० पाठभेदः) ३६
हृद्याकाशे निलीनाक्षः ( ४९ श्लो० ) ३४

वीरावलौ ।

यत्र सर्वे लयं यान्ति . २२

श्रीनाथपादाः ।

श्रयेत्स्वातन्त्र्यशक्तिं स्वां ९२

श्रीकण्ठीयसंहितायाम् ।

पृथङ्मन्त्राः पृथङ्मन्त्री ४८

सर्वज्ञानोत्तरे ।

उच्चार्यमाणा ये मन्त्रा (१६ श्लो० उ०) ४८

सर्वमङ्गलायाम् ।

शक्तयोऽस्य जगत्कृत्स्नम् . ११७


---

.................................................... ।
भावयेद्भरितावस्थां महानन्दस्ततो भवेत् ॥
.................................................... ।
.................................................... ॥

(१५) मू० पा० षट्शतानि.................................... ।
जपो देव्याः समुद्दिष्टः प्राणस्यान्ते सुदुर्लभः ॥

(१६) मू० पा० सर्वेशः.................................... ।
....................................दाढ्याद्विवेच्छिवः ॥

(१७) मू० पा० सर्वं देहं.................................... ।
....................................परमोदयः ॥

शक्तिश्च शक्तिमांश्चैव ८९
सर्वाचारे ।
अज्ञानाद्बध्यते लोक ११
सिद्धामृते ।
सात्र कुण्डलिनी बीज ६५
स्पन्दे ।
अगाधसंशयाम्भोधि ( ३ नि० २० का० ) ५९
अत सततमुद्युक्त ( १ नि० २१ का० ) ७२
अतिक्रुद्धः प्रहृष्टो वा ( १ नि० २२ का० ) १२९
अतो विन्दुरतो नादो ( ३ नि० १० का० ) ५७
अन्यथा तु स्वतन्त्रा स्यात् ( ३ नि० ३ का० ) ७१
अप्रबुद्धधियस्त्वेते ( १ नि० २० का० ) ७७
अयमेवात्मनो ग्रह ( २ नि० ७ का० ) ३६
अयमेवोदयस्तस्य ( २ नि० ६ का० ) ५०
अवस्थायुगलं चात्र ( १ नि० १४ का० ) १२०
इति वा यस्य संवित्ति ( २ नि० ५ का० ) ३६ ९८
इयमेवामृतप्राप्ति ( २ नि० ७ का० ) ३८
एकचिन्ताप्रसक्तस्य ( ३ नि० ९ का० ) २०
कार्योन्मुखः प्रयत्नो यः ( १ नि० १५ १६ का० ) १२१
ग्लानिर्विलुण्ठिका देहे ( ३ नि० ८ का० ) ४१
जागरादिविभेदेऽपि ( १ नि० ३ का० ) मूलपु० पाठभेद ) २४
तथा स्वप्नेऽप्यभीष्टार्थान् ( ३ नि० २ का० ) ४०
तथा स्वात्मन्यधिष्ठानात् ( ३ नि० १ का० ) ३५

(१८) मू० पा० जाग्रदादिविभेदपि ।

तदाक्रम्य बलं मन्त्रा (२ नि० १ का०) ४५
तन्मीत्रोदयरूपेण (३ नि० १७ का०) मू० पु० पाठभेदः) ७४
तमधिष्ठातृभावेन (१ नि० ११ का०) ३०
तस्योपलब्धिः सततं (१ नि० १७ का०) २८
दिदृक्षयेव सर्वार्थान् (३ नि० ११ का०) ४३
दुर्बलोऽपि तदाक्रम्य (३ नि० ६ का०) ४१
न दुःखं न सुखं यत्र (१ नि० ५ का०) १२२
नहीच्छानोदनस्यायं (१ नि० ८ का०) ३२
निजाशुद्ध्यासमर्थस्य (१ नि० ९ का०) १२
पराभृतरसापायः (३ नि० १४ का०) १३
प्रबुद्धः सर्वदा तिष्ठेत् (३ नि० १२ का०) ७०
भोक्तैव भोग्यभावेन (३ नि० २ का०) ३३
यतः करणवर्गोऽयं (१ नि० ६ का०) ८
यत्र स्थितमिदं सर्वं (१ नि० २ का०) १०
यथा ह्यर्थोऽस्फुटो दृष्टः (३ नि० ४ का०) ४१
यथेच्छाभ्यर्थितो धाता (३ नि० १ का०) ४०
यदा क्षोभः प्रलीयेत (१ नि० ९ का०) ५९
यदा त्वेकत्र संरूढः (३ नि० १९ का०) २३
यस्मात्सर्वमयो जीवः (२ नि० ३ का०) ९
यस्योन्मेषनिमेषाभ्यां (१ नि० १ का०) २३
लभते तत्प्रयत्नेन (१ नि० ७ का०) ९३
शब्दराशिसमुत्थस्य (३ नि० १३ का० ) ८
स्वाराधकचितेन (२ नि० २ का०) ४८

(१९) मू० पा० तन्मात्रोद ........................... ।
.............................. संवरत्वतः ॥ ( ७५ पृ० च)

सेयं क्रियात्मिका शक्तिः (३ नि० १६ का०) ६७
स्वरूपावरणे चास्य (३ नि० १५ का०) १८
स्वच्छन्दे ।
अपसंव्येन रेच्येत । (७ प० २९१-२९२-२९३)
(मूलपु० पाठभेदः) ८०
अभिलाषो मलोऽत्र तु (४ प० १०४ श्लो०) १३१
अहमेव परो हंसः (४ प० ३९५ श्लो०) ११३
आत्मतत्त्वं ततस्त्यक्त्वा (४ प० ३८९ तितमात् ३९३
पूर्वार्धान्तं) मू० पाठभेदः) ८७
आत्मनो भैरवं रूपं (२ प० १३७ श्लो०) मू० पाठभेदः २०

(२०) मू० पा० अपसव्येन पूर्येत सव्येनैव विरेचयेत् ।
……………नैतत् मोक्षमार्गप[द]थस्य च ॥
……………………………प्राणायामस्त्रिधा मतः ।
…………………………………………… ॥
…………………………………………… ।
निष्कम्प कुम्भकं……………………………… ॥

(२१) मू० पा० आत्मतत्त्वं ततस्त्याज्यं……………… ।
…………………………………………… ॥
संकल्पः क्रमतो…………………………… ।
तस्मात्त्वा तु परा…………………………… ॥
विन्दते ह्यत्र युगपत्सार्वज्ञ्यादिगुणान्परान् ।
वेदनादि…………………………………… ॥
……………………………द्वियेति सोच्यते ।

(२२) मू० पा० आत्मनो भैरवं रूपं सदा भाव्यं वरानने ।
तस्य विघ्नाः प्रणश्यन्ति जपश्च सफलो भवेत् ॥

उद्बोधितो[23] यथा वह्निः (१० प० ३६८ उ० ३६९ पू०)
( मू० पाठभेदः ) १४०
उन्मनापरतो देवि (४ प० ३२९ श्लो०) १४०
चक्षुर्षा[24] यच्च संधानं (१२ प० १६०-१६१ श्लो०)
( मू० पाठभेदः ) १०८
तदेव भवति स्थूलं (४ प० २९३ श्लो०) ९७
तस्मात्सा तु परा विद्या (४ प० १९१ श्लो०) ४२
त्रिगुणेन[25] तु जप्तेन (६ प० ५४ श्लो० पू०) मू० पाठभेदः) १२४
न विद्या मातृकापरा (११प० १९७ श्लो०) ६३
नाभ्यां हृदयसंचारात् (७ प० २९४ श्लो०) ८२
पाशावलोकनं त्यक्त्वा (४प०४२९उ०४३०-४३१पू०) ८७
पुर्यष्टक[26]समावेशात् (११ प० ८६ उ० ८७ पू०)
(मू० पाठभेदः) ९१
प्रसह्य चञ्चलीत्येव (४ प० ३०८ उ० र्धा ३११ तमान्तम्) १०९
प्राणः[27] प्राणमयः प्राणः (७ प० २४ उ० २५ पू०)
मू० पाठभेदः) १३७

---

(२३) मू पा० उद्बोधितो································ ।
············प्रविशेत्काष्ठं·························· ॥
··················································· ।
················न बक्ष्येत······················ ॥
(२४) मू० पा० चक्षुषा यच्च दृश्येत वाचो वा यश्च गोचरः ।
································बुद्धिर्यानि व्यवस्यति ॥
(२५) मू० पा० त्रिगुणेन तु जप्येन······················ ।
(२६) मू० पा० पुर्यष्टकसमायोगात्पर्यटन्सर्वयोनिषु ।
(२७) मू० पा० प्राणापानमयः प्राणो················· ।
नित्यमापूरयत्नेपः································ ॥

ब्रह्मविष्णिवन्द्रदेवानां (६ प० ५४ उ० ५५ पू०) १२५
भित्त्वा क्रमेण सर्वाणि (७.प० ३२४ उ०३२५ पू०) ८२
मलप्रध्वस्तचैतन्यं (२ प० ३८-३९-४०) १५
यस्यै ज्ञेयमयो भावः (४ प० ३०९-३१०) मूल-
पु० पाठभेदः) १०९
योगी स्वच्छन्दयोगेन (७ प० २५० उ० २५८ पू०) २८
वायवी धारणाङ्गुष्ठे (७ प० २९६-२९७ श्लो०) ८१
विषयेषु च सर्वेषु (४ प० ३११) मूलपु० पाठभेदः) ११०
वेदनानादिधर्मस्य (४ प० ३९२-३९३) ८६
व्यापारं मानसं त्यक्त्वा (४ प० ४३२ श्लो०) १०५
स च सर्वेषु भूतेषु (४ प० ३०७-३०८ पू०) ३४
समनान्तं वरारोहे (४ प० ४२७ उ०) ८६
सर्वतत्त्वानि भूतानि (७ प० २४२) मूल-पु० पाठभेदः) ९३
सा देवी सर्वदेवीनां (१० प० ७२३-७२४ उ०) ३१
सुप्रदीप्ते यथा वह्नौ (४ प० ३९४) मूल-पु० पाठभेदः) ११२
स्वच्छन्दश्चैव स्वच्छन्दः (७ प० २५८ उ०) ९३
स्वनिर्वाणं परं शुद्धं (४ प० २३८ उ०) मू० पाठभेदः) ९९

---

(२८) मू० पा० यस्य शैव.................................. ।
मनो न चलते तस्य.................................. ॥

(२९) मू० पा० विषयेषु..................................स्थितः ।

(३०) मू० पा० सर्वतत्त्वानि..........वर्णा मद्याश्च ये स्मृताः ।
..........................................भावनयानया ॥

(३१) मू० पा० सुप्रदीप्ते.................................. ।
देहे प्राणस्थितो.................................. ॥

हकारस्तु स्मृत प्राण (४ प० २५५ उ०) १३८
.......(?)।
चैतन्यमेक एवात्मा ६
तद्ग्रहो मन्त्रसद्भाव ४९
त्रिषु धामसु यद्भोग्य २७
दर्शनात्स्पर्शनाद्वापि ११५
सकारेण बहिर्याति ११४

इति शिवसूत्रविमर्शिन्या प्रामाणिकग्रन्थ तत्प्रमाणाना
यथाक्रम समुच्चयनम् ॥

अथ

## चतुर्थपरिशिष्टम् ।

# शिवसूत्रविमर्शिन्याः पारिभाषिकपदविवरणम् ।

| | |
|---|---|
| अकुलम् | ६० तमपृष्ठे ३५ तमटिप्पन्यां द्रष्टव्यम् । |
| अख्यातिः | ५६ तमपृष्ठे द्रष्टव्यम् । |
| अग्निः | प्रमाणम् । |
| अग्नीषोमात्मिका | सृष्टिसंहारकारिणी परा शक्तिः । विशेषस्तु ३९ तमपृष्ठे १५५ तमटिप्पन्यां द्रष्टव्यः । |
| अज्ञानम् | ११ शे पृष्ठे ५२ तमटिप्पन्यामवेक्ष्यम् । |
| अणुः | जीवः ( अणिति श्वसिति इति अणुः, देहपुर्यष्टकप्रमाणाद्याश्रयः चित्तमयः प्रमाता ) । |
| अतिशान्तपदम् | तत्त्वोत्तीर्णं परमशिवधाम । |
| अनादिशिवः | परमशिवः । |
| अनाश्रितः | शिवतत्त्वावस्थितकारणपञ्चके प्रथमं कारणं स्वशक्त्याश्रयत्वात् अनाश्रितसंज्ञम् । |
| अनुत्तरम् | अकारपरामर्शः परमशिवश्च । |
| अन्तरात्मा | ९० तितमे पृष्ठे द्रष्टव्यम् । |
| अन्तस्थाः | ६२ पृष्ठे मूले ४६ तम टिप्पन्यां च द्रष्टव्यम् । |
| अबुद्धम् | योगिविषयधारणाज्ञानमयी जागरावस्था । |
| अभिलापः | १३१ तमे पृष्ठे द्रष्टव्यम् । |
| अमृतवर्णः | सकारः । |
| अम्बा | पारमेश्वरी विशेषशक्तिः ( या अप्ररूढभेदतया सामरस्यात्मिका द्वैतप्रथोन्मुखी ) । |

| | |
|---|---|
| अम्बिका | वर्णशरीरोल्लासिनी विशिष्टशक्तिः । ५३ शत्तमे पृष्ठे, २३ श-टिप्पन्यां च द्रष्टव्यम् । |
| अर्धचन्द्रिका | वर्णशरीरोल्लासिका विशिष्टशक्ति· । |
| अशुद्धविद्या | ५६ शत्तमे पृष्ठे द्रष्टव्यम् । |
| अहंकार | न ममेदं, ममेदम्—इत्यभिमानसाधनम् । |
| आणवमलम् | १३ शे पृष्ठे द्रष्टव्यम् । |
| आणवसमावेशः | ७९ तमे पृष्ठे द्रष्टव्यम् । |
| आणवोपायः | ७३ तितमे पृष्ठे १ म-टिप्पन्यां द्रष्टव्यम् । |
| आत्मतत्त्वम् | शुद्धविज्ञानकेवल· ( यत् समनापदान्तव्यासिकम् ) । |
| आत्मव्याप्तिः | ८७ तितमे पृष्ठे द्रष्टव्यम् । |
| आनन्दः | शक्तिविशेषः । आ-इति वर्णपरामर्शः । |
| आनन्दवृन्दम् | आदि-क्षान्तवर्णसमूहः । |
| आसनम् | ९४ तितमे पृष्ठे द्रष्टव्यम् । |
| इच्छा | इवर्णपरामर्श । |
| इच्छाशक्तिः | १०० तम पृ० ७९ तमटिप्पन्या द्रष्टव्यम् । |
| ईशनम् | ई-इत्यक्षरम् । |
| उद्धातः | नादकलानुभवात्मा शब्द· । |
| उद्यमः | १८ श-पृ० द्रष्टव्यम् । |
| उन्मना | समनोपरि शक्तिरूपा मात्री कला । ८७ तितमे पृष्ठे, ४३ शत्तमटिप्पन्या च द्रष्टव्यम् । |
| उन्मेष | उ-इत्यक्षरपरामर्श· । २० शे पृष्ठे च द्रष्टव्यम् । |
| उन्मेषदशा | ६० तमे पृष्ठे ३८ शत्तमटिप्पन्यां द्रष्टव्यम् । |
| ऊनता | ६० तमे पृष्ठे ३८ शत्तमटिप्पन्या द्रष्टव्यम् । |
| ऊन्माणः | ६२ तमे पृष्ठे ४७ शत्तमटिप्पन्या द्रष्टव्यम् । |

| | |
|---|---|
| एकाणवा | पश्यन्तीरूपा वाक् । ५४ शतमे पृष्ठे २६ श-टिप्पन्यां द्रष्टव्यम् । |
| कञ्चुकम् | कलादि-नियतितत्त्वान्तः तत्त्वनिचयः ( पुंसः स्वरूपावरणत्वात् कञ्चुकमिति उच्यते ) । |
| कन्दः | मूलाधाराख्यः स्थानविशेषः । |
| कर्मेन्द्रियाणि | वाक्, पाणी, पादौ, पायुः, उपस्थः । |
| कला | तत्त्वविशेषः, पुरुषस्य किंचित्कर्तृत्वहेतुः । भागः । शक्तिश्च । |
| कलाशरीरम् | १४ श-पृष्ठे द्रष्टव्यम् । |
| कल्पितप्रमाता | शून्यपुर्यष्टकाद्यभिमानी जीवः । |
| कार्ममलम् | १५ श-पृष्ठे ७० तितमटिप्पन्यां द्रष्टव्यम् । |
| कालः | तत्त्वविशेषः, (भावानां भासनाभासनात्मनां क्रमावच्छेदको भूतादिः) । |
| कालपदम् | ७९ तमे पृष्ठे १८ श-टिप्पन्यां द्रष्टव्यम् । |
| कालाग्निः | निवृत्तिकलायां कालाग्निभुवनेशो नाम रुद्रविशेषः, यत्क्रोधोपक्रमे विश्वं समुपरम्यते संहारारम्भे । |
| कुण्डली | पारमेश्वरी विसर्गशक्तिः ( सैव गर्भीकृतनिखिलविश्वनिर्भरत्वात् कुण्डलिनीशब्दव्यपदेश्या ) । |
| कुम्भकः | प्राणस्य हृदि पूरणम् । |
| कुलम् | परसंविचत्त्वम् । षट्त्रिंशत्तत्त्वानि च; तानि यथा— १ शिव २ शक्ति ३ सदाशिव ४ ईश्वर ५ शुद्धविद्या ६ माया ७ कला ८ विद्या ९ राग १० काल ११ नियति १२ पुरुष १३ प्रकृति १४ बुद्धि १५ अहंकार १६ मनः १७ श्रोत्र |

१८ त्वक् १९ चक्षुः २० जिह्वा २१ घ्राण
२२ वाक् २३ पाणि २४ पाद २५ पायु
२६ उपस्थ २७ शब्द २८ स्पर्श २९ रूप
३० रस ३१ गन्ध ३२ आकाश ३३ वायु
३४ वह्नि ३५ सलिल ३६ भूमयः ।

| | |
|---|---|
| कुलमार्गः | परसंवित्तत्त्वप्राप्त्युपायः । |
| कुलाचारः | ११५ तमपृष्ठे १२१ तम-टिप्पन्यां द्रष्टव्यम् । |
| क्रियाशक्तिः | १०१ तमे पृष्ठे द्रष्टव्यम् । |
| क्षेत्रज्ञाः | पशुरूपाः प्रमातारः (ब्रह्मादि-स्थावरान्ताः) । |
| क्षेमः | ८० तितमपृष्ठे २१ श-टिप्पन्यां द्रष्टव्यम् । |
| क्षोभः | ६९ तमपृष्ठे द्रष्टव्यम् । |
| खत्रयम् | ५८ शतमपृष्ठे ३० शतम-टिप्पन्यां द्रष्टव्यम् । |
| खेचरीचक्रम् | (खे बोधगगने चरन्तीति खेचर्यः, तासां चक्रं समूहः) प्रमातृभूमिकाश्रितो योगिनीगणः । |
| खेचरीमुद्रा | ५७ शतमपृष्ठे द्रष्टव्यम् । |
| गगनाङ्गना | चिच्छक्तिः । |
| गर्भः | ५६ शतमे पृष्ठे द्रष्टव्यम् । |
| गुरुवक्त्रम् | अनुग्राहिका शक्तिः । |
| ग्रन्थिः | पाशः । |
| घण्टिका | तात्वधोभागः । तालुमूलं च । |
| चन्द्रः | प्रमेयम् । अपानाख्य प्राणश्च । |
